R, U पूर्ण्णे। ४९ B मुहूर्त मुहुतार्द्ध च, M मुहूर्त वां मुहूर्त वा मुहूतार्द्ध, R मुहूर्त
मुहूताध्र्व, K मूहूर्त च मुहुतार्द्ध। ५० B, K, R सोऽग्निशर्मा। ५१ B, K, R कदा।
५२ B, M, R, U द्वितीयं। ५३ B, M, R, U देवा। ५४ B तावदाचार्य्य च, B, R

तावदाचार्य्यं। ५५ B तावत्कुर्यात् कोऽपि, K तावन्मकुर्यात् कोऽपि न भो नृप। ५६ B यदा भावे त्वा। ५७ B, K, R ब्रह्माणं। ५८ B, K, R तद्युस्ते च मुदान्विता, U दद्यस्ते च मुदा नृप, M दद्युस्ते च सदा नृप। ५६ B सवः। sl. 83 is abseent in B, K, M, R, U. ५६ B, K, R जितेन्द्रियतमा, M जितेन्द्रियतमाः। ६० B, K, R पृष्ट्वान्। ६१ B तत्वनधो। ६२ M पूर्ववत्।

दशमोध्यायः

इन्द्रद्युम्न उवाच

चतुर्भुज सुरश्रेष्ठ विष्णोः सेवकलक्षणम्।
तवत्प्रसादाच्छुतं सर्वभिदमनीं श्रोतुमिष्यते।।१।।
पूजाय मुपचाराणां द्रव्याणां निर्णयं तथा।
पात्राणां च तथा विष्णोर्नेवेद्यस्य च लक्षणम्।।२।।
यदि तेऽनुग्रहो बुहि मयि सम्प्रति वर्तते।।३।।

ब्रह्मोवाच

साु साधु नुपश्रेष्ठ कयियामि समासतः।
पृष्टं यच्च सर्व तत्सर्व श्रृणु सादरम्।।४।।
प्रथमं पात्रहोता च[2] तुलसीदलसंचयन्।
सुवासितानि पुष्पाणि दद्यादर्भानुतमान्।।५।।
आसनार्थ ततो दद्वात्पद्मदूयमनुत्तमम्[3]।
करवीरं च तगरं क्स कुन्दं च पंच पुष्पकम्।।६।।
स्वागते जातिकां मल्लीं चम्मपकं बकुलं तथा।
केतकी नीलकंमलं दद्याच्च षट्[4] सुवासितम्।।७।।
एतान्यपि चं पुष्पाणि रुद्रसंख्यानि भो नृप।
आसने व्सवागते वाऽपि[5] प्रशस्तनि तदर्चने।।८।।
तदभावे गन्धपुष्णो[6] दद्यान्नृपवरोत्तम।
पाद्यार्थ वितरेद्धीमान् श्यामाकं कुसुमं[7] तथा।।९।।
सर्षपं श्वेतवर्ण च शुक्लपद्ममुशरीररकम्।
दद्याच्छुशकसतरां[8] भूप विष्णुक्रानतां च विष्णवे।।१०।।
दूर्वा च चन्छनं चेप प्रत्येकं चैव[9] चिहृनकम्।
चतुःपलजले सर्व क्षिप्त्वा पाद्यं प्रकल्पयेत्।।११।।
अर्घयार्थ रचयेत्पात्रे जले द्विपलं संचितम्।
यवं तिलात्सु च[10] हीनान् सर्षपं श्वेतर्णकम्।
कुशाग्रं च तथा गन्थं पुष्पं दद्यान्नृपोत्तम्[11]।
प्रत्येकमेकचिह्नं स्यातोऽध्र्य च प्रकल्पयेत्।।१३।।
ततः[12] परं प्रवक्ष्यामिम विष्णोराचममनीयकम्।
विधिं शृणु महाप्राज्ञ जलं द्विपलसंम्मितम्।
मुरं कल्लोलिनीं चेवाशीरं[13] च[14] हिमवानुकाम्।।१५।।
प्रत्येकं चिह्नकं कुर्याद् दद्यादाचमीनयकम्।

मधुपकार्धमेकत्र मधुगव्यधतं दधि।।१६।।
खण्डं च प्रक्षिपेतत्र्माम पलात्रं प्रकल्पयेत्।
पुनराचमनीयार्थ जलं ख द्वपलं स्मृतम्।।१७।।
चिह्निकांपिध्रयुतं भूप कर्पूरं चन्दनं तथा।
ततः स्नानंनाथमाकुय्र्याज्जलं शतपलादितम्।।१८।।
तदभावे तदर्द्ध स्यात्तस्याभावे तदर्द्धकम्।
चिण्हकार्द्धक[१५] कूर्परं गन्धमेकपलं तथा।।१९।।
दद्यात् स्नानोपचारेऽपि करये धरणीधव।
एकहस्तमितं पूतं शुक्लवस्त्रं[१६] मनोरमम्।।२०।।
प्राच्छनाय प्रकुर्याद् वे सर्वथा नान्यथा चरेत्।
परिधानोत्तरीययार्थ पीतवस्त्रद्वयं तंतः।२१।।
हस्तमात्रं च तद्दघाद्वेष्णवे देत्य विष्णवे[१७]।
यक्षापवीतं वितरेत् षड्गुणं गुणसागर[१८]।।२२।।
हेमरत्नावलीमुक्तारचितं पदकं ततः।
दद्यात् भक्तियुतः प्रीत्या हरये हृदये नृप।।२३।।
कप्रूरमिश्रितं[१९] गन्धं पलमात्रं समर्पयेत्[२०]।
दिव्यं हस्तत्रयं मामल्यं तथादेयं मुरारये।।२४।।
ततः[२१] परं प्रवक्ष्यामि धूपदानस्य निर्णयम्।
गोपनीयतरं भूप श्रृणु यतनान्ममहीपते।।२५।।
गुग्गुलं चन्दनं चेव कुन्दुर[२२] ब्ल्विचन्दनम्।
उशीरमुगुरं तावन्नुस्तकं हीरवेरकम्।।२६।।
तत्सर्व चूर्णकं[२३] कुर्यान्मधुसर्पिमसमन्वितम्[२४]।
क़र्षमात्रं नियोज्याग्नो धूपं कुर्यान्मनोरमम्।
योगनिद्राज्ञयार्थ वे विष्णो नीर्मानितकेऽर्पयेत्[२५]।।२७।।
तदा वरुणपूजान्ते[२६] धूपं दीपं च विष्णवे।।२८।।
दद्याप्सु भक्तियुक्तेऽपि सत्वरं नृपसत्तम।
यतोऽर्चने[२७] धूपदानं प्रधानं श्रृतिमाषितम्।।२९।।
सद्यस्तुश्टिकरं विष्णोयोगनिद्राक्षयप्रदः[२८]।
सान्निध्यं जायते धूपात्तथा दीपप्रधानतः[२९]।।३०।।
सचेतना देवतास्या नैवेद्वयं च विलोकयेत्।
सन्तापो जायेत धूपे देवतायाः पुनः पुनः।।३१।।
तसमातसर्वोपचारेषु धूपः श्रेष्ठो हि भूपते।
विलम्बेन न क़र्तव्यो विष्णोः[३०] प्रीतो यतो नृप।।३२।।

धूपस्य समयो जातस्तथा धूपो भविष्यति।
दृष्टं[३१] मया गम्यतेऽत्र त्वामाग्च्छेति वक्ति यः।।३३।।
कीर्तयेद् वा महद्भक्त्या सोऽपि मुक्तो[३२] नसंशयः।।३४।
श्रेष्ठं सवोपचाराणां धूपं दद्यत् त्वरान्वितः।
न दद्याच्चेत् महाक्रोधो जायते जगतांपतेः।।३५।।
तसमात्सर्वोपचारांश्च दयश्चैव[३३] शनैः शनैः
त्वरयामियुतो धूपं. दद्याद्दीपं च यत्नतः[३४]।।३६।।
नव्यशुक्लांशुकेनेव वर्तिवेर्ददांगुला भवेत्।
कर्पूरपूरतितद्वच्चतुर्दलसमन्विता[३५]।।३७।।
तया दीपं सदा भक्त्या दद्यान्ममधुदि मुदा।
गन्धकर्पूरमिश्रेण[३६] पयसा पूर्वमानतः[३८]।।
पाद्याचमौ पुनद्द्यान्नेवेद्यं च ततः परम्।
आचाय्र्यापेक्षितस्तावत्पात्रहोात[३७] सुसंयतः।।३६।।
ब्रह्मा च जलधारां च वे दद्याादालस्ववर्जितः[३८]।
अधानन्तरतो भूप नैवेद्यस्य च लक्षणम्।।४०।।
सावधानतया मत्तः श्रृणु सम्प्रति[३९] सादरम्।
प्रातः पूजोचितं कुर्यानमुद्गान्नं धरणीपते।।४१।।
तण्डुलांश्च जल चेव नव्ये मृण्मयभाजने।
गतसारं च नैवेद्यं प्प्रसादे नैव कारयेत्[४०]।
एवमन्नं प्रकुर्वीत मुद्गांस्तावत्तथा पचेत्।।४३।।
पाषाणभूते पात्रेऽपि ह्येकत्रमादिकं चरेत्।
मृद्गान्नयोत्सुद्धिसमं दिव्यगव्यधृतं[४१] क्षिपेत्।।४४।।
आद्रकं जीरकं मत्र हिंगु लवणमेव च।
पातयेदनुमानेन कुय्र्यात्तत्स[४२] परिष्कृतम्।।४५।।
ततः स्वर्धमये पात्रे रोप्यो वा पित्तलेऽपि वा।
भोज्यं तत्रैव[४३] संयोज्य देयं श्रहपतये मुदा।।४६।।
शंर्करान्नं ततः कुर्यादर्धेकमागमुत्तमम्।
अन्नं द्विमागं संयोज्य शर्करामगसंयुतम्।।४७।।
सुपक्वकदलीयुक्तं धुतयुक्तं मनोहरम्[४४]।
शर्करान्नमिदं शसतं प्रातः पूजनकर्मणि।।४८।।
मुद्द्गान्नशर्करान्ननामभावे[४५] नृपतीश्वर।
प्रातः पूजा प कर्तवया कुर्याच्चेन्निष्फलं[४६] भवेत्।।४६।।
एतदन्नद्वयं भूप प्रातः पूजोचितं हरेः।

चतुर्विधं पपं[४७] च धृतपाचितमुत्तमम्।।५०।।
कर्तव्यं तत्र वे भूप विष्णुप्रीणनहेतवे[४८]।
ततो मध्याह्न पूजायां नैवेद्यं च यथा भवेत्।।५१।।
ततो कर्ण्णय भो राजन्[४९] गदतो मे यथाविधि।
जलतण्डुलर्योर्मानं मुद्गमानं[५०] चरेद् बुध[५१]।५२।।
अधूमं नातिपदीं[५२] च न भवेत् गतसारकम्५२।
धधृतेर्जजरितं भूप लवणेन युंतं तथा।।५३।
सूर्ववर्चससांकशं सूय्र्यादन्नमनुत्तमम्[५३]।
स्वर्णवर्णाश्च मुद्गांश्च लांगलीशकलान् क्षिपेत्।
किंचिछिनारजश्चैव लवणं हिंगुमेव च।।५५।।
आर्दकं जीरकं तत्र नव्यगव्यधृतं क्षिपेत्।
रामठं[५४] जीरकं यथायोगयं नियोजयेत्।।५६।।
पुनः पाकावसाने च धृतं च जीरके न्यसेत्।
द्वितीयं व्यजनं चेव कुर्यान्मध्याह्नपूजने।।५७।।
अपरं व्यजनं कुर्यात्तत्कन्दफलचयैः।
सिता द्रव्ये[५५] दिशां[५६] भागे ऋतुभागे धृतं[५७] तथा।।५८।।
संपच्य तत्र दत्वा[५८] च मरिचक्षोदमुत्तमम्।
लवणं पातवेतत्र परिपाकेऽथ जीरकम्।।५६।।
धृतं च तत्र निक्षिप्य रचयेच्चारु भूपते।
मधुरं व्यंजनं प्रोक्तं तद्देयं हरये सदा।।६०।।
दण्डं च त्वया हीनं कदलीफलमुत्तमम्।
सितातण्डुलवूर्णाडयें रचयेद्धृतपाचितम्।।६१।।
एवं चतुर्विधं दिव्यं व्यंजनं रचयेन्नृप।
द्विभागे गव्यपयसि चारुतण्डुलचूर्णकम्।।६२।।
भागमेकं प्रकल्याथ शर्करापयसंयुतम्।
पाचयेतत्र निक्षिप्य पचयं[५९] चकदलीफलमम्।।६३।।
भाषाणां वटिकाभिश्च धुतपक्वामिंजतम्[६०]।
मरीचक्षोदसंयुक्तं कर्पूरणाभिवासितम्।।६४।।
एतादृशं च नैवेद्यं मध्याह्नसमये नृप।
कुय्र्यादायर्यजनश्रेष्ठ विष्धुप्रीणनहेतवे।।६५।।
चतुर्मागावशिष्ठे च दुगे[६१] पक्वे मनोरमे।
शर्करा पातयेतत्र कर्पूरं च[६२] मरीचकम्।।६६।।
एवं दद्याद् भगवते ममध्याह्नार्चनकर्मणि।

नानावर्णानि पूपानि धृतपक्वानि भूपते।।६७।।
रविसंख्या शतान्यत्र[६३] दयाद्देत्यारये तदा।
एवं मध्याह्नसमये कुय्र्यान्नेवेद्यमुत्तमम्।।६८।।
सायहने यच्च नैवेद्यं तन्निशामय[६४] भूपते[६५]।
दिव्ये धौततरे चान्ने त्रिभागे दधि योजयेत्।।६६।।
एकभागाद्रकं[६६] चैव लवणं च यथाक्रममम्।
मार्जितं जीरकं चैव कुय्र्यादृध्यन्न मुत्तमम्।।७०।।
कूष्माण्डंसकलं दिव्य चिंचाररससान्वितम्।
शितायुतं च[६८] संपच्य नारिकेलार्द्रकेर्युतम्।।७१।।
लवणं च यथायोग्यं मरीचक्षेदमिश्रितम्।
आमिक्षावाटिकास्तत्र धृतपक्वाश्च निश्चिपेत्।।७२।।
भर्जिकं जीरकं तावद्धृतं तत्र नियोजयेत्।।
एतादृशं शर्कराख्यं व्येंजनं नृपसत्तम ।७३।।
सायाह्ने विष्णवे दद्यातथा शाकं[६८] सुदुर्लभम्[६८]।
कोशलाख्यं महीपाल सायाह्ने शंस्तमुत्तमम्।।७४।।
नारिकेलार्दकेर्युतं जीरकेश्च समन्वितम्[६६]।
रामठद्रवसंयुक्तं[७०] लवणेन युतं तथा।।७५।।
धृते संपथयमानं[७१] तत्सायाह्ने नृपसत्तम्७२।।
कथयामि समासेन विष्णोः प्रीतिकरं महत्।।७६।।
त्रिभागे पयसि स्निग्धे तण्डुलाशर्करास्तथा[७२]।
एकभागेल संयोज्याः कुर्यात्पायसमुत्तमम्।।७७।।
तत्र कूर्परचूर्णानि सेंचयेद् धृतसंयुते।
तच्च चन्द्रमसस्तुल्यं तद् दद्याद्विष्णवे मुदा।।७८।।
तत्रार्चनेऽपि पूपानि षड्विधानि नृपोत्तम।।७६।।
धृतपक्वानि दिष्यानि दद्याद्[७५] श्रीतपये सदा ।८०।
ततः पंचमपूजाया[७३] नैवेद्यं यसृतं[७८] बहु।।७६।।
तद्वदामि महीनाथ श्रृणु मतः समाहितः।
धौते चारुतमे चान्ते त्रिभगे चन्द्रसन्निमे।।८१।।
मातुलांग जलं भागं योजयेद्देवमुत्तमम्।।७६।।
लवणं तत्र निक्षिप्य क्षालितान्नं प्रकल्पयेत्।।८२।।
अपरं दुग्धसारं च कूर्परक्षोदसंयुतम्[८०]।
शितारजः परियुतं दद्यान्मरभिदे[८१] तदा[८२]।।८३।।
चिंचार सदविभागेऽथ दध्यममो भागयुग्मकम्[८३]।

संयोज्य लवणं योज्यं माषाणं वटिकास्तथा।। ८४।।
धुलपक्वाश्च तत्रैव निक्षिप्य क्षितिपोत्तम्।
भर्जितं जीरकं तत्र संयोज्य कंजिकाद्वयम्[८४]।।८५।।
कुर्य्याद्व्यंजनाश्चर्य विष्णुप्रीणनहेतवे।
भाषाणां पेषितानां च श्रिभांगे योजनेन्नृप।।८६।।
दुग्धसारं त्वेकमागं तत्र पववतरं पुनः।
दिव्यामृतकपानीयं रम्भाफलकुलौद्मबम्[८५]।।८७।।
निक्षिप्य जीरकं तावन्मरीचं चाद्रकं पुनः।
रामठं[८६] लवणं तत्र[८७] यथायोग्यं[८८] नियोजयेत्।।८८।।
एतत्सर्व धृते गव्ये[८९] परिपक्वं यथा भवेत्।
कृत्वा दिव्यतरं पूपं[९०] पातयेच्चूर्णिताः सिताः।।८८।।
तत्रैव च धृतं पूर्ण पातयेदतियनतः।
एतादृशं तत्र पूपं रचयेतपंचाभार्गने[९१]।।८९।।
अपरं साद् यथा पूपं तद् वदाभि नृपोत्तम्।
दिव्यामृतकपानीयं कदलीफलमत्तमम्।। ९०।।
मरीचं तत्र[९३] निक्षिप्य सर्वमेकत्र भाजने।।९१।।
ततौ मव्यधृते दिव्ये तत्सर्व चारुपोषितम्।
ततौ मव्यधृते दिव्ये तंत्सर्व चारूपोषितम्।
सम्पश्य रचयेत् पूपं शर्करापाकयोगतः।।९२।।
कर्पूराशर्कणक्षेदैः पुनर्जर्जरितं भवेत्।
तादृशं पूपमाश्चर्य दद्याछ्रीपतये मुदा।।९३।।
वस्तपेते जले दिव्ये जातीफललबंगयोः।
धर्मणात्सोरते तत्र कर्पूरक्षेदमुत्तमम्।।९४।।
पातयित्त्वाथ तद्देयं प्रतिःपूजनकर्मणि।
एतन्नेवेद्ययुक्तसो[९४] पूजाच पंचमी भवेत्।।९५।।
अशक्त्या त तुरीयायां पूजायां तदुदापयेत्[९५]।
एवं पंचविधा प्रोक्ता पूजायां[९६] जगतां पतेः।।९६।।
यादृशं तत्र नैवेद्यं तवाग्रे कथितं नृप।
ये च ये च द्विजाः पाककर्तारः स्युः पृथक् पृथक्।।९७।।
तायु तासु च पूजासु पक्तुं[९७] तान् यौजयद् भवान्।
यातयामं तरसं नैवेद्यं न भवेद् यथा।।९८।।
तथापि भवता काय्र्या[९८] सूपकारेर्नपोत्तम।
पाकार्थ सूपकारेश्च हाय्र्यं[९९] ग्वयेर्जल[१००] नृप।।९९।।

पाकयोग्यानि पात्राणि रक्तवर्णानि कारयेत्।
कृष्णवर्णानि पात्राणि न कुर्याच्च कदाचन।।१००।।
गीतं नृत्यं तथा भूप तांम्बूलाशनमेव च।
माल्यानां धारणं तावन्मस्तकेपि महीपते।।१०१।।
कलहं च विवादं च हास्यं शोकं तथैव च।
असद् भाषा प्रकथनं न कुर्य्यात्पाकमन्दिरे।।१०२।।
तत्रेव[१०१] विषये राजन् सावधानो सरेत् भवान् भवेत्।
अन्यथा चेतदा विष्णर्न प्रीतितोऽपि[१०२] कदाचन।।१०३।।
यदा भवान् महाविष्णुं प्रतीच्छछन्नमुत्तमम्।
पूर्ण्णव्यंजनसंयुक्तं पूपवृन्दसमन्वितम्।।१०४।।
पायसोत्करसंयुक्तं खेचरान्न कुलान्वितम्[१०३]।
तादृशं यच्च नैवेद्यं भुरि चारुतरं भवेत्[१०४]।।१०५।।
तन्मो मण्डलवाह्येऽपि स्थापनीयं कदाचन।
मध्याह्नसमयेऽन्नस्य योग्यः पाकार्थमुत्तमः[१०५]।।१०६।।
अन्नं पूर्णतमं यस्मात्[१०६] पूपव्यंजनसंयुतम्[१०७]।
श्रद्धया परया दद्याद् विष्णवे देत्यनिष्णवे।।१०७।।
नैवेद्यं चे[१०८] बहुतरं भक्त्या सम्पाद्यते[१०६] यदा।
तदास्य वेनतेयस्य पुरपृष्ठे निवेदयेत्।।१०८।।
प्रचुरं चारु नैवेद्यं स्थापनीयं नृपोत्तम।
लसद्रम्भादले तत्र[११०] त्रेधापंक्तिकमुत्तमम्।।१०६।।
आबाह्य देवतास्तत्र मूलमन्त्रेण भो नृप।
गन्धाढ्येरुपचारेश्च तन्नेवेद्यं निवेदयेत्[१११]।।११०।।
त्रिकालपूजानान्तुषु या बुद्धिर्जायते नृप।
तदन्नेषु तथा दुद्धिः काय्र्या च नात्र संशयः।।१११।।
अत्र शंका न कर्तव्या न कर्तव्या च[११२] कदाचन।
यस्यात्र जायते शंका रोरवे पच्चतें धक्क्।।
बह्महत्यादि पापध्नं निर्माल्यं जगतां[११३] पतेः।
भुजतां[११४] नृपतिश्रेष्ठ मुक्तिः तेषाः न दुर्लभा।।११२।।
जगननाथस्य नैवेद्यां महापातकलाशनम्।
मक्षणात् फलमाप्नोति कपिला कोटिदानजम्।।११३।।
चाण्डालादिजलास्पृष्टं तदन्नं च[११५] नृपोत्तम।
भौक्तव्यं, सहसा विप्रेः पावनं सुरदुर्लभम्[११६]।।११४।।
प्रतिजन्मनि यो भक्तस्तस्य विष्णोः परात्मनः।

तस्येवसया नृपश्रेष्ठ तदन्ने विमलामतिः। ।११५। ।
यज्ञस्तपांसि११७ राजेन्द्र ब्रतानि बिबिधानि च।
तीर्थतनानि तन्नैव कृतर्मन सुकृतानि च। ।११६। ।
पितरस्तर्धितास्तेन तथा देवा महर्षयः।
दक्षनि तेन दानानि सकलानि महीपते। ।११७। ।
जगन्नाद्यन्न मे तद्वे येन भुक्तं सुपावनम्।
बहुनात्र विमुक्तेन[११८] नृपसत्तम साम्प्रतम्। ।११८। ।
तदननस्पर्शतोद्य नूनं[१२०] महापापेः प्रमुच्यते।
खादन्ति भक्त्या ये केचित् स्पृशन्ति[१२१] क्षितिमण्डले। ।१२०। ।
पश्चन्ति ये च मनुजास्ते कृतार्था न संशयः।
गवां कोटिप्रदानां च वाजपेयशतााययत्। ।१२१। ।
अश्वमेघसहस्राद्वे[१२२] राजसूय शताश्च यत्[१२३]।
ब्रतोपवासतो[१२४] भूप यत् फलं जायते भुवि[१२५]। ।१२२। ।
तत् फलं मवाप्नोति[१२६] जगन्नाथान्नभक्षणात्।
किमुक्ते नात्र बहुना चण्डालसपृष्टमेव हि। ।१२३। ।
कुवकुटस्य मुखात् भ्रष्टं तद् ग्राह्यं देवतेरपि।
तस्मात्तदन्नं सहसा प्राप्तमात्रेण[१२७] भक्षयेत्[१२८]। ।१२४। ।
विचारणा न कर्तव्या न कर्तव्या कदाचन।
साक्षाद् ब्रह्मस्वरूपोऽयं जगन्नाथे न संशयः। ।१२५। ।
तस्या बलोकनान्मुक्तिस्तदन्नाशऩतो नृप। ।१२६। ।

सूत उवाच

चतुर्मुखाद्विप्राः श्रुत्वा स नृपसत्तम.[१२६]।
माहात्म्यं[१३०] जगदीशस्य तदननस्य च सत्तमाः। ।१२७। ।
कृतकृत्यो बभूवासौ सोऽयं[१३१] कथयते विधेः।
जगननाथन्न मे तद्वे शंष्कं कृत्वा सुभक्तितः[१३२]। ।१२८। ।
देशान्तरे जनो यस्तुं[१३३] भक्षेत् प्रतिदिनं द्विजाः।
सर्वपापविनिर्मुक्ताः संगच्छेत्परम। पदम्। ।१२६। ।
यव्तु नित्यं महाविष्णोऽष्ट कलार्चावलोकनमं[१३४]।
करोति परया भक्त्या भक्षत्यन्नसुपवनम्। ।१३०। ।
सर्वपापविनिर्भुक्तो विष्णुलोके महीयेतें[१३५]।
जगन्नाथस्य मौ विप्राः देशान्तरभुपागते। ।१३१। ।
अन्ने सुपावने तावद् भक्तिंये कुर्वते नराः।
प्राप्तनात्रेण सादन्ति हृष्यन्ति च मुहुर्मुहुः[१३६]। ।१३२। ।

तेऽपि नीलाचलस्थस्य हरेः दर्शनतः[१३७] फलम्।
प्राप्त मुक्ता भवकेशात्सत्यं[१३८] सत्यं वदाम्सयहम्।।१३३।।
यस्यापि पाचिकां[१३९] लक्ष्मीर्यस्य भोक्ता जगत्पतिः[१४०]।
तस्यान्नस्य च माहात्म्यं केन वक्तुं हि शक्यते।।१३४।।
ब्रह्मादिदेवनिचयैः[१४१] प्रसिव्यमाने
नानामनोरथकरे दुरितापहारे।
ख्याते जितेन्द्रियतमा विमले तदन्ने
येषां च भक्तिरतुला मुवि ते कृतार्थाः।।१३५।।
इति श्री सूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये[१४२]
दशमोऽध्यायः

FOOTNOTES

१ K, M, R, U पूजाया। २ B, K, R तु। ३ M मनन्वितं। K, R, U मनिन्दितां। ४ B ण्ट। ५ B, K, R, U चापि। ६ M, U गन्ध्पुष्पाणि दंद्याद्मपति सत्तम, R गन्धपुष्पो दद्याद् भूपतिसत्तम। ७ K, R, U कुंकुमं। ८ K दद्यात् शुक्लतरां। ६ B. K. U चेक। १० K, R, U च।. ११ B दान्मृतोत्तम, K, M दिव्यं नृपोत्तम। १२ B, K, R, U अतः। B, K, M, R, U तावदशीरं। १३ K, M. Omit च १४ B चिह्नकार्द्धकं। १५ B, K, U, शुक्लचेलं, B शुक्लचेलं, B शुक्लचेले। १६ B जिष्णवे। १७ B. K, गुणसादरं, R गुणसार। १८ R मित्रि। १६ B प्रकल्पयेत्। २० K. M. R, U अतः। २१ K. R कुन्दरं। २२ B, K, R चूर्ण्णितं। २३ B कृत्वा मधूसर्पिः। २४ B. K. R र्नखान्तिके। २५ K, M, U वरणं। २६ B गतोऽर्चके। २७ B. K. R. U प्रदं.। २८ B प्रदानतः। ३० B, K, M, R भूपा। In Mss. B, K, R, U, the following verses are present before sl. 32 -

तस्मात् सर्वोपचारेषु श्रेष्ठं धूपार्पणं नृप।
तथा दीपप्रदानं च प्रधानं पूजयेन हरेः।।
तत्रापि धूपः सहसा विष्णोः प्रीतिकरो महान्।

३२ B विष्णुः। ३३ K, R, U द्रष्टुं। ३४ B सोऽयं मुक्तो। ३५ K, R दद्याच्चेव। ३६ K. M. R, U भक्तितः। ३७ R तावच्चतुविल, K तावच्चतुर्दलं। ३८ R संमित्र, K संमिश्रत्। ३६ B, K. M. R पोषितं तावत्। ४० K, M, R स। ४१ B सम्प्रति। ४२ M कारये धृतं तथा। ४३ B दिव्यं। ४४ B कृतत् स, कृतं तत्स। ४५ B. K तदैव। ४६ B, K, R मनोहरम्। ४७ K, M, R कुर्ययर्र मुद्गान्न। ४८ M कुर्याच्चनि[illegible]ला भवत्। K, R, U काय्र्याच्चे निष्फला भवेत्। ४६ B, K, M. R पूपं, U धूपं R

प्रीणयहेतवे। ५१ B नृपते। ५२ B, K, M, R, U समानं। ५३ B नातिपदां। ५४ B भवे। ५५ B कूयर्या, U कुर्या। In Mss. B, K. M. R. U, the following verses are present after 56a -

मुदगव्यंजनमेव च कुर्याद् भूप मनोहरम्।
कलत्रयं ततो रम्भापफलमप्यन्तसोख्यदम्।।
कूष्माण्डकं च यंछिय यथायोग्यं पचेन्नरः।
दशमाने सर्षपाम्पश्चेत् तत्सं पथ्य यत्नतः।
मरीचजीरके तत्र षड़ागेऽसिति योजयेत्। अनु०
एतद्गलानुमाने तच्चतुर्मागं धृतं क्षिपेत्।

The variant in K is षट् भागेऽपि च। ५६B, K, M. R, U आमठं। ५७ B.K सिताद्रके। ५८ M विशां। ५९ B धृते. तथा M Omit it. ६० B, K, M, U चामिक्षाम्। ६१ B, K, R, U पक्वं। ६२ B, K, R, U रंजितम्। ६३ B. K. R दुग्धे। U दुग्ध। ६४ R Omits it. ६५ B, K, M, U गत्वान्यत्र। ६६ B, K मुदा। ६७ R तन्निशमयं। B मुत्तमं. R Omit it. प ६८ B एकभागादिकं। ६९ U कुर्वाणां च यथामं। ७० B. R तु संपधाय। ७१ B, R सा। ७२ B सुरदुर्लभम्। ७३ K. R तयान्वितं। ७४ B, K. M. R. U जामठ। ७५ B संपध्यमाने। ७६ B, M, R, U अपि नृपोत्तम। १ After sl. 76a. the following verses are present in B, K, M. R. U -

पशुदुग्धविकारोऽयं गंटिकानामकं स्तुतम्।
सितामरिचकर्पूरक्षोदजर्जरितं चरेत्।
तादृशं चैव नैवेद्यं दद्यादेत्यारये नृप।
दशप्रकारपूजनां धृतपक्वं मनोरमम्।।
ददा तृतीयपूजायां विष्णवेति सहिष्णवेक।
ततश्चतुर्थपूजायां यन्नैवेद्यं नृपोत्तम।

(क) The Variant in K, R, पि०, पद ज्ञ स्मृतं and विष्णवे च स जिष्णवे।

७७ B तथा। ७८ B, K, M. R, U चं च। ७९ B दद्या श्री; K, M दद्यात् श्री। ८० B. K. M, U तदा। ८१ B, K पूजायां। ८२ U, U यत् स्मृतं। ८३ B, K देकमुत्तमम्। ८४ B. K. U संकुलं। ८५ K, M दघान्मुर। ८६ B, K मुदा। ८७ B, K युग्मकम्। ८८ B.K जीरकाद् दूयं। ८९ B, K, M, U कुलोत्तमम्। ९० B आमठं। ९१ B, K, R चापि। ९२ R योक्ष्य। ९३ B. K, M, R. U दिव्ये। ९४ R पूजां। ९५ B. K. R. U रचयेत् Mपंचमार्जने, शर्करापाकयोगतः M Omits sls. 91-93. ९६ B. K. U आमठं, K. U मामठं। ९७ B. K, R चवि। ९८ B, K यक्ता च। ९९ B, K, U तदुदापयेत्। १०० B. K, U पूजासा। १०१ M बक्तुं। १०२ B, K, U काय्र्य After sl. 100a. the following verse is present in B, M, R -

पाकार्थ नूतन्ं गात्रैः प्रतिकालं रमापतेः।

१०३ B, K, M . R हास्यं नाने, U हाय्र्य नाल्पे। १०४ R र्जले। १०५ B, K. M, R अत्रैव। १०६ B. R. U प्रीतोऽपि १०७ B कुलान्वितं। १०८ B. K. M. R. U नृप। १०९ After sl. 107a. the following verses are present in B, K, M, R. U -

वाद्ये चेत्तद्युतु नैवेद्यं पिशाचाराक्षसास्तथा।
यातुधानाद्यते सर्वेकूरकर्माण एव हि।।
हरिष्यनित यतोत्भूप तद्रसं नात्र संशयः।
अतो मण्डलमध्येऽपि रक्षणीयं प्रयत्नतः।।
मध्याह्नसमये दद्यात्तप्तान्नं विष्णवे नृप।
प्रातः सायं च नो दद्यात्कदपि केटभारये।।

The Variant in M - यतोन्नं भूप, in K- यतो भूप, in U जगतो। १०९ B, K, M, R कालीय। १०२ K तस्मात्। १०३ R रूप। १०४ K चेद्। १०५ B, K, U संपादित यदा। Mss. B, K, M, R. U omit sl. 110a. १०६ B, K, M, R, U ष्वेत। १०७ R नियोजयेत्। १०८ B, K, M. R. U Omit च। १०९ K, R जगति, U जगती,J जगदीशी तु। Sls. 111 and 112 are absent in J. Before sl. 113, सूत उवाच १ is presnt in 110 J द्विजशार्दूला। १११ J द्विजसत्तमाः, B चे नृपोत्तम, sl. 116 is absent in J. ११२ L देव। ११३ J. L यज्ञास्तपांसि विप्रेन्द्र, B यज्ञस्तपांसि राजेन्द। ११४ B. J. L तेन्नैव, ११५ B. L विमुक्तेन। ११६ K भूपसत्तम्। ११७ B. K तदन्ना। ११८ K शनतो, B शततो। ११९ M सुशीति। १२० B. K. M. R. U शता नृप, J शतं तथा, L शतान्तथा। १२१ J सहस्त्रयं। १२२ J शतं। १२३ P तत्रोपवसतो, U यत्रोपवासते, J. L ब्रतोपवासतो विप्रा। १२४ J तदा। Ms. J OMits sls. 118b-121a. L OMits 120 and 121a. 125 P तत्तत् फलमवाप्नोति। १२६ J. L प्राप्तमात्रं। १२७ B. K. R, U चाश्श्नीयात्, M भक्षयात्, J तदाशिनयात्। Ms. L reads sl. 119a as follows -

जगन्नाथस्य नैवेद्यं येन भुक्तं सुपावनम्।

Ms. L reads sl. 123b as follows -

एवमुक्तं महेशेन पार्वती प्रति भो द्विजा।

१२८ M नृपसत्तम। १२९ B महात्मं। १३० B स्व्यं। १३१ B. K विभक्तितः। १३२ B स्थिते K स्थितो। १३३ M कालार्ग। १३४ B महीयत्। १३५ J पुनः पुनः। १३६ B दीर्शनतः। १३७ B मक्कोशात् सत्यं। १३८ M पाचिता J याचिका १३९ L च प्रभुरव्ययः। १४० B, k देव निलये L देव निचय। १४१ M पूर्ववत्। J OMits 127-132a. 133b, Ms. L omits 127-128a and 135c, d. after sl. 135b. Ms. L adds -

क्षेत्रोत्तमे किल वसन् परमासगह
श्रीदारब्रह्म जगदीशकृतावतारः।
इति श्रीक्षेत्रहात्म्ये नीलाद्रिमहोदयः समाप्तः।

एकादशोऽध्यायः

ब्रह्मान् कानिफलान्येव कानि मूलानि वा पुनः।
कीदृक् प्रपानकं देयं दधि कीदृक् तथार्द्रकम्[1] ।।१।।
किन्यद् द्रव्यमायचर्श किं वा देयं मुरारये।
के रुपेण वा विष्णुः प्रीतः स्यान्मद्वताशु[2] मम्।।२।।

ब्रह्मोवाच

विष्णुर्योय च यद् द्रव्यं यन्मूलं यत्फलं नृप।
तद्वदामि महीनाथ निशामय समाहितः।।३।।
रम्माफलानि दिव्यानि[3] परिपक्वानि विष्णवे।
अपक्वं[4] च सदा भक्त्या दद्याच्च निारिकेलकम्।।४।।
फलमाम्रं तथा दद्यात्पक्वं वाऽपक्वमेव वा।
पनसा[5] ह्ययमेव च तथा तालपफलं पुनः।।५।।
दाडीम्बपफलमादेयं[6] नागरंगफलं तथा।
बदरीफलकं[7] चेव कर्कटीफलकं तथा[8]।।६।।
दद्याद् भक्तियुतो राजन् जलजं शृङ्ि प्रकाफलम्।
गुवाकफलमादेय पयः पेटी[9] चयं पुनः[10]।।७।।
द्राक्षाफलानि रम्याणि दद्यादिक्षुचयं नृप।
कन्दमूलानि रम्याणि कमलाफल उत्तमम्।।८।।
लाजानां नारिकेलानां दुग्धशर्करयोस्तथा।
शर्कराश्च११ तथा दद्याद् दिव्यांश्च नृपसत्तम।।६।।
भर्जितं शर्करापक्वं चणकं चारु सोहिलकम[12]।
नारिकेलार्द्रयुतं शिलाचूर्ण समन्तिम्।।१०।।
धौतमुद्गां च तदद्यत् दामोदरमुदे नृप।
दद्यान्मुरारये भक्त्या तिलमोदकमुत्तमम्।।११।।
एतानि फलमूलानि संस्कृत्य बीक्षणादिना।
निवेदयामि मन्त्रेण पूजकोऽपि समर्पयेत्।।१२।।
पंचाहुतं[13] न क१य्र्याद्येः केलं च समर्पणम्।
आर्द्रकस्य च दध्नश्च[14] मातुलंगफलसय[15] च।।१३।।
लवणस्य जलसयापि न च कृर्यात्समर्पणम्।
लोभाद्वा[16] पूजकेनापि समर्प्य चेन्नृपोत्तम।।१४।।
तत्सर्व राक्षसेग्र्राह्यं नौ[17] गृह्णाति न [18] तद्धरिः।
तद्दोपतः पूजकोऽसौ राक्षसः स्यादसंशयम्।।१५।।
ततो भक्त्या केशवाय पंक्तिमध्ये नृपोत्तम।

अन्नसंयोगि[१९] तद्दद्यात्परत्र हितकाम्यया।।१९।।
जलं द्विभागं विमलमेकभागं[२०] सितां[२१] पुनः।
आमिक्षा दुग्धसारं च पक्वरम्भाफलानि च ।।१७।।
एतत्सर्व त्वेकमागं सर्वमेकत्र भाजने।
सम्यक् तन्मेलनं कृत्वा तत्र कर्पूरचूर्णकम्।।१८।।
करीचक्षेदनिचयं निक्षिप्यां[२२] क्षितिपोत्तम।
दद्यादभृतकुण्डं च पाककार[२३] विनिर्मितम्[२४]।।१९।।
पंक्तिमध्येऽपि[२५] दातव्यं नान्यत्रापि कदाचन।
पक्वाम्रफलजालानां रसं तावत् परिष्कद्तम्।।२०।।
पनसानां तथा दिव्यं सं दुग्धसमन्वितम्।
तथैव पाकाकारोऽसौ पंक्तिमध्ये हि योजयेत्।
नान्यत्र नृपतिः२६ कुर्याद्२७ विष्णवे च कदाचन।।२१।।
पाकशालां विना कोऽपि किंचिदनयत्र[२८] सत्तम।
न कुर्याद विष्णुनैवेद्यं धृताग्निपरियोगतः।।२२।।
तथा जलाग्निसंयोगो[२९] न दद्यात्तच्च[३०] विष्णवे।
अथोपचारपात्राणां दिव्यस्था[३१] यादृशी भवेत्।
तन्निशामय तत्क्षिप्रं वदतो मे नृपोत्तम।।२३।।
आसनादुपचारणां प्रत्येकं रविसंख्यकान्[३२]।
फलं तसयाप्यभावेऽपि[३३] ततो नूनं न च क्वचित्।
स्नानोपचारपात्रं स्याद्[३५] दश दूयं पलं नृप।।२५।।
तदभावे[३६] तदर्द्ध स्यात्तस्याभावे तदर्द्धकम्।
धूपदीपतयोः[३७] पात्रं कलापलसमन्वितम्।।२६।।
तदभावे चाष्टपलं[३८] तदभावे चतुःपलम्।
बर्तुलं धूपपात्रं सयानमृण्साल ग्राम्यनिसंयुतम्।।२७।।
पदमाकारं च दीपस्य पात्रं स्याद्धरणीपते[३९]।
कर्णिकादलसंयुक्तमष्टपत्रं[४०] मनोहरम्[४१]।।२८।।
अथवा सप्तपत्राढयं[४२] पंचपत्रमथापि[४३] वा।
मृणालग्रन्थिसंयुक्तं यतसतुष्टो भवेद् भुवि[४४]।।२९।।
वर्तुलाकारपादस्यात्फलुगुलसमायितम्[४५]।
एवं धूस्य दीपस्य पात्रं स्यात्ध्ररणीपते।।३०।।
जलपात्रं भवेत्तवत्कलापलविनिर्मितम्।
नाधिकं चैव नौ नूनमन्यथा निष्फलं भवेत्।।३१।।
जलनिर्गमनाथ वै हृयुदूरे नालसंयुतम्।

तन्नालोपरि चक्रं च कुय्र्यात्पंकजमेव[४६] वा।।३२।।
हत्येवं जलपात्रं च प्रत्येकं[४७] भक्तिभावतः।
प्रसूनभाजनं चेव[४८] कर्तव्यं नृपसत्तम।।३३।।
दशद्द्व्यपलेः कृप्तमेकागुलसमुच्छ्रितम्[४६]।
अष्टादर्शेगुलेस्तसवतसमन्ताद् विस्तृतिस्फुटम्।।३४।।
नैवद्यभाजनं कुर्यासहस्रपलसम्मितम्।
मनोज्ञं वर्तुलाकारं स चक्रोपरि राजितम्।।३५।।
महायतिद्युतं राजन् रविमण्डलभास्वरम्।
एवंविधं महीनाथ भोजनार्थ च भाजनम्।।३६।।
कर्तव्यं कमलाभर्तुः प्रीतिवर्द्धनकारकम्।
शंकाघरं तथा कुयर्यात् त्रिपाद परिशोणितम्।।३७।।
वेदाङगुलिन्नतियुतं सप्तधातु विनिर्मितम्।
चतुरंगंलमानेन समनतात् वतुर्लामतिम्।।३८।।
घण्टां कुर्यर्यान्महाराज देव दवार्चने तदा।
द्वात्रिंशत्पलसम्भूतां तत्पिण्डं चतुरंगुलम्।।४०।।
कुयर्यात्तथैव तद् देध्र्य तज्जिह्वां चतुरंगुलम्।
कुर्याद् वेदांगुल दण्डं कण्ठः स्याद्रंगुलार्द्धकः।।४१।।
तद्दण्डी परि सत्पीठं कुर्यात्कण्ठप्रमाणतः।
तत्रैव स्थापयेद्रूपं[५१] गारुडं[५२] तद्भावतः।।४२।।
चक्रं च हरिपूजायामेवं[५३] घण्टां[५४] नियोजयेत्।
अथ पूजावसानेऽपि नानारत्नविनिर्मिते।।४३।।
पात्रे पवित्रे ताम्बूलं मुजुलं क्रमुकान्वितम्।
लवंगजातिकायाश्च फलयुक्तं तथा नृप।।४४।।
एलाफलसमायुक्तं कर्पूरक्षोदमिरितम्।
दद्यात् प्रीतियुतः श्रीमान कमलापतये तदा।।४५।।
पाकद्रव्येषु ताम्बूलं नारिक्षिपेच्च कदाचन।
पाकशालान्तरे[५५] राजंस्तननमानि[५६] न धारयेत्।।४६।।
यतो वे भोजनसयानते ताम्बूलानां समर्पणम्।
भोजनप्राक्[५७] तस्य नाम[५८] धारणे रोषमाक् विभुः।।४७।।
तत्प्रात्राणां यदा भूपच्छिद्रं च सफोटकं[५६] तदा[६०]।
अयोग्यं विष्णुपूजायां नूतनं ततु कारयेत्।।४८।।
नैवेद्ये पाकभवनान्मीयमनानेऽपि[६१] शोभने।
न पतेत् कस्यचिद्दृष्टिस्तत्र तावच्चरेन्नृप[६२]।।४६।।

रविचन्द्रमसोः पावान् सयर्येशच तत्र ।
तदाछादवकं कृत्वा विष्णुप्रीतिं च वर्द्धयेत्।।५०।।
इत्थिं प्रकारतो भूप विष्णोस्तस्य परात्मनः।
नीतिर्मवेच्च नीलाद्रौ त्वत् प्रोत्यर्थ[६३] प्रकाशितम्।।५१।।
विष्णुपूजासु राजर्षे यद्युक्तं च मयाधुनाम्।
कर्तव्यं भाविता तद्वे प्रत्यहं भक्तिभावतः।।५२।।
कर्तव्यं च[६४] तदा विष्णुनि[६५] प्रीतोऽपि कदाचन।
देवा प्रमादापुरतो देवदेवस्य भूपते।।५३।।
विकृतो आयमानायां यद्भावे तद्वदामयहम्।
देवाग्रतो द्वारपालद् दूय र्य्यन्त मन्तरा।।५४।।
उत्सर्गो वा बमिवर्मचिकसय मूढमतेर्यदि।
जायेते नृपते तावद् वाससा छादसेद्धरिम्।।५५।।
ततः शीघ्रं शोधयित्वा गोमयोदकसेचनम्।
पाएषाणच्छेदनं कुर्यात्सुधारसविलेपनम्६६।।५६।।
भूयो भूयो गन्थजलैर्धोत्व्यं धूपयेत्ततः।
सुगन्धवस्तुना[६७] शीघ्रं पूर्वत्स्नापयेद्धरिम्।।५७।।
हयर्यर्थ गन्धपुष्पाणि संसिथतानि च[६८] यानि वे।
विष्णोरयोग्यभूतानि सर्वाणि[६९] प्रक्षिपेद्[७०] बहिः।।५८।।
द्वारपालद्वयस्याग्रे कुत्रचित् विकृतिर्भवेत्।
तच्छोधयेद् दुतं भूप गोमयोदकसेचनम्।।५९।।
सुधारसेयच सेलिप्य संस्रेश्च[७१] प्रकल्पयेत्।
अज्ञातं विकृतो मार्गे नयेच्चेद्[७२] वेधसंनिधिम्।।६०।।
नैवेद्यं तत्र संन्यस्य ज्ञज्ञयेत[७३] विकृतिः[७४] पुनः।
तन्नैवेद्यं बहिः कुर्यानमहास्नानं समाचरेत्।।६१।।
स्वयं स्नात्वा शुद्धतमे मार्गे नैवेद्यमानयेत्।
जाते भूप यदा भूयो गमने विकृतिं पुनः।।६२।।
जातं पाकगृहे यचच तत्सर्व च बहिः क्षिपेत्।
स्नात्वा पुनः शुचिभूर्त्वा नूतनं पाकमुत्तमम्।।६३।।
कृत्वा नैवेद्यमानेयं[७६] अन्यथा रोरचं ब्रजेत्।
वेनतेयस्य[७७] पृष्ठेऽपि नैवेद्ये भोगमण्डपे।।६४।।
स्थिते यदा देवतोऽपि जायते विकृतिर्नृप।
तन्मदेयं[७८] च नैवेद्यं केशवाय न दापयेत्।।६५।।
देवनेद्ययोमध्ये विकृतिर्यदि जायते।

अयोग्यं तच्च नैवेद्यं केशवाय न दापयेत्।।६६।।
लोभासक्तः पूजकोऽपि[८१] यदा तस्स समर्पणम्।
कुर्यात्तद् राक्षसेर्ग्राह्यं देवो रुष्टो नसंशयः।।६७।।
स पूजको राक्षसः स्यान्मरकं प्रतिपाद्यते।
तत्राधिकरणिः सर्वे[८२] पच्यन्ते रारवे धृवम्।।६८।।
एतच्छुत्वा प्रतिनिधि य देव नृपसत्तम्।
ततः प्रदामयेततु हरये विकृते सति।।६९।।
तदा प्रतिनिधिर्भूप पूजकश्च नरोत्तम।
निरये पच्यमानास्ते यावदाचन्द्रतारकम्।।७०।।
तस्मात्संयतचितास्ते भजेयुः पूजनं हरेः।
राजा तत्र मनो दत्तवा सावधानो भवेद् सदा।।७१।।
ततः प्रतिनिधिस्ताब्रद्राज्ञः कल्याणहेतवे।
सर्वदा सावधानः स्याद्[८६] विष्णुपूजासु तत्परः[८७]।।७२।।

सूत उवाच

इत्येवं चरितं विष्णोर्नैवेद्यस्य च निर्ण्र्णीतम्[८८]।
इन्द्रद्युम्नस्य भूपस्य पुरतः पद्मयोनिना।।७३।।
पूर्व जेमिनिना पृष्टं व्यासेनोक्तं मुनीश्वराः।
इदानीं कथतं विप्रा युष्पाकं पुरतो रहेः।।७४।।
चरितं परमं पूतं नीलाचलपतेः प्रभोः।
इन्द्रद्युम्नेन तेनेव यत् पृष्टं च पुनर्द्विजाः।।७५।।
ब्रह्माणा कथते यच्च तद्वदामि च साम्प्रतम्।।७६।।

ब्रह्मोवाच

स्पृशेत्कोऽपि द्विंजो राजन् विना स्पर्शाधिकारिभिः।
विष्धुं महाभिषेकेण ज्ञनापयेदतिभक्तितः।।७७।।
क्षत्रियश्च यदा वेश्यः शूद्रश्च देवतः स्पृशेत्।
तदा चरेन्महास्नानं द्विगुणं क्रमशो हरेः।।७८।।
देवे क्षत्रियसंस्पृष्टे महास्नानं द्वयं भवेत्।
वैश्येर्वारत्रयं शूद्रेश्चतुर्वारं तदाचरेत्।।७९।।
पूजायां जलपात्रं चे ब्राह्मणं च विना नृप।
न स्पृशेत् कोऽपि तत्पात्रं तत्र यत्नं महत् कुरू।।८०।।
न च सोऽपि स्पृशेत् राजन् चेत् प्रसादकरस्तथा[९०]।
स्पृशेत् यदा च तत्पात्रं अग्नो दग्वाध[९१] मार्जयेत्।।८१।।
पूजायां जगदीशस्यत्वन्मयास्यप्सु दृष्कृतम्।

पाककारं[६२] विना विप्राः पाकद्रव्य[६३] निवेदनात्[६४] ।।८२।।
पात्रहोतादूयः पूर्व न स्वृशेयुः कदाचन।
स्पृष्टं तच्च भवेतावद् योग्यं जायते ध्रुवम्।।८३।।
आचाय्र्येण तु[६५] संस्पृष्टे नैवेद्ये विष्णुसोख्यदे।
दोषाद्दोषो न विद्येते तद्देयं विष्णवे मुदा।।८४।।
विश्वावसोरन्वयजैर्मनुजेः जगतांपतो।
स्पृष्टे सामान्यविधिना स्नापयद् विष्णुमव्ययम्।।८५।।
स्पृष्टे हरौ नृपश्रेष्ठ विद्यापतिकुलोद्भवेः।
तत्र दोषो न कश्चिद् यत्वनिष्ठात्पूजकस्य[६५] ते।।८६।।
सावधानोऽत्र विषये राजा स्यादतिभक्तितः।
सुखमारोग्यमेश्वर्य भूक्ते नरपतिः स्वयम्।।८७।।
इत्येवं भवतामग्रे नीलावचलनिवानिः।
हरेः प्रंस्राचचरितं कथितं तद् द्विजोत्तमाः।।८८।।
व्यासजेमिननोः पूर्व सम्वादे च मया श्रुतम्।
इन्द्रद्युम्नं च राजनं विधिना प्रतिभाषितम्।।८९।।
कथितं वः पुरस्तद्वे किमन्यः श्रोतुमिच्छति।।९०।।

सूत उवाच

तुर्यास्याननपंकजाद्रिगलितं रम्यं वचः सादरम्।
श्रुत्वा हृष्टतरोऽथ भूपतिवरो जातो कृतार्थिः सदा।। (९१)
वाग्[६६] विस्फुदुत्सवस्य परया सुश्रुषया भूयो द्विजा।।९२।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमाहात्म्ये
एकादशोऽध्यायः।

FOOTNOTES

Before sl. 1 इन्द्रद्युम्न उवाच is present in B. K. M. R. U . १ B तथार्द्रकं। २ B तदाशुमां। ३ K द्रव्याणि। ४B. K, M, R उपथ्वतिः। ५ . M, R पनसद्पय, U पनसूय, K पनसद्वय। ६K. M, R, U दाडिमी। ७ B. K. R, U बदरीफलवृन्दं च, M बदरीफलकं दं च। ८B, K, M, R, U फलमेव च। ९B, K, R पेटीं तथा, Mपेटीं चरुं। १० K. R नृप, M, U तथा। ११ B, K, M, R. U विकारांश्च। १२ B. K. U सोलकं। १३K. U पंचाहुतिं। १४ B दध्नाश्च। १५ B मातुलांग। १६ B, K, U लोमिना। १७ B. K. न। १८ K, M, R. U च। १९ B. K, M. R संगेऽपि, U संयोगेऽपि। २० B विमलं। २१ B. K शिताः। २२ B. K, R निक्षिप्य। २३ B पाकार। २४ B विनर्मित। २५ B. K. M. R, U मध्ये हि। २६ B, K, M, R, U नृपते। २७ K, M. R. U दद्याद्, B दद्या। २८ B किंचिदत्र। २९ B, K, M, R. U संयोगा। ३० B, K, M.

R. U तु। ३१ B. K. M. U व्यवस्था। ३२ B. U त। ३३ R संख्या। ३४ M भावेऽपि। ३५ M. R पलमात्रं च। U फलमात्रं च। ३६ M स्यादिप। R. K स्यादप। ३७ M. R तदभावेऽपि। ३८ K. R दीपकयोः। ३९ M पलकं। U फल। ४० K. M. R तस्याभावे। ४१ B. K. M. R. U स्यान्नृपसत्तम्। ४२ B दल। ४२ B मनोरमं। ४३ B. K. R षष्ठपत्राढंयं। ४४ B. K. R चाष्टपर्ण्णत्वदूं, U षष्ठ पर्णाढयं। ४५ B. K पंच पर्ण, M. R पंचवर्ण्ण। ४६ B. K. R भवेद् विमुः। ४७ B. K. R पादं च। U पात्रं स्या, U स्या। ४८ B. K. M. R. U कर्तव्यं। ४९ B. K. M. R. U द्विव्यं। ५० B. K. M. R. U समुन्नतं। R समन्वितं।

हंसांक नोदर सहोदर पीनदेहो निर्मृष्टविपुलाग्रनालः
शंखामितोऽर्ध्वविधये स च चेदसव्या वर्तो
यशः पशुधनध१र्य करोति मूल्यः।
त्वं हीर सागरोत्पन्नं विष्णुना विध१तः करे।
निर्मितं सवैद्रतत्स्वं पांचजन्य नमोऽस्तु ते।।
गमौदेवारि नारीणां विद्रवन्ति सहस्रधा।
तव नादेनि पाताले पांचजन्य नमोऽस्तु ते।।

५२ B. K. U तत्र, B. Omits sl. 41 . ५३ K. R. U भूप। ५४ B. U गरूडं। ५४ B. K. M. R मेवं। ५५ B. K. M. R पंक्तो। ५६ B राजन्। ५७ B तन्ना। ५७ B प्रत्यक्त। ५८ K. R तन्नाम। ५९ B. K. R. U स्फोटनं। ६० B तथा। ६१ B पी। ६२ R तावतरे। ६३ B. K. R. U प्रीत्येदं। ६४ K. U चे। ६५ M विष्णुर्न।

ऊनोधिकं न कर्तव्यं नूनं चात्र तथा नृप।

The varient in U -ईतोऽधिकं। ६६ B विलेपयेत्। ६७ B सुगन्ध्विारिणा, B सुगन्धिना जले,K, R सुगन्धिवारिणा। ६८ B न। ६९ B भूतानि वे सर्वाणि, K. M भूतानि तानि सर्वाणि, R भूतानां ७० B प्रक्षिपेत्, K. M, R; U प्रंक्षिपेत्। ७१ B. K. M. R. U संस्कारं। तोनि सर्वाणि ७२ K. M. R नयेच्चे देव। ७३ M जायेते, K. R ज्ञायते। ७४ R विकृतो, B विकृति। ७५ B जैन। R. U जानम्। K यान् यान्। ७६ B. K. R. U मादेयं। ७७ B. K. R. U वैनतेयस्य। ७७ K. R तन्नेवेद्यं। ७८ R न देयं, B न देयं। ७९ B. K विरूणवेन। ८० R नैवेद्यये। ८१ B. K. M. R. U पूजकोऽसौ। ८२ B कारणः। BSLS. 69 AND 70 are absent in B, K, M, R, U ८३ पूजने। ८४ B स्या। ८५ B. K. R सत्वरः। ८६ M निर्ण्णयं। ८७ B जेर्मुनिना। ८८ K. M. R. U स्तदा। ८९ K. M. R. U दग्धा च। U दग्दत्वा, K दगधाथ। ९० R पाकारं। ९१ K. R पाकद्रव्यं। ९२ R निवेदयेत्। ९३ B. K. M. R च। ९४ K. M. R संस्पृष्टे। ९५ B यत्कनिष्ठः पेजनस्य ते, R यत् कनियः पूजस्यते, K यत् कनिष्ठः पेजकस्य ते। ९६ sl. 88 is absent in B. K. M< R. U. Mss. B, K< M< R, U Omit 89 and 90.

चतुर्मुखाम्बुर्जध्रिगलितं रम्यं वचः सादरं

९७ K. M. U वागृदिस्फूर।

द्वादशोऽध्यायः

इन्द्रद्युम्न उवाच

ब्रह्मन् सप्तसु वारेषु तिथिष्वपि प्रजापते।
नक्षत्रेषु च तद्विष्णोः कुत्रं किं वाधकं[1] भवेत्।।१।।
तद्वदाशु सुरश्रेष्ठ सर्वज्ञस्त्वं यतोऽधुना।।२।।
ब्रह्मोवाच
साधु साधु नुपश्रेष्ठ त्वमेव[2] वेष्णवोत्तम।
यतो नीलाद्रिनाथस्य चरितश्रवणोद्यतः।।३।।
कथयामि रहस्यं ते विष्णोः पण्डितवासरे।
शृणु तावद् यथालेख्य कर्म स्याज्जगतांपतेः।।४।।
तस्मिन् मध्याह्नपूजान्ते यत्र तत्र सथले पुनः।
स्वस्व वर्ण[3] मनोहारि चित्रं कुर्याच्च चित्रवित्।।५।।
कोऽपि नालोकयत्वस्मिन् काले कालस्वरुपिणम्।
विष्णुं वा मलभद्रं वा भद्रां वाथ शुभप्रदाम्।।६।।
चित्रां ते च ततो विप्रास्त्वचार्यो विधिवत्पुनः।
पंचाभृतेन तेनैव स्नापयेत् विष्णुभव्यम्।।७।।
दध्ना दशपलेनेव कुर्यात्पंचपलं पयः।
चतुःपलं मधु राजन्[4] धृतं त्रिपलमेव च।।८।।
शर्कररेकपला दिव्या सर्वमेकत्र भाजने।
कृत्वा तेनैव सम्प्राप्य[5] प्रतिबिम्बे हरेस्तथा।।६।।
पण्डिता तु दिने विर्ष्णोर्भोग लालसंचेतसः।
चेष्टेयं जायते राजन् विष्णोश्च प्रीतिवर्धिनी[6]।।१०।।
ततो गूरोर्दिने प्रातः पूजान्ते कमलांस्तथा[7]।
विद्याधात्री च प्रत्यर्चा धाता[8] च वारिणा पृथक्।।११।।
संसनाप्य तामलंकृत्य[9] पूजयेच्च यथाविधि।।१२।।
ततो वन्दापनां कृत्वा स्वपदे च[11] न्यसेद् पुनः।
ततः सायाह्नपूजान्ते प्रत्यर्चा च हरेः पुरः।।१३।।
आनीय दद्याल्लक्ष्मीं च[12] हयाज्ञा माल्या पृथक् तदा।
आज्ञां देहि जगन्नाथ देव देव जनार्दन।।१४।।
एकान्त क्रीडानायार्थ प्रत्यर्चा च रमा प्रभो।
इति सम्प्राधर्य देवेशं तदापर्य्यो हरेस्तनोः।।१५।।
दक्षिणाद्वामतो मालामर्पयेत्कृष्णमन्दिराम्।

लक्ष्मी च पुरतः कृत्वा प्रत्यर्चा च ततः परम्।।१६।।
आनीय दिव्ययानेऽपि संस्थाप्य भ्रामयेच्डनैः।
श्वेतछत्रादिकं राजन् धारयेच्च ततः[१३] पुरः।।१७।।
घण्टामधुरिकादीनां वाघानां नदतां स्वरैः।
महोत्सवं[१४] कारयित्वा जयनिः श्वनसंयुत्तम्।।१८।।
प्रासांदं परमं विष्णे[१५] भ्रामयित्वा पुनः शुभे।
सथाने कुत्रापि संस्थाप्य निर्जने क्षणमात्रतः।।१६।।
पंचोपचारविधिना पूजयेच्च पृथक् पृथक्[१६]।
पूजासमयमारम्य गीत नृत्यं भसवेतदा।।२०।।
वन्दापनां[१७] विधि कृत्वा स्थापयेत्स्वपदे पुनः।
बृहस्पतिदिनेष्वेवं विष्णोस्तस्योत्सवं महत्[१८]।।२१।।
केवलं न भवेदेवमेकादश्यां गुरोर्दिने।
जनमकल्पनमारभ्य राक्षसानां वधाविधि।।२२।।
तथैव न भवेन्नक्तं गुरुवासर पूजनम्।
तथैव नृपते स्नानाद् गुण्डिचा अविध[१९] प्रभो।।२३।।
दिवा नवतं न कुर्याद्ध गुरुवासरपूजनम्।
तेनैव कुर्यादत्ये तत्कथितं ब्रह्माणा पुरा।।२४।।
इन्द्रद्युम्नं प्रति नृपं प्रवृत्तोऽयं विधिस्ततः२०।
इत्येवं श्रीभगवतो वारे पूजननिर्णयम्।।२५।।
कथयित्वा तिथिष्वेव यद् भवेत्तद्वदाम्यहम्।
अधेदानीं नृपश्रेष्ठ पावने च हरेर्दिने।।२६।।
सायाह्ने जगदीशं तु लेपयेच्च चतुःसमैः।
आसनादिसमाचार्येंड[२१] गे भक्तिभावतः।।२७।।
अग्निशर्मा बलं तावद्भद्रां ब्रह्मापि लेपयेत्।
ततस्तु पूजकः श्रीमान् प्रार्थयेज्जगदीश्वरम्।।२८।।
नमस्तुम्यं जगन्नाथ भक्तनुग्रहकारक।
आज्ञां देहि महाबाहो बहिरत्सर्वहेतवे।।२६।।
इत्युच्चार्य नमस्कृत्वा[२२] भक्तिभावनन्वितः।
आचाय्र्यो जगदीशस्य माल्यं दक्षिणमाभागतः।।३०।।
आनीय दद्या प्रत्यर्चा प्रतिभूपतिसत्तम।
सिंहासनात्पुनस्तं च हयाशमाल्यविभूषितम्।।३१।।
शिविकोपरि संस्थाप्य भूषयेछत्रचामरैः।
घण्टामद्दलशंखानां[२३] काहालस्य च निःस्वनै।।३२।।

सेवकेरखिलैः स्रावद्वेष्टितं सज्जनेस्तथा।
भ्रामयेदेकवारं च प्रासादं जगतीपतेः।।३३।।
गीते नृत्ये गायमानेद्वारपालान्तिके पुनः।
संस्थाप्य पूजयेद् भक्त्या वाय्!र्यः पंचोपचारतः।।३४।।
कर्पूरवर्तिभिः कुय्र्यान्नीराजनमनृत्तमम्।
ततो दूर्वाक्षतान् दत्त्वा सप्तवर्त्या नृपोत्तम्।।३५।।
नीराजयेत्ततस्तं वे स्वपदेऽपि नवेशयेत्।
सायं पूजावसानेऽथ महानीराजनात्परम्।।३६।।
पुनर्नीराजनं कुर्यान्नीलशैलपतेः प्रभोः।
स्वर्णपात्रे पवित्रे च सर्पिषा पेरपूरिते।।३७।।
रम्भापत्रेन्धने तत्र सूक्षमवस्त्रां[२४] च ते पुनः।
नीराजनं च कर्तव्यमेवं कुय्र्याद्विचक्षणः।।३८।।
एतन्नीराजनं कृत्वा धृताचाय्र्यो सह बहिर्गतः।
प्रासादभ्रमणं कृत्वा चक्रं चैवानुदर्शयेत्।।३६।।
तेनाग्निना ततो दीपं[२५] प्रसादोपरि सर्वतः।
दर्शयेच्चन्द्रदीपं च सर्यस्मिंश्च हरेर्दिने।।४०।।
तन्नीराजनजं तेजः पश्यता पापनाशनम्।
तस्मान्नृपतिशार्दूल पश्येत् वेकृण्ठलब्धये।।४१।।
एकादश्यां तिथौ तावद्गाप्यते[२६] निवसेद्[२७] यदि।
तदा तृतीयपूजान्ते भगतन्तं जनार्दनम्।।४२।।
पंचाभृतेन संस्नाप्य सर्वागे लेपयेत्ततः।
दिव्यगन्धादिकं तावद् भूषयेन्माल्यभूषणेः।।४३।।
ततयचतुर्थपूजा च कुय्र्यात्सदुपाचरकेः[२८]।
लक्ष्मीं तदग्रे संस्थाप्य नानालेकारभूषितम्।।४४।।
धारयेद्धवलं छत्रं शोमनं केशवान्तिके।
अग्निशर्मा तदा काले चन्दनं चारुशोभनम्[२९]।।४५।।
दिव्यं दामनकं माल्यं तथा पीताम्बरद्वयम्।
दद्यात् पंकजनाभाय भक्तियुक्तो नृपोत्तम।।४६।।
ततः कर्पूरवर्त्या च नीराजनमनुत्तमम्।
कृत्वा दूर्वाक्षतं दत्त्वा सप्तवर्त्या मनोज्ञया।।४७।।
ततो[३०] वन्दापनां कुय्र्याप्तिण्डकावर्तिभिर्बलम्[३१]।
नीराजयेतदाचाय्र्यो भद्रां ब्रह्मा नृपोत्तम्।।४८।।
तथैव विधिवद् भक्त्या तयोर्वन्दापनां चरेत्।

ततो वन्दापनान्ते च राजा पूष्पांजलिं त्रयम्।।४९।।
प्रक्षिपेदतिभक्त्या च ततः कर्पूरवर्तिभिः।
नाराजयेच्चामराणां व्यजनस्य च चालनम्।।५०।।
कृत्वा नव्यांशकयुगं धृत्वा भुवि नमेन्नृप।
ततो लक्ष्म्या निजस्थाने स्थापयेन्नृपसत्तम।।५१।।
श्वेतच्छत्रं बहिः कुर्यात्ततो देववराग्रतः।
तच्चारुचन्दनं रम्यं माल्यं वस्त्रं नृपः स्वय़म्।।५२।।
पूर्ण्णया[३२] भक्तियुक्तेऽपि कृताथोवृमिति ब्रुबन।
तदलोवर्प्याग्नशर्मा तस्यालाविऽपि पूजकः।।५३।
गुरुवासरसंयोगे यदा जाते हरेर्दिने।
एव विधिः स्यान्नृपते नीलाद्रो चक्रपाणिनः।।५४।।
चन्द्रवासरसंयोगे यदा जाते हरेर्दिने।
लोकनाथेन देवेन तदा[३३] कृष्णं समर्चयेत्।।५५।।
अमावास्या दिने विष्णोः प्रातः पूजावसानतः।
नारायणप्रतिकृती[३४] देवाग्रे स्थापयेद् बुधः।।५६।।
ततः सम्प्रार्थयेद्देवं भगकन्तं जनार्दनम्।
आज्ञापय महाबाहो तीर्थराजान्तिकं पुनः।।५७।।
समागमाय शब्दस्य प्रतयर्चा प्रति सम्प्रति।
इत्युच्चार्य[३५] देवामालां[३६] देवांगाभां[३७] समर्पयेत्।।५८।।
आदेशमालां संगृह्य दत्वा चानयतां पुनः।
महेत्तरदनोद्भूते याने दिव्ये निवेदशयेत्।।५९।।
छत्र चामरवाद्यादि स्फुरदुत्सवसंयुतम्।
पताकाकुलसंयुक्तं तीर्थराजतटं पुनः।।६०।।
स्वर्णवेत्रधरः श्रीमान् पुरो गचछन् महोत्सवम्।
तदा प्रतिनिधिः कुर्याद् गीतनृत्यादिभिर्हरेः।।६१।।
तीर्थराजोदकेस्तत्र नारायणमतः परम्।
कुशेरष्टाक्षरेणे च चार्चयेद्[३८] वे त्रिवारतः।।६२।।
ततो यमेश्वरसयापि शिवस्य निलयान्तिकम्।
नीत्वा तत्रैव संस्थाप्य पूजयेत्स्नानपूर्वकम[३९]।।६३।।
पंचोपचारविधिना पूजान्ते नृपसत्तम।
वन्दापनां ततः कुर्यर्यात् प्रासादं प्रति तं नयेत्।।६४।।
अमावस्यासु सर्वासु कुय्र्यादेवं विचक्षणः।
नेत्रोत्सवे तु नो कुय्र्यादमावास्या विधिं नृप।।६५।।

अमावस्याादिने तावज्जाते सूय्र्यग्रहे यदि।
तद्दिदेऽपि हरेसतस्य[४०] नित्यस्नानादिकर्मबित्[४१]।।६६।।
कृत्वा पाकोद्भवेः रत्नेर्विना कुर्यर्यात् प्रपूजकः[४२]।
नारिकेलस्य दुग्धस्य शितायश्च विकारजेः।।६७।।
नैवेद्यर्नृपशार्दूल प्रातः पूजां समाचरेत्।
पूजान्तेऽपि ततः कुर्यादमावसया विधिसतदा[४३]।।६८।।
आमूक्तिकालमेतस्य विष्णोस्तस्य परात्मनः।
प्रातः पूजां विना किंचिन्न कुय्र्याच्च कदाचन।।६९।।
राहूणां मुच्यभानेऽपि भास्करे नृपसत्तम।
महास्नानविधिं कृत्वा पूर्ववत् पाकसम्वैः।।७०।।
नैवेद्येस्तोषयेद् विष्णुं विधिना भक्तिभावतः।
अथ नक्षत्रसंयोगे जगदीशस्य यादृशी।।७१।।
पूजा स्यातां प्रवक्ष्यामि शृणु भूपतिसत्तम।
श्रवणारोहिणी ज्येष्ठां यदा स्याज्ज्तांपतेः।।७२।।
तदा पेजाधिका कार्यद्या राज्ञः पुष्टिविर्धिनी।
प्रातः पूजावसानेऽपि पुनः पूजार्थपादरात्।।७३।।
शितद्रव्येश्च नैवेद्यं कृत्वा देवाग्रतो न्यसेत्।
सन्निधिं प्रति प्रत्यर्चा विष्णोस्तस्य समानयेत्।।७४।।
पंचोपचारतो विष्णुं पूजयेद् भक्तिभावतः।
पेजान्ते तु तदा कार्यर्यो रोहिणीनन्दनं वक्तम्।।७५।।
नीराजयेतदा भद्रां ब्रह्मा भद्रप्रदायिनीम्।
अग्निशर्मा जगन्नाथ कर्पूरावर्तिभिर्नृप।।७६।।
तथा पूर्वाक्षतान् क्षिप्त्वा सप्तवत्त्र्या मनोज्ञया।
नीराजयेतथा प्राज्ञः पिष्ठकावर्तिभिः पृथक्।।७७।।
श्रवणानां सप्तवर्त्या बलं पिष्टवर्तिभिः।
रोहिण्यां च जगन्नाथ ज्येष्ठायां भद्रदायिनीम्।।७८।।
नीराजर्येश्च देवांस्तान् प्रार्थयेदर्चकः पुनः।
नीलाचलपते विष्णो जगन्नाथ नमोऽस्तु ते।।७९।।
प्रासादभ्रमलीलाये आज्ञापय सुरेश्वर।
इति सम्प्रथ्र्य देवेशं पूजकः सर्वतत्तववित्।।८०।।
विष्णोर्दक्षिणतो माल्यो प्रत्यर्चो परिसंन्यसेत्।
ततो वन्दापनां कृत्वा याने दिव्ये पुनर्बहिः।।८१।।
संस्थाप्योत्सवसंयुक्तं प्रासादभ्रमणं नृप।

कारयित्वा पुनर्विष्णोरग्रे चानीयतां पुनः ।।८२।।
तदेव तेज परमं संनिधाय रमापतो।
पुनस्तां स्वपदे रम्यें स्थापयेत्परमादरात्।।८३।।
यो भूपः कारयेद् विष्णोः दारुब्रह्मस्वरुपिणः
वारेषु च तिथिष्वेषु नक्षत्रेषूत्सवं परम्।।८४।।
मासि मासि द्विजश्रेष्ठ नत्यं चैवानुवत्सरमं।
सर्वयज्ञफलं प्राप्य तथा सर्वमनोरथम्।।८५
संखं भुक्त्वा क्षितौ यानते विष्णुलोकं ब्रजेत्पुनः।
कोटिकल्पावधिः श्रीमद्ंविष्णोः सारुप्यभुक्तिमाक्।।८६।।
ये पश्यनित तथा भक्त्या देवदेवं तदाऽनध।
मुक्तास्तेभ तु नमस्तेषां गर्मवासौ न विद्यते।।८७।।
सूत उवाच।
उत्येवं गदितौ व्यग्रा जेमिर्नी प्रति भो द्विजाः।
श्रुतं पुरा पुराणस्य पुरुषस्य जगत्पतेः।।८८।।
नीलाचलनिवासस्य चरितं परमाद्भूतम्।
पावनं सर्वलोकानां नवामीष्टफलप्रदम्।।८९।।
कथितं मो द्विजश्रेष्ठ गुहयं मांगल्यवर्द्धनम्।
इन्द्रद्युम्नस्य भूपस्य पृच्छतः पुरतो विधिम्।।९०।।
यदुक्तवांश्च तत्सर्व पुण्यं पापविमोचनम्।
प्रकाशितम् मया तद्वै युष्माकं पुरतोऽद्धुना।।९१।।
एतत् श्रोतुं जनो यस्तु वर्तते भक्तितत्परः।
महापापयुतेवापि मुक्तः सोऽपि भवेद् ध्रुवम्।।९२।।
श्रावयेदतिभक्त्या यश्चरितं जगतां पतेः।
सोऽपि पापविनिर्मुक्तो विष्णुलोके महीयते।।९३।।
श्रीनीलाचलनाथ चारु चरितं पुण्यं पुराणं च ये
जल्पन्ति क्षितिमण्डले भृशतरं शृण्वन्ति भक्त्याऽथवा। (९४)
लब्ध्वा शर्मपरं मनोरथतमं पुत्रपोत्रान्विताः।
सर्वे तद्धरिवेश्मकल्मषहरं शेषे गमिष्यन्ति ते।।९५।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रेमाहात्मये वारतिथिनक्षत्रपूजाप्रकाशनं नाम द्वादशोऽध्यायः।

FOOTNOTES

1 B, K, M, R वाधिकं। २ किमेव। After sl. 3, the following verses are found in K -

ततसतत् सर्वमाकर्ण्य चेन्द्रद्युम्नं महीपतिम्।
प्रत्याख्यातं ब्रह्माणा यत् शृणु ताशु समाहिताः।
विधिना विधिरिक्तोऽयं नीचाललपते द्विजा।

३K, R, U बर्ण्णे, वर्ण्णे। ४B, K, M, R, U नृप। ५B संस्नाप्य।In M त् पात्रा च वारिणा पृथक्is added after संप्राप्यin sl. 9b.। ६B बर्द्धने,R बर्द्धनी। ७B,K, M, R तथा। ८B धात्वा,M धात्रा,K, R, U धात्र्या। ९B, K, M, R, U समल। १०B, K, M, R, U प्राज्ञ। ११B, K, M, R, U षु। १२K, R च। १३B, K, M, R, U तयोः। १४M, R, U महोत्सवं। १५U विष्णो। १६B, K, M, R, U नृप। १७M, U वन्दाना। १८M, U महान्,K, R चरेत्। १९K, M, R गुण्डिचां तावधि।from sls. 24b-26a are absent in B, M, R, U. २०K ततः। २१B, K, M, R, U समाच्ययर्या। २२B नमस्कृत्या। B omits sls. 33-35a. २३ K, R, U शंखानां In M च is present after सपिषाin sl. 37.। २४B, U वस्त्रांचिते। २५B, U दीप्तं। २६B, K, U तावद्गीष्पते। २७B, K, M, R, U दिवसो २८U दुपहारकेः। २९B, K, M, R, U सौरमम्। ३०B, K, M, R, U omit ततो। ३१B कुय्र्याद्य। ३२K, R, U गृहि्नया। ३३K, R, U साध्र्ध। ३४B, U प्रतिकृतिं। ३५U हत्युच्चार्या। ३६K, U देशमालां। ३७K, M, R देवांगतां।is 59a is absent in B, K, M, R, U. ३८B, K, R, U संचयेद्। ३९K, R, U पूजयेत् स्नान। ४०M निदि। ४१B. K, M, R, U कर्म तत्। ४२B, K, R, U प्रपूजनं। ४३B. K, U विधिं तदा। ४४ १B यदास्या। ४५ १B चार्यो Ms. B reads sl. 76a as -

नीराजयेत्तथा प्राज्ञः पिष्टकाभद्रां ब्रह्मभद्रप्रदायिनीम्।

B, K, R,, omit sl. 78a. ४६B, K, M, R, U नृपसत्तम्। ४७K, M, R, U माल्यं। ४८M प्रत्यर्चा, K, M प्रत्यर्चो।४९ After dl. 81a, the following verse is present in B, K, M, r, U -

ततस्तं प्रतिमा नीत्वा द्वारपालान्तिके न्यसेत्।

५०B, K, M, R, U तत्र। ५१M योम्भपः। ५२B, R मामि मामि। ५३B, K, U नु। ५४K, M, R, U नमे तेषां। ५५B, K, M, R, U गदतो व्यासा। ५६B पुरुषस्य। ५७K, M, R, U विधिः। ५८B, U भृशतमं। ५९B तरं। ६०U भारं। ६१Mss. B,M. R. K, U Omit sls. and 93.६१ B, K, M, R, U गमिष्यन्ति। ६२M, Omits वारतिथि।

त्रयोदशोऽध्यायः

इन्द्रद्युम्न उवाच

जगन्नाथस्य निलये प्रासादद् यनादयः।
प्रविश्यन्ति यदा किं स्तात्तद्वे कथय पद्भज।।१।।
मरिष्यन्ति यदा केचिद्भवने शोभने हरेः।
तदैव किं सयाद् भो ब्रह्मन् तत्र तत्कथयाधुना।।२।।

ब्रह्मोवाच

यदा प्रमादादभवने पावने च हरेः क्वति्।
प्राकारद्देवलीं नीचो यनो यदि लंघयेत्।।३।।
तदा भवेन्महादोषः क्षीणायुर्न्पतिः भेत्।
चित्तभ्रमोऽपि नृपतेर्दशमंगो भवेंत्तदा।।४।।
प्रवेशं यवनानां च श्रुत्वा राजा स सत्वरः।
दण्ड्यार्नो दण्दो भूयात्सावधांनो भवेत्तदा।।५।।
नैवेद्यार्थ च यद् द्रव्यं पाकशालान्तरे स्थितम्।
गन्थपुष्पादिकं तापद्दव्यं वे पातयेतथा।
गोमयोदकजालेन प्रासादं क्षालयेत्ततः।
धौतव्यः सर्वथा विष्णोः प्रासादश्च समन्ततः।।८।।
पंचाभृतेन तेनैव महास्नानं पुनर्नप।
कारयित्वा यथान्यायं सावधानों भवेत्ततः।।६।।

इन्द्रद्युम्न उवाच

महास्नानविधिं विषोयचतुर्मुख वदस्व मे।
तत्र कौतूहलं चित्ते वर्तते मम सामप्रतम्।।१०।।
साधु पृष्टं महाराज महासनानविधिं हरेः।
कथयामि रहस्यं ते सावधानो यथा शृणृ।।११।।
द्विशतं पलमेव स्यात्पयसश्च तथा दधि।
शतषष्टिपलं सर्पिश्चत्वारिंशत्पलं मधु।।१२।।
शर्करा पंचविंशत्यधिकं पलश्तान्विता।
गोधूमचूर्ण्ण विदितं त्रयोदशपलं तथा।।१३।।
पुण्योदकं शतं षर्ण्णा चतुःशतकुशोदकम्।
द्वासप्तत्रिंशत तावद् ग्रन्थोदकमनुत्तमम्।।१४।।
दृव्याणां नवकानां च सहस्त्रद्वयसंख्यकान्।
पलां स्त्रिमागं कृत्वाऽथ स्थापयेत् पुरतो हरेंः।।१५।।
विष्णोराचमनार्थ च पयः पेटी त्रयं[५] त्रयम्।

पंच स्थापयेद् भक्त्या त्रयं सूक्ष्मांशुकस्य च।।१६।।
आचार्यस्य ततः पीठे चोपविश्यासनादिकम्।
दिग्बन्धनं भूतशुद्धिं प्रणवं मातृकां तथा।।१७।।
कृत्वाथ[६] विधिवत्पात्रं वारिणश्च परिष्कृतम्[७]।
तथा विधायाशु[८] पुनरर्थपात्रं परिष्कृतम्[९] ।।१८।।
दत्वा[१०] तदुदकेः क्षिप्रं मार्जयेद्देवताशिरः।
स्वमस्तकं देशिकेन्द्रः कुशेस्तदुदकं क्षिपेत्।।१९।।
स्नानीयवस्तूनां प्रोक्षण्णं मूलमन्त्रतः।
पाठसय भावनां कृत्वा तत्रटदलपद्मजम्।।२०।।
विलिख्य पद्ममुद्रां तु दर्शयेन्नृपसत्तम।
नवशक्त्यर्चनं कृत्वा कुर्यादावाहनादिकम्।।२१।।
मातृकान्यासमाकुर्यर्याद्देवतांगे यथाक्रमम्।
गन्धं पुष्पं च धूपं च दीपं च सुपरिष्कृतम्।।२२।।
मूलमन्त्रेण विप्रेन्द्रो दद्यात् श्रीपतये मुदा।
वीक्षणादिकसंस्कारं कुर्यात्सनानीयवस्तुनः।।२३।।
प्रतिबिम्बे जगननाथमर्थपात्रोदकैः परम्।
स्नापयेदथ मन्त्रेस्तेसतद्[११] द्रव्येश्च देशिकः।।२४।।
पयः पृथिव्येति मनुस्तत्रैव पयसा विभुम्।
दधित्क्रावणमन्त्रेण दध्ना च स्नापयेद् विभुम्[१२]।।२५।।
तेजोऽसीतीति[१३] मन्त्रेण धृतेन स्नापयेत्सुधीः।
मधुना मधुवातेति स्नापयेद् भक्तिभावतः।।२६।।
एवं वः कुरवो[१४] राजा मन्त्रेणानेन भो नृप।
शिताभिः स्नापयेद् देवं तदा मन्त्रविदां वरः।।२७।।
याः फलान्येन मन्त्रेण पयः पेटीजलैर्नृप।
देवायाचमनं दद्यादाकृष्णेनेति मन्त्रतः।।२८।।
गोधूमचूर्णकेसतावद् घर्षणं प्रतिबिम्बके।
आधारे कृत्रचिद् द्रव्यं संस्थाप्य प्रतिबिम्बकम्।।२९।।
बहिष्कृत्य पुनर्धोत्वा प्रत्येकं स्नापयेच्च तेः।
प्रत्येकं पृथक् दद्याज्जलधारां तदाय्र्यकः।।३०।।
पुष्पाणां कुशानां च गन्धानां यंज्जनः[१५] परम्।
समुद्रज्येष्ठामन्त्रण स्नापयेत्तज्ज्लैः पृथक्।।३१।।
मूलमन्त्रं समूच्चार्य स्नापयेद भक्तिभावतः।
सूक्ष्मनव्याम्बरेः तावत् प्रोच्छयेदतियत्नतः।।३२।।

महास्नानविधिं कृत्वा विष्णोस्तस्य यथाविधि।
पूर्ववत् पाकशालायां वैष्णवाग्नो न[१६] संहुनेत्।।३३।।
एतद्धिघेरन्यथा चेद् राजा द्रोहि हरेस्तदा।
प्रथमावरणेनापि द्वितीयावरणेऽपि वा।।३४।।
तृतीयावरणो यावज्जनो मृत्युवमापनुयात्।
पूर्वो तक्रमतो भक्त्या महास्नानादि कर्म यत्।।३५।।
तथाविधिं विधिं तावत् कुय्र्यान्नृपतिसत्तम्।
भ्रियेत ब्राह्मणो यावत्[१७] प्रासादे नैव[१८] योगतः।।३६।।
जुहुयान्मन्त्रराजेन लक्ष्म्याहूतीमरिन्दम[१९]।
सुवर्णश्च तदाचाय्र्य तोषयेद्दक्षिणार्पणात्।।३७।।
एवं महासनानविधिः विधिज्ञेर्देवसत्तमैः।
कथितः सर्वशास्त्रेषु नीलाचलपतेः प्रभोः।।३८।।
विषये कमलाभर्तुः वेगुण्यं यदि जायते।
पृष्टाचाय्र्य तदाचाय्र्य उत्सर्व नृपतिस्तदा।।३९।।
न कुय्र्याच्चेनमहादोषः सा पूजा निष्फला भवेत्।
तदभावे[२०] तदर्द्धेन तदर्द्धार्घेन वा पुनः।।४०।।
नानाविधेश्च नैवेद्येः तोषयेत् परमेश्वरम्।।४१।।

सूत उवाच

ब्रह्माणा कथ्यमानं यदिन्द्रद्युम्नो महीपतिः।
तच्छत्वा परमानन्दं भेजे[२१] भूसुरसत्तमाः।।४२।।
श्रुतिस्मृतिपुराणेषु गुप्तं यच्चरितं महत्।
नीलाचलपतेस्तद्वे ब्रह्मणा च प्रकाशितम्।।४३।।
व्यासेनेतन्मुनिवरा[२२] जैमिनिं प्रति भाषितम्।
सम्प्रत्येतन्मया तावद् वर्णितं भवतां पुरः।।४४।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये
त्रयोदशोऽध्यायः

FOOTNOTES

१ B, K, R प्रासादाद्, M यवनादय, प्रमादा यमनादयः। २ R प्रकार। ३ K, M, R यमनो। ४ B, K, R य सत्वरः। ५ B भवेत् सदा। ६ B पाकशालालये, R पाकशालाके। ७ B. K, M. R. U तावद्वरे। After sl. 10, ब्रह्मोवाच is present in B, K, M, R, U । ८ B षष्ठि। ९ B. K. R. U च्छतं, शतं। १० B त्रिशतं। ११ K फलां।

१२ K, R स्त्रयं। १३ M कृत्वा वा। १४ U परिष्कृतिं। १५ B विद्यायाशु। १६ U परिष्कृतिं। १७ B, K, M, R कृत्वा। १८ B स्तैस्तत्त। १६ B, K, R बुधः। २० B, K, R तेजोसीति M च तेजो सति। २१ B, R Omit वं। २२ B, K, R, U यज्जलं। २३ B, K, R च। २४ B याव। २५ B, K, R, U देव। २६ B, U लक्षा . sls. 37b-38 are absent in the Mss. B, K, M, R, U. sl. 40a is absent in B, K, M, R, U २७ M, U तदभवेन। २८ B भजे, K भवे। २६ U मासे। After sl. 44, the following verses are present in K-

श्रीपद्मनाममवने यवनप्रवेशे तस्मिन्।
भृतत्वविषयेषु च यां हि शुद्धिम।
श्रृत्वा जसं भवमुखानमुमुदेऽथ
भूपो यात्रोत्सवादिश्रवणे पुनरुद्यतोऽभूमत्।।

चतुर्दशोऽध्यायः

इन्द्रद्युम्नो उवाच

नमस्तेऽस्तु सुरश्रेष्ठ चतुर्मुख नमोऽस्तु ते।
त्वत् प्रसादाच्छतं सर्व नित्यपूजादिकं प्रभोः।।१।।
यदाह भगवां साक्षाद्यारवं वपुरस्थितः।
तासां विधिः कीदृशो वा यात्रास्ताः[2] कीदृशासतदा[3]।।२।।
उपवासास्तथा ब्रह्मन् बूहि सर्व महामते।।३।।

ब्रह्मोवाच

साधु साधु नृपश्रेष्ठ धन्योऽसि त्वं महीपतें[4]।
यतो नीलाद्रिसिंहस्य कथां श्रोतुं समादरः।।४।।
ज्येष्ठी[5] स्नानोत्सवं चादो कथयामि पापनाशनम्।।५।।
ज्येष्ठै मासि सिते पक्षे चतुर्दश्यां नृपोत्तम।
मध्याह्नसमयं प्राप्यं[7] त्रिकालार्च्चा समापमम्।।६।।
कृत्वा विष्णोर्मुखाम्मोजं वस्त्रेराच्छाद्य यत्नतः।
विष्णोर्निर्गमनार्थ च काष्ठसोपानकल्पनाम्।।७।।
कृत्वा मुखाम्बुजाद् वस्त्रं वहिरूकुर्यात्ततः परम्।
पंचाभृतेन संस्नाप्य वस्त्रगनादिभिर्हरिहम[8]।।८।।
भूषयेद्दिव्यमाल्येश्च चतुर्थार्च्चा ततश्चरेत्।
चित्रोचितं[9] च नैवेद्यं दद्यात् भक्त्यासमन्वितम्।।६।।
तत चतुर्थ पूजान्ते शयनं रचयेद्धरेः।
उत्सवेषु च सर्वेषु न कालनियमो भवेत्।।१०।।
कालव्यतिक्रमो[10] दोषोनास्त्यत्र नृपसत्तम।
मार्कण्डेयं प्रति·श्रीमान् भगवान् भूतिभावनः[11]।।११।।
प्रसंगादुक्तवानेवं तस्माद्दोषां न विद्यते।
ततस्तस्मिन् दिनं भूपगते यामत्रये सति।।१२।।
कूपस्य संस्कृतं कुर्यादधिवासकृते तदा।
वटस्योत्तरदेशेऽपि कूपोस्ति भुविनिर्मितः[12]।।१३।।
स्नानार्थ जगदीशस्य नानातीर्थसमन्वितः।
ततः कूपादग्निशर्मा हृयुद्धरेज्जलमुत्तमम्।।१४।।
आचार्योऽथ शुचिर्भूत्वा कूपस्य परितस्ततः।
दिग्देवेभ्यो बलिं दत्तवा[13] क्षेत्रपालं गणेश्वरम्।।१५।।
तदार्यकस्य वचसा[14] विप्रर्नीत्वा जलं ततः।
ब्रह्मणे तत्समर्प्याथ सावधानतया स्थितम्[15]।१६।।

ब्रह्मापि तज्जलं दिव्यं स्वर्णकुम्भेषु पूरयेत्।
रोपयेष्वथ च ताभ्रेष[१६] त्वष्टोत्तरशतेषु च।।१७।।
यथा शतपालम्भोविः पूण्णर्ग्कुम्मस्तथा[१७]। चरेत्।
जलपात्राणि दिव्यानि वस्त्रावृतमुखानि वे।।१८।।
अधिवासगृहे तस्मिन् प्रासादस्य च पूर्वतः।
देदीप्यमाने भवने चतुर्द्वारविभूष्क्तिाते।।१९।।
वितानमण्डिते तत्र सुधारसमुज्ज्वले।
तादृशे मन्दिरे ब्रह्मा रक्षेत्कुम्मचयं तदा[१८]।।२०।।
चतुःपंक्तितया भूप स्नानार्थ कमलापतेः।
गन्धद्वारेति मन्त्रेण स्नानाम्मसि स पूजकः।।२१।।
स कर्पूरं क्षिपेद![१९] गन्धं रक्षेत् तच्चक्रमुद्रया।
पावमानीति[२०] सूक्तेन स्पृशेतानि पृथक् पृथक्।।२२।।
वस्त्रेणाच्छाद्य सहसा माल्यं तस्योपरि न्यसेत्।
एतच्चतुर्दयशीरात्रावधिमासं[२१] प्रचोदयात्[२२]।।२३।।
स्नानोदकिस्य नृपते भवांस्तद्भक्तिलालसः।
तद्दिनेऽपि निशायाश्च यामाननतरतो नृप।।२४।।
कुर्यातु जगदीशस्य निद्राभंग यथाविधि।
ततो विद्यापतर्विश्वाससोश्च कुलसम्भवेः।।२५।।
मानवस्तैर्हरेः पृष्ठे बाहृवोश्च दृढ़सुक्ष्मकम्२३।।
काष्ठसम्बन्ध्सकलं[२४] रक्तारक्तांशुकेः पुनः।
समासाद्य[२५] नृपश्रेष्ठ विचित्रं सृदृढ़ं तदा[२६]।।२७।।
बलभ्रदस्य भद्रायाः कुर्यासुः मानवाश्च ते।
अथाचा्य्र्यस्तु[२७] विधिना मंगलारोपणं हरेः।।२८।।
अग्निशर्माबलसयापि ब्रह्मापि देव्याः समाचरेत्।
ततो भवान् देवतानां तिसृणा पुरतः स्थितः।।२९।।
पृाकिं सुं पुष्पांजलि दत्त्वा भक्तया परमया नमेत्२८।
तदभावेऽप्यग्निशर्मा[२९] समांजलिमर्पयेत्[३०]।।३०।।
ततः कटीप्रदेशे च मनोज्ञे कमालपातेः[३१]।
पट्टसूत्राणि संयोज्य बध्नीयान्नृपसत्तम।।३१।।
ततस्तत्सूत्रमादाय[३२] त्वग्निशर्मा च पूजकाः।
अन्ये .ते सेवकाः सर्वे चालयेयुः शनैः शनैः।।३२।।
विश्वासोरन्वया[३३] ये[३४] तदा[३५] विद्यापतेश्च ते।
हरेः सर्वामालम्ब्य चालयेयुसततः परम्।।३३।।

आदो सुदर्शनं कृत्वा शीरपाणिं ततः।।
ततो भद्रां भगवतां भगवन्तं हरिं ततः।।३४।।
एवं क्रमेण यत्नेन मन्दं मन्दं नृपोत्तम।
श्वेतच्छत्रं[३६] तथा कृष्णं धारयेत् पुरतो हरेः।।३५।।
चारुचामरवृन्छानां व्यजनानां समन्ततः।
चालनं रचयेतत्र पथि सर्वसुखप्रदे।।३६।।
चन्द्रसूर्यान्वितं त्रासं कृरूणवर्ण च धारयेत्।
शंखनां निःश्वनंः[३७] कार्य घण्टानां मद्दलस्य च।।३७।।
मधुरं मधुरिका रावं[३८] कारयेद्भक्तितत्परः।
तन्त्री कालालयोस्तावन्निः स्वनं रचयेत्पथि।।३८।।
चन्द्रापतसमाकीर्ण्णे तूलिकाच्छादिते पथि।
राजमानेऽपि देवेशं भवान् प्रस्थापयेच्छनैः।।३६।।
सह[३६] चन्द्रप्रदीपानां प्रदीपनां समन्ततः।
ज्वलनं रचयेन्नक्तं ज्येष्ठस्नानोत्सवे परे।।४०।।
पूर्वाभिमुखतां कृत्वा प्रथमं कमलापतेः।
ततोऽप्युत्रदेशं च मुखं कृत्वा नयेच्छन्नैः।।४१।।
पुनः पूर्व प्रदेशं च मुखं कुर्याज्जगत्पतेः।
उदन्मुखं पुनः कृत्वा ततो मंचास्थलं[४०] नयेत्।।४२।।
मुरवेरिण एतस्य जगदीशस्य भूपतेः[४१]।
भद्रायाश्च बलस्यापि प्रमादात्पतनं यदि।।४३।।
महाभयं नृपस्यापि राज्यस्यापि भवेद्धवम्।
दुर्भिक्षं मरणं[४२] चैव जायते च पुनः पुनः।।४४।।
श्रीपतेः पतने यावन्नयचेत्सा महिषी नृप।
अतः शान्तिं तदा कुर्याद् विष्णुप्रीणहेतवे।।४५।।
विप्रद्वारा मूलमन्त्रं लक्षमात्रं च जापयेत्[४३]।।
होमस्तनमन्त्रतः कार्यस्तद्दशाशेन तर्पणम्।।४६।।
तथैव मार्जनं भूप तद्दशांशेन भोजनम्।
विप्रेभ्यश्च सुवर्ण्णानि[४४] दत्वा शान्तिं चरेद् भवान्।।४७।।
अतस्तवं सावधानोऽत्र भविष्यसि नृपोत्तम।
प्रयाणे जगदीशस्य महोत्सवपरो भवेत्।।४८।।
तलवन्तश्च ये केचित्सेवकामुरवेरिएाः।
उभयोः पार्श्वयोस्तस्य नियोज्यासते प्रयतनतः।।४६।।
ऐशान्यकोणदेशेऽपि[४५] प्रसादस्य महोन्नतेः।

षोडशस्तम्भविभ्राजद्दिव्यचन्द्रातपोज्वलम्।।५०।।
आकाशमण्डलोल्लासि शोभाभरसमन्वितम्[४६]।
सुधारयसमुल्लासि मुचचारी महोननतम्।।५१।।
कृय्र्शन्महायतं स्पष्टं तत्रैव स्थापये विभुम।
न्त्यिस्नानविधिं कृत्वा वस्त्रमालैः समर्पयेत्।।५२।।
अग्रं प्रक्षाल्य वस्त्राणां चतुःखण्डं प्रपातयेत्।
तत्र धौतप्रदेशे च देवानामग्रतो नृप।।५३।।
प्रतिहारस्ततो[४७] गत्वा ह्यधिवासगृहं पुनः।
स्नानार्थ जगदीशस्य ब्रह्मनीरं समानय।।५४।।
ततो ब्रह्मा नृपश्रेष्ठ जलपात्राणि तद्ग्रहात्।
वस्त्रेणच्छादितं मुखो मंचकोपरि संन्यसेत्।।५५।।
काहालछत्रघण्टादिस्फुरदग्रातलं शुचिः।
ब्रह्मा तज्जलपात्राणि चतुःपंक्त्या न्यसेत्तदा।।५६।।
जगदीपुरः पंक्त्या पंचत्रिशद् घटान्यसेत्।
त्रयस्त्रिंशद् घटेश्चैव रक्षेन्नीलाम्बराग्रतः।।५७।।
द्वात्रिंशघटान[४८] भूप् भद्रायाः स्नानहेतेपे।
ब्रह्माणा रक्षणीयास्ते नान्येरेव कदाचन।।५८।।
सुदर्शनाभिषेकार्थ मष्टादश घटान्यसेत्[४९]।
एवं चतुःपंक्तितया जलपात्राणि सादरम्।।५९।।
सावधानतया ब्रह्मा तत्रैव मण्डपे न्यसेत्।
पात्रहोता ततस्तत्र पूजां कुरु महामते।।६०।।
हत्युच्चार्य वदेद् भूप स्नानकर्मणि तत्परः।
ततस्ते पूजकवराः पूर्ववभ्यास कर्म तत्।।६१।।
कृत्वा चासनतो भक्त्या दीपान्तं कर्मणि स्थिताः।
नारिफेलफलान्येव बहिष्कृत्य घटोत्करात्।।६२।।
वीक्षणादिकसंस्कारं रचयेत् प्रार्थ येद्धरिम्।
बलदेव नमस्तेऽस्तुरेवतीप्राणवल्लभ।।६३।।
आविर्भाव दिनान्तेऽथ स्नापयाम्यहम्मसा।
सुवासितेन दिव्येन तथैव चन्दनद्रव्येः।।६४।।
दत्वाज्ञया[५०] स्नापयामि जगदानन्ददायक।
दीनबन्धो दयासिन्धो[५१] नीलाचलपते हरे।।६५।।
अद्य जन्मदिनं नाथ पावनं जायते तव।
तस्मात्त्वं[५२] तीर्थपानीयेः कोपेः पुण्यविवर्द्धनेः।।६६।।

सुवासितकरै[५३] सारेः स्त्वदाज्ञां परिपालयन्।
च्चन्दनद्रवजालेन स्नानयामि महुर्मुहुः।।६७।।
जगदीश नमस्तेऽसतु ह्यपराधं क्षमस्व मे।
इति सम्प्राथ्र्य राजेन्द्र देवराजं ततः परम्।।६८।।
सुदर्शनं सुभद्रां[५४] प्रार्थयेद् देशिकोत्तमः।
भद्रे देवि नमस्तुभ्यं सर्वानन्दप्रदायिनी[५५]।।६६।।
स्नापयामि जलेः विष्णोः हस्ताम्बुजस्थित[५६]।।७०।।
स्नापयामि भवन्तं च नमस्ते ज्ञानदायक।
प्रार्थयित्वा च देवांस्तान् दत्वा पुष्पांजलिं पृथक्।।७१।।
समुद्रज्येष्ठामन्त्रेण स्नापयेयुश्च तेऽर्चकाः।
बलभद्रं जगन्नाथं सुभद्रां च सुदर्शनम्।।७२।।
स्नापयेत्प्रथमं भूपतज्जलैः सपरिश्कृतः[५७]।
उपचारेः पूजकोऽयं भक्तिश्रद्धामिन्वितः।।७३।।
स्नापयित्वा यथा न्यायं देवदेवं जगत्पतिम्।
बलभदं सुभद्रां च सुदर्शनमसौ नृप।।७४।।
दशभागे जले दिव्ये चन्दनं ऋतुभागतः।
संयोज्याथ त्रिभिः कुम्भे पृथक् संस्नापयेत् सुरान्।।७५।।
चन्दनाम्भः यिारे सार्द्ध दतवा च बदने पुनः।
सर्वागेष्वषरं चार्द्ध सेचयेदतिभक्तितः।।७६।।
स्नानोत्सवस्य तस्यान्ते त्वग्निशर्मा च शोभनम्।
माल्यं दामन्तकं दिव्यं गन्धं रक्तांशकद्वयम्।।७७।।
समर्पयेन्मुरारातिं भक्तया शीध्रं तदा[५८] नृप।
श्रद्धाभक्तियुतस्त्वं च दत्वा पुष्पांजलित्रयम्।।७८।।
कर्पूरवत्त्या रचयेन्नीराजनमनुत्तमम्।
चालयेचचामरं चारु वीजयेद् व्यजनेने च।।७६।।
तन्मंचमण्डपस्याथ कुय्र्यान्मार्जनमादरात्।
सेययेच्चन्दनाम्भं च परितसतद्रजः क्षिपेत्।।८०।।
वं कृत्वा[५९] भवान् भूप तिष्ठेद्देवपुरस्तदा[६०]।
अग्निशर्माथ देवेशमर्पयेनमालयमुत्तमम्[६१]।।८१।।
पीतवस्त्रद्वयं[६२] तावदानीय च[६३] समर्पयेत्।
ततो भक्त्या नृपश्रेष्ठ तदानीं त्वां तदंशुकम्।।८२।।
शिरस्येवं प्रगृहयाथ कृतकृत्योभवेत्तदा[६४]।
अग्निशर्मा सम्भवेऽपि तदैतत्पूजकश्चरत्।।८३।।

अथ देवांगतः शीघ्रं वस्खमाल्यानि तानि वे।
बहिष्कृत्य पुनर्दिव्यं नव्यं सूक्षमांशुकोत्करम्।।८४।।
हरो सम्प्ये माल्येश्च नानापुण्यकुलाद्भवेः।
करिरेष्ठातया वेशं च कारयेतदा।।८५।।
एतादृशं कलस्यापि[६५] वेशं कुर्यान्नृपोत्तम।
कुमारीवेश्यारचनां भ्रदायाश्च प्रकल्पयेत्।।८६।।
देवतानां पुरस्ताद्वे जलैः प्राक्षालयेततः।
पूर्ववन्मण्डलं कृत्वा चतुःपंक्तितया तदा[६६]।।८७।।
काहालछत्रघण्टादिस्फुरदग्र तया नृप।
पाकालयच्च[६७] नैवेद्यं दिव्यं बहुशनानयेत्।।८८।।
भक्ष्य भोज्यं च चर्व्य च लेहृयं पेयं य चोष्यकम्।
इत्थिं[६८] च षड्सेर्युक्तं दिव्यमननं चतुर्विाम्।।८९।।
नानापुपसमूहाढयं[६९] नानाव्यंजनसंयुतम्।
लोकत्रयाश्चर्यरं वस्त्रेराच्छाद्य तत्पुनः।९०।।
तादृशं दिव्यनैवेद्यं स्थापयेन्मएडलेषु च।
बाह्ये कादचिनमोरक्षेत्पूर्ववत् पूजकोऽर्चयेत्।।९१।।
हरिं परमया भक्त्या ह्युपचारेननुत्तमेः।
स्नानोत्सवं महाविष्णोरीदृशं च भूपोत्तम।।९२।।
नैवेद्यं तादृशं पूजां कुय्र्याच्चैवेदृशीं[७०] तथा।
कारियष्याि भूपाल सावधानतया तदा।।९३।।
अशक्तस्त्वं यदा भूप भपेः प्रतिनिधिस्त्व।
स्वर्णदण्डधरः श्रीमान् पूजाशीलनतत्परः।।९४।।
देवतानां पुरः स्थित्वा सावधानो भवेत्तदा।
पूजासमापितपर्यन्तं तिष्ठेदग्रे नृपोत्तम।।९५।।
पूजासमाप्तेश्च ततो देवांगत्पुनर्नृप।
माल्यवस्त्रादिकं तावद् बहिष्कुयाच्छनैः शनैः।।९६।।
पुरः प्रक्षाल्य यत्नेन तलीमापत्य यत्नतः।
भक्तिश्रद्धान्वितो भूत्वा प्रसूनांजलिमाक्षिपेः।।९७।।
सुदर्शनं पुरः स्थित्वा[७१] पूर्ववद् देवतात्रयम्।
प्रस्थापयेच्छनेस्तस्मात्पुनर्दक्षिणादिङ् मुखम्।।९८।।
स्थापयित्वा ततो ब्रह्मा भक्त्या कर्पूरचन्दनम्।
दत्वा दामनकं माल्यं पीतवस्त्रद्वयं पुनः।।९९।।
कर्पूरनीरजनया[७२] कुर्याद्दूर्वाक्षतान् क्षिपेत्।

नीराजयेत्स्त्वत्वर्या पिष्टवर्त्या ततो[७३] नृप।।१००।।
सुवासितजलं तत्र पक्वताम्बूमर्पयेत्७४।
ततस्तत्समये पुष्पं वष्पया[७५] चेव प्रचारयेत्।।१०१।।
ततो ब्रह्मा च निर्माल्यं चन्दनं चारुभाल्यकम्।
दत्वाऽक्षतान् पीतवस्त्रं जलं ताम्बूलमुत्तसमम्।।१०२।।
एतत्सर्व गुहीत्वा च तत्र तुम्यं प्रदावपयेत्।।१०३।।

सूत[७६] उवाच

ब्रह्मणः परमां वाचं श्रुत्वा स नृपसत्तमः।
महोत्सवतया विष्णोः कृतवान् सनानकर्म तत्।।१०४।।
दक्षिणाभिमुखे विष्णो तस्मिन् काले नृपोत्तम।
विष्णोर्नीराजनविद्या ये पश्चन्ति च[७७] भक्तितः।।१०५।।
पदे पदेऽश्वरमेधानां फलं तेषां भवेद् ध्रुवम्।
मनोरथस्य संसिद्धिसतेषां भवति तत्क्षणात्।
अनते वैकुण्ठभवनं वे च गच्छन्ति मानवाः।।१०६।।
दक्षिणाभिमुखस्यास्य विष्णोश्च दर्शनं तथा।
यन्नीराजनमाश्चर्य दिवि देवा मुदान्विताः।।१०७।।
पश्यन्ति सादरं ये वे ते कृतार्था न संशयः।
मन्दं मन्दं ततो भक्त्या तूलोलल्पेऽति कोमले।।१०८।।
महोत्सवतया विष्णुं चालयेत् पुर्ववज्पन्।
नीत्वा किंचितत्पथिवरे सीपयित्वां पुनर्विमुमा।।१०६।।
शीतलद्रव्यनैवेद्यं पूजकस्तं समर्पयेत्।।११०।।
किंचिद्दूरं ततो नीत्वा द्वितीयावरान्तिमे।
दक्षिणामिमुखं श्रीशं पूर्ववत्परमादरैः।
नीराजयेत्ततो[७८] राजन् जायमाने महोत्सवे।
ततः प्रस्थापर्येन्मार्गे[७६] शोभमाने मनोरमे।।१११।।
लसद्धितानि जालेऽस्मिन् वेनतेयानितकं नयेत्।।११२।।
पुनः कृत्वा रमाकान्तं कानतां व[८०] दक्षिणामुखम्।
तथा नीराजयेद् ब्रह्मा भक्तिश्रद्धा समन्वितः।।११३।।
मन्दं मन्दं पुनर्नीत्वा जगदीशं सुरेश्वरम्।
नीराधनालये[८१] तावत्ततेव स्थापयेद्विभुम्।।११४।।
वंशैर्विनिर्मिततततरं[८२] दृढ़मावरणं[८३] पुनः[८४]।
बद्धवा यथा तनः कश्चिन्नोपर्शेश्च[८५] तथा चरेत्।।११५।।
एवं विधय पंचदशकान् स्थापयेद्वासरानमि।।११६।।

विना सेवनमेतस्य विष्णोर्दर्श्नं[८६] मेव हि।
न कुर्यान्मनसा वाचा तत्रापि[८७] न च चिन्तयेत्।।११७।।
एतस्मिन् समये राजन् विष्णोर्दर्शनकांक्षया।
द्रक्ष्यशमीति वदेत् यस्तु पितृभिः सह मद्गति[८८]।।११८।।
विरुपं वा स्वरुपं वा तस्मिन् काले नृपोत्तम।
ये पश्चन्ति च ते सर्वे पच्यन्ते निरये धृवम्।।११९।।
पितृभिः सहितास्तेतु सहसा युगसंचयया।
निरयं[८९] प्रतिपद्यन्ते[९०] नोचितं तत्रवीक्षणम्।।१२०।।
जगत्पतेस्तस्य महोत्सवपद्रे[९१]
सदा त्रिलोकीवनचेतसां च ये। (१२१)
कुर्वन्ति भक्तिं परमां भवार्णवात्
स्नानोत्सवे ते तरसा[९२] विमुक्ताः।।१२२।।
इति श्रीसूतसंहितायां[९३] नीलाद्रिमहोदये श्रीपुरुषोतमक्षेत्रमाहात्म्ये स्नानोत्सववर्णनं नाम चतुर्दशोऽध्यायः।

FOOTNOTES

१ B. U भगवान्। २ B, K, R यात्रात्राः। ३ B कथतात् त्वया। R कथिता स्वयां U क्रियते तदा, K कथितास्वया। ४ K. M, R. U महितले। ५ B ज्येष्ठे, K, R. U ज्येष्ठं। ६ R कर्ण्णं, B कर्ण्णश्च ७ ताव, K देव। R Omits it. ८ U दर्मिंधरिं। ९ तत्रार्चितं, R तत्रार्चितं, M, K तत्रोचित। तत्रोचितं। १० B, U व्यतिञ्मा। ११ B, U भूप। १२ B विमुनिर्मितं, K मुविनिर्नितं। १३ B दद्या। १४ B बचसा। १५ १B स्थितः। Ms. R Omit sls. 17, 18 and 19a. १६ B ताम्वेषु, M ताम्रेषु। १७ B, K पूर्णाः स्युश्च तथा, M पूर्णः स्युश्च तथा, U पूर्ण्णास्युश्च तथा। १८ B, K चयं भुदा, R चये मुदा। १९ B क्षिपेद गन्धं। २० B. K, U पापमानीति। २१ B एवं चतुर्दशीचात्रा, B एवं चतुर्दशीरात्रौ, K. M. R एवं चतुद्रशीरात्रौ ह्यधिवासं २२ B. K, M, R. U प्रचारयेत्। २३ B चाति, U सूक्ष्मवस्त्रकं। २४ B. K, M. R, U सम्बन्थि। २५ B. K. M. Rसमाच्छाद्य। २६ B, K. M. R तथा। २७ B. K. U त्वद्। २८ B. K. M. R. U शर्मा। २९ B.K, U कुसुमाजलिमर्पयेत्, M कुसुमांजलिसमर्पयेत्। ३० M कमलापति। ३१ B. K. R. मालम्ब, M, U मालम्बय्। ३२ B. K. M. R. U विश्वाससोरन्वय। ३३ B. K. R या, U चा। ३४ B. K, M. R स्तथा, U स्तदा। ३५ M अतो। ३६ M श्वेतं। ३७ B. U निःश्वनं। Ms. U Omits sl. 34a. ३८ B मधुकारावं, ३९ K. R. U सहस्त्रचन्द्रदीपानां। ४० U मंचस्थलं। ४१ M, U ऐशान्ये। ४२ B. U मरकं। ४३ B

नीराजयेत्स्त्तवर्त्या पिष्टवर्त्या ततो[७३] नृप।।१००।।
सुवासितजलं तत्र पक्वताम्बूमर्पयेत्७४।
ततस्तत्समये पुष्पं वष्पया[७५] चेव प्रचारयेत्।।१०१।।
ततो ब्रह्मा च निर्माल्यं चन्दनं चारुभाल्यकम्।
दत्वाऽक्षतान् पीतवस्त्रं जलं ताम्बूलमुत्तसमम्।।१०२।।
एतत्सर्व गुहीत्वा च तत्र तुम्यं प्रदावपयेत्।।१०३।।

सूत[७६] उवाचं

ब्रह्मणः परमां वाचं श्रुत्वा स नृपसत्तमः।
महोत्सवतया विष्णोः कृतवान् सनानकर्म तत्।।१०४।।
दक्षिणाभिमुखे विष्णो तस्मिन् काले नृपोत्तम।
विष्णोर्नीराजनविद्या ये पश्चन्ति च[७७] भक्तितः।।१०५।।
पदे पदेऽश्वरमेधानां फलं तेषां भवेद् ध्रुवम्।
मनोरथस्य संसिद्धिसतेषां भवति तत्क्षणात्।
अनते वैकुण्ठभवनं वे च गच्छन्ति मानवाः।।१०६।।
दक्षिणाभिमुखस्यास्य विष्णोश्च दर्शनं तथा।
यन्‌नीराजनमाश्चर्य दिवि देवा मुदान्विताः।।१०७।।
पश्यन्ति सादरं ये वे ते कृतार्था न संशयः।
मन्दं मन्दं ततो भक्त्या तूलोलल्पेऽति कोमले।।१०८।।
महोत्सवतया विष्णुं चालयेत् पुर्ववज्पन्।
नीत्वा किंचितत्पथिवरे सीपयित्वां पुनर्विमुमा।।१०६।।
शीतलद्रव्यनैवेद्यं पूजकस्तं समर्पयेत्।।११०।।
किंचिद्दूरं ततो नीत्वा द्वितीयावराान्तिमे।
दक्षिणामिमुखं श्रीशं पूर्ववत्परमादरैः।
नीराजयेत्ततो[७८] राजन् जायमाने महोत्सवे।
ततः प्रस्थापर्येन्मार्गे[७९] शोभमाने मनोरमे।१११।।
लसद्धितानि जालेऽस्मिन् वेनतेयानितकं नयेत्।।११२।।
पुनः कृत्वा रमाकान्तं कानतां व[८०] दक्षिणामुखम्।
तथा नीराजयेद् ब्रह्मा भक्तिश्रद्धा समन्वितः।।११३।।
मन्दं मन्दं पुनर्नीत्वा जगदीशं सुरेश्वरम्।
नीराधनालये[८१] तावत्ततेव स्थापयेद्विभुम्।।११४।।
वंशैर्विनिर्मिततततरं[८२] दृढ़मावरणं[८३] पुनः[८४]।
बद्धवा यथा तनः कश्चिन्नोपर्शेश्च[८५] तथा चरेत्।।११५।।
एवं विधय पंचदशकान् स्थापयेद्धासरानमि।।११६।।

विना सेवनमेतस्य विष्णोर्दर्श्नं[८६] मेव हि।
न कुर्यान्मनसा वाचा तत्रापि[८७] न च चिन्तयेत्।।११७।।
एतस्मिन् समये राजन् विष्णोर्दर्शनकांक्षया।
द्रक्ष्यशमीति वदेत् यस्तु पितृभिः सह मद्गति[८८]।।११८।।
विरुपं वा स्वरुपं वा तस्मिन् काले नृपोत्तम।
ये पश्चन्ति च ते सर्वे पच्यन्ते निरये धृवम्।।११६।।
पितृभिः सहितास्तेतु सहसा युगसंचयया।
निरयं[८६] प्रतिपद्यन्ते[६०] नोचितं तत्रवीक्षणम्।।१२०।।
जगत्पतेस्तस्य महोत्सवपद्रे[६१]
सदा त्रिलोकीवनचेतसां च ये। (१२१)
कुर्वन्ति भक्तिं परमां भवार्णवात्
स्नानोत्सवे ते तरसा[६२] विमुक्ताः।।१२२।।
इति श्रीसूतसंहितायां[६३] नीलाद्रिमहोदये श्रीपुरुषोतमक्षेत्रमाहात्म्ये
स्नानोत्सववर्णनं नाम चतुर्दशोऽध्यायः।

FOOTNOTES

१ B. U भगवान्। २ B, K, R यात्रात्राः। ३ B कथतात् त्वया। R कथिता स्वयां U क्रियते तदा, K कथितास्वया। ४ K. M, R. U महितले। ५ B ज्येष्ठे, K, R. U ज्येष्ठं। ६ R कर्ण्ण, B कर्ण्णश्च ७ ताव, K देव। R Omits it. ८ U दर्मिधरिं। ६ तत्रार्चितं, R तत्रार्चितं, M, K तत्रोचित। तत्रोचितं। १० B. U व्यतिज्मा। ११ B, U भूप। १२ B विमुनिर्मितं, K मुविनिर्नितं। १३ B दद्या। १४ B बचसा। १५ १B स्थितः। Ms. R Omit sls. 17, 18 and 19a. १६ B ताम्वेषु, M ताभ्रेषु। १७ B. K पूर्णाः स्युश्च तथा, M पूर्णः स्युश्च तथा, U पूर्ण्णास्युश्च तथा। १८ B, K चयं भुदा, R चये मुदा। १६ B क्षिपेद गन्धं। २० B. K, U पापमानीति। २१ B एवं चतुर्दशीचात्रा, B एवं चतुर्दशीरात्रौ, K. M, R एवं चतुद्रशीरात्रौ ह्यधिवासं २२ B. K, M, R. U प्रचारयेत्। २३ B चाति, U सूक्ष्मवस्त्रकं। २४ B. K, M, R, U सम्बन्थि। २५ B. K. M. Rसमाच्छाद्य। २६ B, K. M, R तथा। २७ B. K. U त्वद्। २८ B, K. M, R. U शर्मा। २६ B.K, U कुसुमाजलिमर्पयेत्, M कुसुमांजलिसमर्पयेत्। ३० M कमलापति। ३१ B. K. R. मालम्ब, M, U मालम्बय्। ३२ B. K. M. R. U विश्वाससोरन्वय। ३३ B. K. R या, U चा। ३४ B. K, M. R स्तथा, U स्तदा। ३५ M अतो। ३६ M श्वेतं। ३७ B. U निःश्वनं। Ms. U Omits sl. 34a. ३८ B मधुकारावं, ३६ K, R. U सहस्त्रचन्द्रदीपानां। ४० U मंचस्थलं। ४१ M, U ऐशान्ये। ४२ B. U मरकं। ४३ B

जजाप्श्ते । ४४ M विप्रम्यश्च सुपर्ण्णानि । ४५ M ऐशान्ये । ४६ M मंच चारु महोन्नतं, शोभान्तरसमन्वितम् । ४७B. K, M, R, U प्रतिहरि ततो । ४८ B, K. R. U द्वाविंशतिघट्य । Ms. Omits sl. 51b. ४९ B घट्ये, K. R घट्य । sl. 63b is absent in B. K, R. ५० B, K, M, U त्वदाज्ञया, R त्वदाज्ञा । ५१ B, K, M, R. U कृपासिन्धो । ५२ M, R. U तस्मात्तवां । ५३ B. K. M, R. U तरैः । ५४ B. K, M. R. U च, After sl. 69a, the following verses are present in K - बलभद्रं नमस्तुभ्यं नमस्ते मुषलायुव । प्रलम्बारे शीरपाण तीर्थाभिः स्नापयामि ते । ५५ B. M, R, U भक्तानन्द । ५६ B हस्ताम्बुजे स्थितः K, M, R. U हस्ताम्बुजस्थिते । ५७ B परिसंस्कृतैः । Mss. B< K, M, R, U Omit sls. 73b-74. ५८ B चेतसदा, After sl. 79a, the following verse is present in K -

चन्दनं लेपयेच्चागे मुखपद्मे यथाक्रमम्

५९ कृत्वा is absent in B, K, M, R. ६० B, K, M, R देवतानां । Ms. B OMits sl. 81b. ६१ K, M, R, U देवांगान्माल्यं दामनकं शुभम् । ६२ K. M, R, U रक्त । ६३ B. K. R त्वां । ६४ K, U स्तदा । After sl. 83a, the following verse os present in B, K. M, R. U त्वदभावेऽप्यग्निशर्म च क मार्जनादिकमाचरत् । ६५ B. K, M, R, U बलस्यापि । ६६ K. M. R तथा । (क) K Omits च । ६७ B पाकालया, K. M. R, U पाकालयाश्च । ६८ B. K, R तदिधिं, M इत्थं । ६९ K, M, R, U नानापूप । ७० B. K. M. R, U रम्यं पूजां । ७१ B पुरष्कृत्वा, M, U पुरःकृत्वा । ७२ B. K, U नीराजनकं, M. U नीराजन मा । ७३ B, K, M, R, U तथा । ७४ B, K, R उत्तमं । ७५ M. K. R. U दृष्टिं । ७६ सूत उवाच is absent in B. K, M, R. U । ७७ च is absent in B. Mss. B. K. M, R. U omits sls. 104. 107b. । ७८ B, K, M, R. U तया । ७९ K. M पयेन्मार्गे । ८० B, K, M, R, U च । ८१ P नीराधयालये । ८२ U संद्वशेः । ८३ U निर्मिततरं । ८४ K, M, U पुरः । ८५ B, K. R पश्चेतां । ८६ B, K, R, U मत्र हि । ८७ K, M, R, U तच्चापि । ८८ U मद्गतिः । ८९ B निरकं । ९० K, M, R, U प्रति । ९१ P मनोत्सवे । ९२ P चरसा । ९३ M पूर्ववत् ।

पंचदशोऽध्यायः

स्नानोत्सवस्य तस्त्रान्ते नीरोधनगृहे विभुम।
स्थापयेत्केवलं ब्रह्मनितयेवं कथितं[1] त्वया।।१।।
दश पंचदिनान्यसेव[2] वंशावरणवेष्टितम्।
कर्तव्यं तत्र किं कर्म नोक्तव्यं[3] कमलासन।।२।।
वंशावरणयुक्तस्य विष्णोस्तस्य परात्मनः।
षट्कालार्चनजं कर्म कथं स्यात् पद्मसमीव।।३।।
दश पंचदिनेष्वेषु न पश्येद्विष्णुमव्ययम्।
कथं पूजा च भविता तद्वदाशु[4] सुरेश्वर।।४।।

ब्रह्मोवाच

शृणु राजन् महाप्राज्ञ स्नानोत्सवसमापने।
तद्वंशावरणे भूप विचित्रं वसनं बहु।।५।।
सूक्षेतरेऽम्बरे हस्तत्रयमानेऽति शोभने।
सार्द्धहस्तायतियुते तत्रैव प्रतिमां न्यसेत्।।६।।
बद्धवा चारुतरं कृत्वा पर्य्यकं नत्पुरो न्यसेत्।
तत्रैव[5] निर्मितं रामं धवलं च चतुर्भुजम्[6]।।७।।
शंखं चक्रं हलं तावद्दधानं मूषलं परम्।
तत्र संलिप्य[7] परमैः[8] भूषणेरभिशोभितम[9]।।८।।
कुय्र्यात् पटत्रयं रम्यमिथिं[10] तावत्प्रमाणकम्११।।
सुभद्रां पीतवर्ण्णमां पद्मासनगतां शुभाम्।।९।।
चवुर्भुजां करद्वन्दे घृतपद्मद्वयं[12] परम्।
वराभयकरं[13] चैव नानामरणभूषिताम्[14]।।१०।।
पटं[15] च तादृशं[16] तत्र विलिख्य श्रद्धायाचरेत्।
नीलजीभूतसंकाशं पद्मासन विराजितम्।।११।।
शंखचक्रगदापद्मविनसत्करपंकजम्।
चतुर्भुजं चारुलूपं पद्मप्रजायतेक्षणम्।।१२।।
श्रीवत्सकोस्तुभोरस्कं वनमालाविभूषितम्।
तादृशे पटमध्येऽपि चित्रे संलिख्य तं हरिम्।।१३।।
देवानामुमये· पार्श्वे माममुं चैव नारदम्।
चित्रपटमये[17] पीठे विलिखेनमंजुले नृप।।१४।।
पूजयेद विधिवद् भक्त्या पूजकः परमादरात।
छत्रचामरघण्टादि स्फुरदग्रतया तदा।।१५।।

तत्पटत्रयमानीय पूर्वद्वारपद्रेशतः।
प्रासादं भावयित्वाथ[१८] तद्वंशावरणे न्यसेत्।।१६।।
ततस्त्रत्रैव पश्यद्मिः तुलामापातयेत्पराम्[१९]।
रामं नृसिंह कृरूणं च प्रतिमारुपधारिणम्[२०]।।१७।।
स्थापयेद्बलदेवाग्रे तादृशं प्रतिमात्रयम्।
भद्रायाः पुरतो भूप विश्वघात्रीं रमां न्यसेत्।।१८।।
जगदीशस्य पुरतः श्रीकृष्णं स्थापयेत्तदा।
चक्राग्रे तत्र तय्र्यङ्. के नारायणमथो न्यसेत्।।१९।।
सुदर्शनं चक्ररुपं जगदीशकरेस्थितम्।
पूजयेतं तथा भक्त्या पट्टे मूर्ति न कल्पयेत्।।२०।।
एवं संस्थाप्य विधिवत् प्रतिबिम्बे ततः परम्।
पंचामृतेर्महास्नानं कुय्र्यादाचार्य एव हि।।२१।।
ततो मध्याह्नपूजां पन पूजकः पूर्ववच्छुचिः।
तत्पूजासमये कोऽपि विशेन्माल्यन्तरे विभोः।।२२।।
वंशावरएामध्येऽपि वंशा विश्वावसोरपि।
विद्यापर्शेश्चि ये वंशः प्रविशेयुर्न कर्हिचित्।।२३।।
यतो दारुतनुर्देवः पट्टे निर्विशते स्वयम्।
तसमात्पट्टस्य पूजायाः कोऽपि तत्र न संविशेत्।।२४।।
अंगसेवातयन्तिकी चेत्काय्र्या सा पूजनात्परम्।
न[२१] हि भोजनकाले तु सेवनीयो जगत्पतिः[२२]।।२५।।
कुर्ययात्तद्दिनमारभ्य दश पंच च वासरान्[२३]।
अभिलक्ष्य चरेत्पूजां पूर्ववन्नृपसत्तम।।२६।।
दारुरुपी जगत्स्वामी पट्टे विश्रम्य नः प्रभुः।
तिष्ठत्यत्र न सन्देहो[२५] नास्ति नास्ति नृपोत्तम।।२७।।
तथा चतुर्थकालार्च्चाः कुर्यात्[२६] स्वाचायृर्यवय्र्यकैः।
तन्निर्माल्येऽप्य विश्वासं न कुर्याच्च कदाचन।।२८।।
कुर्याच्चेन्नरके घोरे पूज्यते[२७] भूधी नरः।
एवं पंचदशाह्नेषु पट्ट[२८] ब्रह्मार्चनं चरेत्।।२९।।
अगालस्थे जायमाने ब्रह्मणः पृथिवीपते।
देव वेश्मनि कालेऽस्मिन् सर्वानपि[२९] च[३०] कारयेत्।।३०।।

इन्द्रद्युम्न उवाच

दारुब्रह्मस्वरुपस्य विष्णोः स्नानोत्सवे सति।
निरोधनं गृहे तस्य स्नानं[३१] च[३२] वर्णितं त्वया।।३१।।

को विधिस्तत्र जायेत चतुर्ण्णां दारुरूपिणाम्।
तद्वदाशु सुरश्रेष्ठ यदि चेन्मय्यनुग्रहः।।३२।।

ब्रह्मोवाच

इदं गोप्यतरं विष्णोः कथयामि समासतः।
यतो नीलाद्रिसिंहस्य भक्तोऽसि नृपसत्तम[३३]।।३३।।
विद्यापतेरन्वयजो दंशपंचदिनेष्वपि।
शिताप्रपानकेर्विष्णुं स कर्पूरेश्च पूजयेत्।।३४।।
कालद्वयेऽपि नृपते निर्माल्यं नो बहिर्नयेत्।
श्रद्धाभक्तियुतश्चेत्वं वंशावरणवाह्यतः।।३५।।
सिता प्रापनके क्षिप्त्वा दुग्धसारं मनोहरम्
चिनतयित्वा परं ब्रह्म तदा तच्च समर्पयेत्।।३६।।
विद्यावसोरन्वयजा वंशा विद्यापतेस्तथा।
तदा दारुस्वरुपस्य विष्णोरंगात् पुनः पुनः।।३७।।
दत्तलेपनकादींश्च बहिः कुर्यात् शनैः शनैः।
षड्वासरमहिव्याप्य[३४] ततश्च सप्तमेऽहनि।।३८।।
सुवासितं च ततेलं मदिययस्तिलोद्भवम्[३५]।
अष्टमेऽहनि सृत्राणि पट्टस्य रुचिराणि च[३६]।।३६।।
बध्वा चित्रतरं विष्णोः सर्वाड़ नातिकल्पनाम्[३७]।
ततःसजतरोः[३८] क्षीरं शुष्कं संचूर्ण्य यत्नतः।।४०।।
सुवासितेसितलोद्भूतेस्तलैर्युक्तं च मर्दितम्[३९]।
तत्तृ पूर्ण हरेः[४०] गात्रे लिपेन्षज्ज्वा[४१] प्रकल्पने।।४१।।
नवमेऽहनि राजेन्द्र सूक्ष्माद्रांशुकपातनात्।
गोपयेत्तादृशं[४२] लेपं देवांगेषु चस सर्वतः।।४२।।
दशमे दिवसे प्राप्ते नैत्रेपट्टांशुकेः पुनः।
विष्णो सर्वागमाच्छाद्यततः शोणितकल्पना।।४३।।
चन्दनानि[४३] च[४४] कस्तुरीं कुंकुमं हितवालूकाम्।
तथा[४५] चन्दनसारं च सर्वकत्र पेषयेत्।।४४।।
एकादश्यां तथा विष्णोः सायंपूजानवसानतः।
ततो[४६] काहालघण्टादिध्वनो[४७] जाते मनोरमे।।४५।।
तच्चन्दनादिंकं विष्णोः सर्वाड़. गेषु विलेपयेत्।
तद्विलिप्य ततो मांसकल्पना स्यान्नृपोत्तम।।४६।।
द्वादशेऽहनि शुक्लानि दृढ़ानि वसनानि च।
दत्वा यत्नेन परमं लेपं दत्वा पुनदृढ़म।।४७।।

चर्मकल्पनामाकुर्य्यात्तसमाल्लेपविलेपनात्[४८]।
ततो भूप[४९] नवैः शुक्लेस्तथा[५०] दृढ़तरांशुशुकेः।।४८।।
श्रीहरेः पादरचनां कुर्यात्सुप्ते दृढ़ां[५१] तदा।
द्वादशेऽह्न जातेऽपि सार्ध्ययामे नृपोत्तम।।४९।।
घण्टमर्दलशंखानां५२ निःश्वने च पुनः पुनः।
तत्पादरचनाशबदो न केन श्रुयते यथा।।५०।।
तद् विधेयं नृपश्रेष्ठ तस्मिन् काले पुनः पुनः।
तस्याकर्ण्णनतः कर्णो जायते बधिरो यतः।।५१।।
अतस्तत् श्रवणं काय्र्य नोचितं नृपसत्तम।
अत्रेव[५३] तत्परा राजन् तव प्रतिनिधिर्नरः।।५२।।
कर्पूरं[५४] कठिनं लेपं सर्वागेषु पुनश्चरेत्।
चित्र विच्चतदा कुर्य्यात्तेषां लोमप्रकल्पने[५५]।।५३।।
त्रयोदश्यामिमं[५६] कर्म वर्ण्णैरेव विचक्षणः।
यथारूपं प्रकुर्य्याच्च तदा लेख्यं च सौख्यदम्[५७]।।५४।।
यथाविधि नृपश्रेष्ठ चित्रेचित्रयकर्मणा[५८]।
चतुर्दशदिने चापि तथा पंचदशे[५९] दिने।।५५।।
दिनद्वयेऽपि तत्कर्म चित्रं चारुतरं चरेत्।
जगदीशांगसम्बन्थि लेपयेच्चन्दनादिकम[६०]।।५६।।
निरोधनालयात्तस्माद्बहिश्कुर्यान्नृपोत्तम।
द्वादश्यामेव तद्वद्वातुम्यं निर्म्माल्यमादरात्।।५७।।
तद्देहलेनात्किंचिच्चन्दनं पापमोचनम्।
भक्त्या ये मनुजा शीघ्रं सेवन्तेऽत्र महीतले।।५८।।
कृष्ठादिरोगतो मुक्त्सतास्तथा निष्पापिनश्च ते।
सुखमत्यनतमाभुज्य चान्ते वेकुझठवासिनः।।५९।।
तस्माद् यत्नेन ल्लिपं नराः सर्वे महीतले।
द्वादश्यामेव गृहणन्तु परत्र हितकाम्यया।।६०।।
अथ पंचदशीघस्रे रात्रै यामत्रये गते।
स्नात्वाचायृर्यस्तदा शीघ्रं पट्टदेवस्य पूर्ववत्।।६१।।
स्नानमात्रं विद्यायाथ कृय्र्यात्तस्य विसर्जनम्।
प्रत्यर्चानां तथा कुर्य्याद्विसर्जनमतः परम्।।६२।।
पयर्यकहरणं[६१] कृत्वा त्वन्तरावरणं चरेत्[६२]।
अथ प्रक्षालयेदग्रे देवदेवस्य भूपते।।६३।।
पुनश्छत्रद्वयं घृत्वा घण्टादिध्वनिमाचरेत्।

गीतं नृत्यं तथा वाद्यं कारयेद्देवतापुरः।।६४।।
एवं महोत्सवे जाते नानावाद्यस्पुतरध्वनौ।
तत्र कालेऽपि सम्प्राप्य पूजको देवसन्निधिः[६३]।।६५।।
तच्चक्षरिति मन्त्रेण दद्यान्नेत्रद्वयं तदा।
दिव्ये नैत्रद्वये जाते विष्णोर्नेत्राम्बुजेऽनध।।६६।।
नैत्रोत्सवेऽपि[६४] भूपतस्वं[६५] तिष्ठेद्देवःपुरः स्वयम्।
तवाभावे प्रतिनिधिस्तत्र तत्पवरमानसः।।६७।।
हत्थिं नैत्रोत्सवे जाते विद्यापतिकुलोद्भवाः।
चतुःसमं हरेर्गात्रे लेपयेयुः समनततः।।६८।।
संलिप्य देवतानां च रतसृणां[६६] महुस्तनां[६७]।
वन्दापनां च कुर्य्यासुर्मवितलालसमानसाः[६८]।।६६।।
ततो वन्दापनान्ते च देवतानामुरस्तदा[६६]।
पृथक् पद्मं विलिख्याशु वर्ण्णैः पंचविधेस्तद्रा[७०]।।७०।।
पूजकस्तत्र पद्भेषु नवीनं कलशं न्यसेत्।
पृथक् तदन्तिके पूर्णपात्रं च स्थापयेतत:[७१]।।७१।।
द्विसहस्त्रपलेननैव विधिना स्नानकर्मणः।
पृथक् द्रव्याणि संरक्ष्य ततस्तुर्य्योपचारतः।।७२।।
मन्त्रेश्च विधिवत् भूप प्रतिबिम्बे हरेस्तदा।
स्नापयेत्पूजकः श्रेष्ठः सर्वकर्मविदांवरः।।७३।।
ततो मनसि संचन्त्यस भगवन्तं जनार्दनम्।
नवीनोखबस्त्रेण[७२] प्रोंछनं च समाचरेत्।।७४।।
ते ते[७३] च पूजकंश्रेष्ठाः धृत्वा तान् कलशान् पृथक्।
आपोहिष्ठेति मनत्रेण त्रिवारं सेचयेत्कु[७४] शै।।७५।।
देवान् पुनः समद्रयापः पिठित्वा मूलमन्त्रतः।
त्रिवारं च पृथकं तांयच सेचयेयुः सुसंयंताः।।७६।।
सहस्राक्षेति मन्त्रेण मन्त्रवित् पूजकोत्तमाः।
देवतानां स सर्वागे सेचयेयुः पुनः पुनः।।७७।।
अथाचायृर्यस्त्वग्निशर्मा ब्रह्मा च चन्दनेः पुनः।
क्रमेण लेपयेद्देवान् भक्तिभावसमन्वितः।।७८।।
दिव्येर्नव्याम्बरेर्माल्येरलंकारेर्मनोहरेः।
सुवेशं रनां कुय्र्याद्देवतानां महीपते।।७६।।
ततो देवाग्रतः क्षिप्रं पूर्ववनमण्डलं न्यसेत्।
चतुः पक्तितया तस्मात् पाकशालाप्रदेशतः।।८०।।

घण्टाकाहालयोर्जाते ध्वनो धृत्वा च छत्रकम्।
चक्रं पुरः प्रदेशे च धृत्वा नैवेद्यमानयेत्[७५]।।८१।।
आनीय पंक्तिमध्ये हि स्थापयेतत्र यत्नतः।
अग्निशर्मा ततो भूप चन्दनं माल्यमुत्तमम्।।८२।।
पीतवस्त्रद्वयं दद्याय् विष्णवे मुरजिष्णवे।
आचार्यर्यस्तु ततो भक्त्या प्रातःपूजनमाचरेत्।।८३।।
पूर्ववद्विधिना प्राक्तैस्तैरेवोपचारकैः।
ततः पूजावसानेऽपि पूर्ववत् परमेश्वरम्।।८४।।
वन्दापयेयुस्ते सर्वे कर्पूरवर्तिभिः पुनः।
क्षिप्त्वा दूर्वाक्षतान् सप्तवर्तिभिः पिष्ठवर्तिभिः[७६]।।८५।।
इत्थिं नैत्रोत्सवं कुर्यात् षोडशेऽहिन श्रियः पतेः।
क्षयोऽथवाऽथ वृद्धयां वा दशपंचदिनस्य च।।८६।।
प्रान्ते नैत्रोत्सवं प्रातर्विदधीत नृपोत्तम।
देवयोगान्नृपश्रेष्ठ त्रयोदशदिनात्मके।।८७।।
कृष्णपक्षे जायमाने तदैव श्रीजगत्पतेः।
अंगालस्यं प्रकुर्वीत दशपंचदिनावधि।।८८।।
द्वितीयायां तिथौ भूप कृत्वा नेत्रोत्सवादिकम्।
प्रातःपूजां प्रकुय्र्याद्वे ततो वन्दापनां चरेत्।।८९।।
घोषयात्रा च कर्तव्या जगतयसुपाविनी[७७]।
नेत्रौतसवदिने देवाज्जाते वीरविग्रहे।।९०।।
नेत्रोत्सवादिस्नानान्तं विधिं कुर्यात् प्रयत्नतः।
ततो दुग्धविकारोत्थिं विधिं कुर्यात् प्रयत्नतः।
ततो दुग्धपिकारोतिथं नारिकेलविकारजम्।।९१।।
नैवेद्यं तत्र सम्पाद्य पूजयेच्च यथाविधि।
प्रातःपूजा विधातव्या विना पक्वान्नमृत्तमम्।।९२।।
वन्दापनां ततः कुर्यादाज्ञामालयं रथान् प्रति।
दत्वा रथान् समानीय त् प्रतिष्ठां समाचरेत्।।९३।।
मुक्त्यननतरत्तरे भूप महास्नानंविधिं ततः।
कृत्वा ततोऽर्चचेद् विद्वान् पूर्ववत्पाकसम्भवैः।।९४।।
नैवेद्यस्तोषयेद्देवं माधवं देवकीसुतम्[७८]।
एवं नैत्रोत्सवे जाते देवेदेवस्य चक्रिणः[७९]।।९५।।
यथैव घोषयात्रासौ कर्तव्या तां वदामि ते।।९६।।

सूत उवाच

ये पश्यनित नवीननीरदचये श्यामाभिरामाकृते।
विष्णोस्तस्य परात्मनः परमया भंकत्यामि नैत्रोत्सवम्। (६७)
ते नूनं भवसागरस्य सहसा सन्तीर्य लोकोत्तमाः[८०]।
सत्कारं[८१] सुरदुर्लभं पदमहो तद् वे हरेर्भो द्विजाः।।६८।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्मये[८२]
नेत्रोत्सववर्णनं नाम पंचदशोऽध्यायः।।

FOOTNOTES

१ B श्च तं। २ M न्येवं। ३ B, K, M, U नोक्तं तु। ४ B वदांशु। ५ B चित्रेव, K, M, U चित्रेर्नि, B चित्रेणि। ६ B वर्ण्णमुत्तमं। Ms. B read sl. 8a as शंख चक्रं च मुखलं लाघ्ंल च चतुर्विधम। ७ B, K, R, U संलिख्य, M संलिख्य। ८ K, R विविधे। ९ R शोमनं। १० B रम्यं। ११ R प्रमाणतः। १२ B दूय्यां। १३ K, M, R करां। १४ B, K, R, U भूषणं। १५ B, K, M, R, U पट्टे। १६ B, K, M, R, U तादृशे। १७ B, K. M, R तत्र। १८ B भ्रामयित्वाऽथ। १९ K, R तायतेय् परां। २० B, K, R प्रतिरूपं च। sl. 22a is absent in B, K, R. sl. 22b and sl. 23 are absent in M, U. २१ १ B नहि। २२ १ B जगत पते। Mss. M, U OMit sls. 24 and 25. After sl. 25, the following verse is present in B, K, R. मध्याह्नपूजां च पूलकः पूर्ववच्छुचिः। २३ M वाचान्। R वासरात्। २४ B, K, U दारुरूपा। २५ B, M च। २६ B, K, M काय्र्या। २७ B पच्यन्ते। २८ K पट्टे। After sl. 30a, the following verse is present in B, K, R -

पूजकः पूजयेद्देवान्नाय तत्राधिकः क पुमान्। (क) नान्यस्तत्रार्चकः

२९ B उत्सवानपि, K, M, R, U नोत्सवानपि। ३० B, K, M, R omit च। ३१ B, K, M, R; U स्थापनं। ३२ च is absent in B, K, M, R, U. 33 B, K त्वं नृपोत्तम। ३४ B कर्तव्या। ३५ M मर्दये, K मदियेयु। ३६ B, K, M, R, U वे। ३७ B, K नाडि। ३८ R सर्वतरोः। ३९ R मर्दयेत्। ४० B, K, R तरं। ४१ B, K, M, R, U लिपेन् मज्जा। ४२ K, M, R, U शोषये। ४३ K चन्दनादिंश्च। ४४ is absent in B. च। ४५ B तीथौ। ४६ K ततः। ४७ B ध्वनौ। ४८ B विलेपयेनात्। ४९ B.M पुनर्नवे, K, R, U पुनर्नव्येः। ५० स्तथा is absent in B, K. M, R, U। ५१ M कुय्र्यास्युस्त दृढ्ं, K, R कुय्र्यायुस्ते दृढं, U कुय्र्यात्सुप्ते दृढं। ५२ K. M, R, U घण्टा। ५३ B, K, R तंत्रैव। ५४ K, R, U कर्पूरकठिनी। ५५ R प्रकल्पयेत्तमं, K प्रकल्पनं। ५६ K, M, R मिदं। ५७ K, U सौख्यदं। ५८ K, M, R. U विचित्र। ५९ U पंचदश। ६० B. K, R लेपनं, U लेपचन्दनकादिकं। ६१ After sl. 62, the following verse is present in K. लक्ष्मीं चात्रिं माधवं च प्रत्यर्चा स्वपदे न्यसेत्। ६२ K, U पर्या!र्याड्का। ६३ B, K, M, R, U हरेत्। ६४ K, M, R, U संनिधिं।

६५ B, R, U यत्रोत्सवे। ६६ B भूपत्वं। ६७ K, M, R, U चतुसृणां। ६८ B, K, M, R मुदा नृप। ६९ K मानसः। ७० K, R, U देवतानां पुरस्तदा। ७१ U स्तथा। ७२ B, K, M, R, U स्थापये नृप। ७३ B नवीनोत्तत्, K नवीनोत्तर। ७४ B, K, M, R, U ततस्ते। ७५ B, K, R, U सेचयेत् कुशैः। ७६ B, K, R मादरात्। ७७ R पिष्टिक। ७८ B सुपावनी। After sl. 91, the following verse is present in B, K, M, R, U -

लालाविकारजं तावचछर्करराणां विकारजम्।

७९ B, K, M, R, U देशिकोत्तमः। ८० B, K, R शङ्गिणः। ८१ K, M, R, U लोकोत्तमा। ८२ M, R, U शंतार, गतारः। ८३ M पूर्ववत्।

षोडशोध्यायः

इन्द्रद्युम्न उवाच

नेत्रोत्सवान्ते भो ब्रह्मन घोषयात्रा यथा भवेत्।
तथा कथय लोकेश चतुर्मुख नमोऽस्तु ते।।१।।

ब्रह्मोवाच

इन्द्रद्युम्न जगत्यस्मिन् विष्णाः प्रीत्रिकरां पराम्।
तादृशीं महतीं यात्रां को वक्तुं भुवि च क्षमः।।२।।
अहं वा वासवो वापि शिवो वा ऋषिसत्तमाः[1]।
सम्यग्वक्तं[2] न शक्तासते न केऽपि श्रीपतिं विना।।३।।
अतो वक्ष्ये समासेन तव भूप वराग्रतः।
आषाढस्य च मासस्य शिते पक्षेऽतिपावने।।४।।
द्वितीयायां तिथो तावद् घोषयात्रा विधीयते।
सार्द्धयामद्वयेऽतीते क्षपायाः क्षितिपोत्तमः।।५।।
द्वितीया प्राग्दिने कुर्यात् निद्राभंगा हरेः प्रभोः।
निद्राभंगे जायमाने विश्वासुकुलोदभवाः।।६।।
तथा विद्यापतेर्वशाः[3] पूर्वज्जगतां पतिम्[4]।
सर्वागगलयेयुस्ते[5] वस्त्रादिभिरतिदृढम्।।७।।
नित्यस्नानं ततः कृत्वा प्रातःपूजां तथाऽचरेत्।
पूजान्ते तत्र तत्कुर्यान्मंगलारोपणं नृप।।८।।
पूववते नृपश्रेष्ठ पूजकासतत्ववेदिनः।
कुर्ययासुः पूजनं विष्णोर्यथाविधि तथा फलम्।।९।।
ततस्तावत् प्रसूनामंजलिं च क्षिपेद् भवान्।
भक्त्या परमया चोतिथं[6] देवानां पुरतो वदेत्।।१०।।
लक्ष्मीपते जगन्नाथ भक्तानुग्रहकारक।
घोषयात्रोत्संवार्थ भो गमनं लीलया कुरु।।११।।
घोषयात्रा च कर्तव्या प्रतिवर्ष समादरात्।
इत्याज्ञां हृदये दत्वा भवतः कमलमपतेः।।१२।।
इत्युक्तवा तं विभुं भूयो भवान् वे प्रणमेत्तदा।
ततस्तूलीप्रसरणं कृत्वा मार्गे मनोरमे।।१३।।
काहालयन्खवीणादि स्फृरद्घण्टावलिध्वनो।
मृदंगकोंस्यतालनां शंखानां च महत् स्वनम्।।१४।।

कारयसेदतियत्नेन चारु चामर चालनम्।
चन्द्रमण्डलसंकाशं छत्रं च श्यामलं तथा।।१५।।
सूर्यचन्द्रान्तिं त्रासं मेघाडम्बरमुत्तमम्।
एतत्सर्व पुरो विष्णोर्धारयेन्नृपसत्तम।।१६।।
भक्तानां जयशब्देश्च करतालोत्तमस्वनैः।
गीतैः नृत्येश्च वाद्येश्च विप्राणां सुतिनिःश्वनैः।१७।
काले तस्मिन जगन्नाथं चालयुयुः शनैः शनैः।
सुदर्शनं पुरस्कृत्य बलभद्रं ततः परम्।।१८।।
सुभद्रां च ततो नीत्वा जगदीशं सुरेश्वरम्।
नानालेकारसंयुक्तं त्रैलोक्यसुखदायकम्।।१९।।
रथं प्रदक्षिणं कृत्वा सीपयेदरुणोदये।
रथमध्येऽपि संस्थाप्य महोत्सवतया तदा।।२०।।
सुभद्राया रथे चक्रं स्थापयेन्नृपसत्तम्।
रामकृष्णो शीरपाणेः स्थापयेद्रथसत्तमे।।२१।।
शोभने स्यन्दने दिव्ये जगदीशस्य मापतेः।
श्रीकृष्णं स्थापयेतत्र नानालंकारसंकुले।।२२।।
अथ पुष्पांजलिं दत्तवा चन्द्रा रात्रिकमाचरेत्।
ततो राजन् भवान् भक्त्या रथानां मार्जनं चरेत्।।२३।।
चन्दनाम्भश्च सर्वख तद्रजश्च क्षिपेन्नृप।
संस्थाप्य माल्यं वसनं भक्तिश्रद्धासमन्वितः।।२४।।
रथापरि नृपश्रेष्ठ क्षीरतण्डुलकेन च।
चतुर्दिक्षु बलिं दद्यादाचार्यर्यस्तु तदानध।।२५।।
पूर्वन्नारदस्येव बलिकर्म समाचरेत्।
चालयेन्नृपतिश्रेष्ठ श्रद्धया च तदा रथान्।।२६।।
प्रासादाद् यज्ञवेद्यन्तं यावन्मार्गो हि वर्तते।
तच्छोमां रचयेद्राजन् भक्तिश्रद्धान्वितो भवान्।।२७।।
शोभमानेर्वितानेश्च माल्येर्वस्त्रेर्मनोहरेः।
निवारितातपे मार्गे निर्मलं परिमंजुलि।।२८।
चलच्चामरवृदानां वायुना शीतले पथि।
नानापताकावलिभिः शोभमाने मनोरमे।।२९।।
घण्टामृदंगमधुरीएक्कादिध्वनिपूरिते।
एवंविधे पथि वरे चालयेद्रथसत्तमान्।।३०।।

सर्वत्र धूपयेद्द्व्येश्चंचद् गन्धेर्मनोहरेः।
चित्रचिच्चजनः कश्चिच्चित्रकर्म समाचरेत्।।३१।।
यथायोग्यं चरेद् भूप तत्त्द्वर्णानुमानतः।
ततः पंचाभृतेस्तेस्तु संस्नाप्य जगतांपतिम्।।३२।।
वस्त्रेर्माल्येश्च भूषभिर्मूषयेतान् सुरान्नृप।
रथोत्सवाग्रपूजां च पूर्ववत्परिकल्पयेत्।।३३।।
एतत्पूजावसाने च कुर्यान्नृप पुनः प्रभो।
महास्नानविधिं तावद् यथाविधि स पूजकः।।३४।।
सर्वागे लेपनं कृत्वा वस्त्रमाल्ये तातेऽर्पयेत्।
भूषयित्वा च मध्याह्नपूजां कुर्यात् सु भक्तितः।।३५।।
दुग्धानां नारिकेलानां लाजाशर्करयोस्तथा।
कवकारांश्च परं कुर्याद्रथे। मध्याह्नपूजने।।३६।।
गोधूमचूर्णेः क्षीरेणामिक्षया नृपसत्तम।
धुताग्नियोगतः पूपान्नानावर्ण्णान् प्रकल्पयेत्।।३७।।
दद्यान्मुरारये भक्त्या रथे पथि चरेन्नृप[1]।
पयः पेटीसमूहं च तथा दिव्यप्रपानकम्।।३८।।
पक्वरमाफलान्येव चाम्राणि पयसानि च।
स्वादूनि विष्णुयोग्यानि कन्दान्दलानि[2] तानि वे।।३६।।
नारिकेलान् द्रवयुतान् मुंगागुरचयानपि।
धौतमुंगानि तान्येव तथाऽन्श्यच मनोरमम्।।४०।।
तादृशं वरनैवेद्यं मध्याह्नपूजनेऽर्पयेत्।
मार्गे तस्मिन् मनोरम्ये तण्डुलाननं विनानध।।४१।।
मुंगाकुरादि यत्सर्व केशवाय समर्पितम्।
रथे तदन्नवद् ग्राह्यं त्रिदशेरपि सत्तम।।४२।।
अत्रं शंका न कर्तव्या न कर्तव्या कदाचन।
ततो मध्याह्नसमये मार्गमध्ये रथान्यसेत्।।४३।।
स्थापयित्वा रथांस्तत्र शीतद्रव्येश्च पूजयेत्।
चामरैः ता़लवृन्तेश्च वीजयेच्च जनार्दनम्।।४४।।
मार्गे विश्रान्तिमाचय्र्य याममात्रं सपादकम्।
चालयेद्रधवय्र्याश्च रात्रिश्चेत्सयान्नृपोत्तम[3]।।४५।।
ज्वालासहस्ररचनां कुयर्याद्दीपांश्च भक्तितः।
तथा चन्द्रपद्रीपानां ज्वलनं रचयेत्ततः।।४६।।

माग्रशेषं नयेद् भूप रथोपरि पुनः प्रभोः।
सायाह्नपूजनं कुर्यात्पूर्ववद् विधिना द्विजः।।४७।।
सायं पूजावसानेऽथ भवान् भूपति भक्तितः।
पुषांजलिं पृगृह्याशु ततो विज्ञापयेद्धरिम्।।४८।।
यज्ञवेदिरियं विष्णोजन्मभूमिस्तव प्रभो।
पूर्वं त्वया भगवता सप्ताह मण्डपोत्तमे।।४६।।
तिष्ठेयुरित्याज्ञा[९] दत्ता ततो[१०] याहि जगत्पते।
इति सम्प्राथृर्य देवेशं नयेच्दीघ्रं यथाक्रमम्।।५०।।
रथ्रप्रान्ते नृपश्रेष्ठ देवान् संरक्ष्य पूर्ववत्।
ब्रह्मा वन्दानां कुर्यात्ततः शीघ्रं नयेत्सुरान्।।५१।।
महावेदीं ततो नीत्वा स्थापयेदतियत्नतः।
महावेदीस्थले विष्णुं दारुब्रह्मस्वरूपिणम्।।५२।।
संरक्ष्य विधिना तत्र विद्यापतिकुलाद्भवाः।
वन्दापयेयुर्देवागात्ततो वस्त्रादिकं शनेः।।५३।
बहिश्कुर्याद्दिवतानाभगं[११] प्रक्षालयेन्नरः।
प्रासादान्तः समत्त्ताद्वे धूपं दद्यात्सुगन्धिभिः।।५४।।
महास्नानं हरेः काय्र्य पूर्ववद् विधिनार्चकेः।
चतुःसमे विलिप्याथ दिव्यनव्याम्बरेस्ततः।।५५।।
माल्येरतुलयरचनेलंकारेर्मनोहरेः।
भूषयेज्जगदीशं तं बलभद्रं[१२] तथा नृप।।५६।।
महावेद्यां पाकशालां द्योतयेच्च त्रिवारतः।
शोमयोदकजालेन सुधारसजलैस्तथा।।५७।।
परिष्कृत्य ततस्तत्र सामानयविधिना नृप।
प्रतिष्ठां[१३] च समाचय्र्य वैष्णवाग्नो च संहुनेत्।।५८।।
अग्नो सहस्रं जुहुयान्मूलमन्त्रेण तत्परः।
पूर्णाहुतिं ततो दत्त्वा पाकाकारान्वदेस्तदार[१४]।।५६।।
चतुर्थकालपूजायां यद् योग्यं तदृतं कुरु।
हत्युक्त्वा पूजकसतत्र गच्देत्स देवतान्तिकम्।।६०।।
पाककर्ता ततः कुर्याद् यथायोग्यं च रन्थ्रनम्।
ततः प्रतिनिधिस्तत्र प्रतिशीलनमाचरेत्[१४]।।६१।।
महावेद्यातवग्निकोणे मन्दिरे च[१५] मनोहरे[१६]।
प्रत्यर्चा तत्र संस्थाप्य सामान्यविधिनार्चयेत्।।६२।।

गीतनृत्यादिकं तत्र कारयेच्च मनोरमम्।
तत्साप्य ततो विष्णोः जगन्नाथस्य भूपते।।६३।।
ततश्चतुर्थकालाग्निं[१७] विदधीत यथाविधि।
स्वापयेद् विधिवद् भक्त्या महावेदीस्थले नृप।।६४।।
प्रातः पूजावसानेऽथ महास्नानं समाचरेत्।
ततोऽर्चकस्त्वग्निशर्मा ब्रह्मा च चारुवन्दनैः।।६५।।
चतुःसमं[१८] च संलिप्य नब्य[१९] चीनाम्बरेहरिम्।
अलंकारेश्च माल्येश्च भूषयेत्परमेश्वरम्।।६६।।
दिव्यभोगेः[२०] समं भोगं पूर्ण चारुतरं तथा।
कुर्यात्प्रतिदिनं तत्र ह्येवमासप्तवासरम्।।६७।।
तालध्वजे रथे दिव्ये लागलं ध्वजमुत्तमम्।
नन्दिघोषरथस्यास्य ध्वजं तार्क्ष्य तथा नृप।।६८।।
सुमद्रया रथ्शो पद्मध्वजं च पूजयेत्तथा।
पंचोपचारतो नित्यं त्रिकालार्या प्रसादतः।।६९।।
तत्सप्तदिनमाभ्य ध्वजपूजा विधीयते।
रथेषु कुत्सिता जीवा न विशेयुर्यथा नृप।।७०।।
तदा तथा च कर्तव्यं त्या च परमादरैः।
तेषां प्रवेशे यावद्वे महादोषो[२१] भवेद्ध्रुवम्।।७१।।
रथप्रतिष्ठां च पुनः कुर्यादार्यर्यनोत्तमः[२२]।
अनेन[२३] यिथिना राजन् महाविद्धयुत्सवं हरेः।।७२।।
प्रत्यवृद[२४] रचयेद्राजन् भक्तिश्रद्धान्वितो भवान्।
महावेद्यां नरो यस्तु कृष्णं भद्रां वलं तथा।।७३।।
पश्येत्भावातसवा[२५] भक्त्या शुद्धसत्त्वमना मुदा।
वाजपेयसहस्रस्य फलं प्राप्नोत्यसंशयम्[२६]।।७४।।
महावेद्यामहं द्रक्ष्ये मनसा चिनतयेत् तु[२७] यः।
सोऽश्वमेधसहस्रस्य फलं प्राप्नोति मानवः।।७५।।
शेषे गच्छेत्परं स्थानं पश्यतां किं वदाम्यहम्।
इन्द्रद्युम्नसरस्तीरे विधाय मुण्डनं नृप।।७६।।
स्नात्वा तत्र यथान्यायं कृत्वा च तर्पणादिकम्।
यज्ञवेद्यां जगन्नाथं वलं भद्रां सुदर्शनम्।।७७।।
सकृद् दृष्टवा विमुक्तः स्यासत्किमन्यैः बहुभाषणैः।
नीलाद्रो दशवर्षाणि त्रिकालार्चा सुसंयतः[२८]।।७८।।

विष्णोदर्शनतो यच्च फलं भवति भूपते।
तत्फलं समवाप्नोति महावेद्यां निरीक्षणात्।।७९।।
एकाहमपि[२९] चेद्रात्रो विष्णोस्तस्य निरीक्षणात्।
तसमाद्दशगुणां[३०] प्रोक्तं प्राप्युयात् फलमुत्तमम्।।८०।।
दिवा रात्रो च सन्धयायां ये पश्यन्ति नरोत्तमाः।
वैकुण्ठवासिनस्ते स्युः कल्पकोटिषु भूपते।।८१।।
पूर्वमण्डपमुत्सृज्य परमण्डपवासिनम्।
रामं कृष्णं सुभद्रां च पश्यतां नास्ति दुर्गतिः।।८२।।
सप्तवासरमालम्ब्य गृहमुत्सृज्य तत्र वे।
भक्त्या परमया स्थित्वा मुहुः पश्यनित तान् यदा।।८३।।
तेषां[३१] पुण्यफलं[३२] भूप संख्यातुं कः क्षमो. भुवि।
ये नरा भक्तिभावेन भगवनतं[३३] सुरोत्तमम्।।८४।।
समर्प्य बहुलं भोगं ततो ि,जान्।
देषां कोटिफलानि स्युस्तेषु प्रीतो जगत्पतिः।।८५।।
इत्थिं तदा महावेद्याभुत्सवो जायते क्षितो।
तत्पश्यतां नराणां च मुक्तिः स्यान्नात्र संशयः।।८६।।
रथोत्ववस्य तस्येव पंचमेऽह्नि नृपोत्तम।
मध्याह्नपूजनप्रान्ते विष्णोर्हस्ताड्.घ्रिकल्पनाम्।।८७।।
कुर्यादाय्र्यास्तो दिव्येर्नानालंकाररशशिभिः।
वस्त्रमाल्यादिभितावद् वेशं कुर्यानमनोहरम्।।८८।।
एवं वेशे जायमाने ततः सन्ध्याच्रनं चरेत्।
अथ नीलाचललक्ष्मीं नानाभूषणभाषिताम्।।८९।।
नानारत्नमये याने नयेतत्र नृपोत्तम।
काहालदत्रघण्टादि दिव्यवासः[३४] स्फुरत्पुरः।।९०।।
उभयोः पाश्र्वयोस्तावत्संगे· शिवगणेर्युताम्।
महोत्सवतंया तु तत्रेव ततो वन्दापयेच्च माम्३५।
दीपोपचारसमये सन्ध्यायां च रमापतेः।।९२।।
काले तस्मिन् महालक्ष्मीं स्थापयेदग्रतः प्रभोः।
उत्तार्य देवतांगत्तन्माल्यं पात्रेषु रक्षितम्।।९३।।
पूजायाः पूर्वतस्तस्याः श्रियः स्नतोषणेऽर्चकः।
विद्यापत्तिकुलादभतः करे तन्मालयमादरात्।।९४।।
मालामानीय सहसा तस्यायचैवापरि न्यसेत्।

दिनत्रये जगन्नाथो गमिष्यति पुनर्गृहम्।।९५।।
नीलाचले त्वमद्येव गच्छ लक्ष्मी दुतं शुभे।
इत्युक्त्वा स च विप्रस्तु तूर्ष्णीं तिष्ठेन्नृपोत्तम।।९६।।
यत्रास्त्रे माधवः श्रीमान् विश्वधात्र्या समं तदा।
तत्रैव स्थापयेल्लक्ष्मीं मानीय च तपोधन।।९७।।
गुण्डिचासौ महायात्रा ख्याता नवदिनात्मिका।
तस्यामत्र रमां पृथ्वीं माधवं पूजयेत्तदा।।९८।।
नीलाचलं च नो कुर्यात् शून्यं विष्णो निदर्शतः।
ततो नीलाचले रक्षेद्धरां पद्मं च माधवम्।।९९।।
नियोज्येन्निजस्थने तांश्च पद्मनुगानं शिवान्।
ततः षष्ठीदिने प्राप्ते प्रातः पूजावसानतः।।१००।।
आचार्य्या देवदेवांगान्मालयं संगृह्य यत्नतः।
दक्षिणाभिमुखं कर्तु रथत्रयमनिन्दितम्[३६]।।१०१।।
आज्ञां देहि जगन्नाथ गन्तुं नीलाचलं प्रभो।
इत्युक्त्ववा तर्ण्णमागत्य[३७] रथान्तिकतले स्थिताः।।१०२।।
पातयामासुरतुलां मालां ते स्यन्दनोपरि।
एवं विधिं प्रकृत्याथ ततो दक्षिणादिङ्.मुखम्।।१०३।।
रथत्रयस्य संचक्रे जनः कश्चिन्नृपोत्तम।
अष्टमसय दिनसयापि पूर्व[३८] रात्रो नृपोत्तम।।१०४।।
गते यामे सपादे च निद्राभंग हरेश्चरेत्।
कृत्वा पर्ववदाश्चर्य काष्ठांशुकनिबन्धनम्।।१०५।।
रचयित्वा तदा क्षिप्रं नित्यस्नानं चरेद् विभोः।
वस्त्रालंकारजालेन भूषयित्वा पुनर्विभुम।।१०६।।
प्रातः पूजनमाचय्र्य मंगलारोपणं पुनः।
कुर्य्याद्राजन् भवान् भूयः पुष्पांजलिसमर्पणम्।।१०७।।
कृत्वा प्रस्थापयेन्नीलगिरिं प्रति सुरेश्वरम्।
दक्षिणद्वारमासाद्य पूर्ववन्नृपसत्तम।।१०८।।
दक्षिणाभिमुखे देवे तद्वनदापनामाचरेत्।
महोत्सवतया तत्र रम्ये कांचनमण्डिते।।१०९।।
नानालंकारसंयुक्ते मेरुश्रृंगसमन्विते।
लसच्च्चक्रसमूहेऽस्मिन् पश्यज्जनसुखप्रदे।।११०।।
नव्यनीददघोषेऽस्मिन्[३९] नन्दिघोषे मनोरमे।

नानादिव्याम्बराच्छन्ने राजमानेऽतिपावने।।१११।।
घण्टा चामरवृन्दाढ्यैः नानारत्नसमुजज्वलेः।
तादृशे च रथे दिव्ये स्थापयेत्परमेश्वरम्।।११२।।
अरुणोदयवेलायां पद्रक्षिणतया पुनः।
रथ्रे निवेश्य देवेशं चालयेद्रधसत्तमान्।।११३।।
पूर्ववद् द्रधवर्य्येषु सेवां कृत्वा जगत्पतेः।
चालयित्वा रथान् शीध्रं पूववनमार्गमध्यतः।।११४।।
विश्रामयेद् बहुतरं तत्र नैवेद्यमुत्तमम्।
शीतलद्रव्यनिचयं महोत्सवतयाऽपर्यत्।।११५।।
उत्तराभिमुखे जाते तथा दक्षिणादिङ्.मुखे।
रथत्रये जनो यस्तु भक्तिश्रद्धान्वितः परम्।।११६।।
रामकृष्णं सुभद्रां च पश्येनमार्गे रथे स्थितम्।
पदे पदेऽश्चमेधानां फलं प्राप्य महीतले।।११७।।
मनोरथफलान्येवं लब्ध्वान्ते मोक्षमाप्नुयात्।
रथघोषं समाकर्ण्य ये हृष्यन्तिं नरोत्तमाः।।११८।।
रथच्छायां समालम्ब्य भक्तिश्रद्धान्विता यदा।
ब्रह्महत्यादिपापेम्यो मुक्ताः स्युर्मवबन्धनात्।।११९।।
रथानुनामनं येवै कुर्वन्ति द्विजसत्तमाः।
तेषां च वन्दनं भूयः करि सुराः दिवि[४०]।।१२०।।
रथानुगमनं तत्तु भजते परमं पदम्।
बहुनात्र विभुक्तेन[४१] रथोत्सवविलोकनात्।।१२१।।
मुक्तिर्भवति वे पुंसां सन्देहोऽत्र न विद्यते।
घोषयात्रोत्सवे जाते जगत्तयजनाकुले[४२]।।१२२।।
स्पृष्टास्पृष्टभवो दोषो नास्ति तत्रपोधनः[४३]।
रथापरि स्थिते दिवये[४४] काकोलूको च गृध्रकः।।१२३।।
चिललकश्च यदा देवातसंविशेत्पथि भूसुराः।
नैवेद्यसमये यावत्तदा तत्तु बहिः क्षिपेत्।।१२४।।
बृहद्विधिंविधानेन महास्नानं चरेद् हरेः।
चतुः[४५] समेन लेपेन लेपयेद्देवतांगकम्।।१२५।।
नवांशुकेश्च भूषाभिर्भूषयेनमाल्यजालकेः।
षण्णां[४६] रसानां तेर्दिव्यैर्नैवेद्येसतोषयेद्धरिम्।।१२६।।
कुर्यात्तद्दोषशान्तिं च भूलेन मनुना हुनेत्।

लक्ष्यमात्रं गवामायेर्होमादि पूजकसतदा।।१२७।।
आदौ सकल्पय विधिवत्कृत्वा[४७] वरुणपूजनम्।
आचाय्र्यब्रह्मवरणं स्वस्तिवाचनपूर्वकम्।।१२८।।
वेष्णवाग्निविधानेन कृत्वाग्निं पूजयेद् द्विजः।
गन्थादिविधिना तत्र मूलेन मनुना ततः।।१२६।।
तन्मनोश्चैव गायत्र्या लक्ष्मयात्रं हुनेत्सुधीः।
अभावे चद्य तदर्द्ध स्यात्तदभावे तदर्द्कम्।।१३०।।
पूर्ण्णाहुतिं ततः कृत्वा हेमभूम्यादिदक्षिणाम्।
दत्वा बहुविधां दिव्येः गदिता मुनिपुंगवेः।
शान्तिं विना महान् दोषो दोषाद्राजासाय
राज्ये दुर्भिक्षमरणं[५०] क्लेशं स्यान्नात्र संशयः।
एतच्छान्त्याः देवतायाः सन्तोषो भवति द्विजाः।।१३३।।
अतः सन्तोषतो भद्रं राज्यस्य च नृपस्य च।
देवताया विभ्रमेण पूजने स्यन्दनेऽथ वा।।१३४।।
काकादीनां यदाविशे शान्तिरेषा विधीयते।
अतो महोत्सवतया रथानीय चाान्तिकम्।।१३५।।
देव्या मरीचिकायाश्च ततो नीलाचलाद्रमाम्।
नानालंकारसंयुक्तां दिवयमाल्याम्बरानिवताम्।।१३६।।
वासयित्वा दिव्ययाने नानारत्नसुशोभने[५१]।
छत्रचामरघण्टानि काहालाद्युत्सवे कृते।।१३७।।
रथान्तिकं समानीय जगदीशपुरः स्थले।
हस्ते धृत्वा तु तां लक्ष्मीं परस्परविलोकनम्।।१३८।।
भ्रामयित्वा[५२] हरेरंगानमामानीय मंजुलाम्।
दद्याल्लक्ष्म्ये तदा शीध्रं भ्रामयित्वा रथं नृप।।१३६।।
महोत्सवतया[५३] लक्ष्मीं प्रासादं तु ततो नयेत्।
प्रासादस्य[५४] पुरो द्वारि रथवय्र्यान्निवेशयेत्।।१४०।।
सायंपूजा रथेष्वेव कर्तव्या सावधानतः।
तदन्ते नृपतिश्रेष्ठ दत्त्वा[५५] पुष्पांजलित्रयम्।।१४१।।
दत्वा रथाग्रतो रक्षेतं तदा कमलेक्षणम्।
ततो लक्ष्मीं समानीय तृतीयावरणान्तिके।।१४२।।
महोन्नते मण्डपेऽस्मिन् पश्यतां[५६] विष्णुसम्मुखे।
ततो विद्यापतेर्वश्यः[५७] पूर्ववत्सुरपुंगवान्।।१४३।।

नीराजयेत्तदा क्षिप्रं क्षितिनिर्वरसत्तमाः।
ये च मर्त्याः प्रपश्यन्ति तद्वन्दापनमुत्तमम्।।१४४।।
पश्यन्तो[५८] वाजिमेधानां लभनते फलमुत्तमम्।
मनोरथस्य संसिद्धिः प्रीतो विष्णुस्तदा भवेत्।।१४५।।
शेषे यान्ति हरेर्धाम क्लेशवलेविवर्जितम्[५९]।
नीलाम्बरस्य भद्रायास्त्वादो वन्दापनां चरेत्।।१४६।।
पश्चाद्रमायासतद्विष्णोः कुर्य्यान्नीराजनं परम्।
सुदर्शनं पुरष्कृत्य[६०] पूर्ववद् देवतात्रयम्।
शनैः शनैश्च नीत्वाथ वैनतेयाग्रतः स्थितम्[६१]।।१४८।।
दक्षिणाभिमुखं कृत्वा पूर्ववद् विजितेन्द्रियाः।
वन्दापनां समाचर्य्य रामं भद्रां सुदर्शनम्।।१४९।।
रत्नसिंहासने दिव्ये नानाशर्मप्रदे शुभे।
लसद्धितानजालेऽसिम्न् पूर्ववत्[६२] स्थापयेतसुरान्।।१५०।।
दक्षिणाभिमुखे विष्णोर्वैनतेयपुरः स्थिते।
तद् वन्दापनामालोक्य पद्मा गतवा जबात्ततः।।१५१।।
कौतुकाद् द्वारमावृत्य तिष्ठेत्तत्क्षणमुत्तमाः।
वैनतेयाग्रतसतस्मानमन्दं मन्दं नयेत्पुनः।।१५२।।
जगन्नाथं सुरश्रेष्ठं तद्द्वारं प्रति सत्तमाः।
तदा घण्टादिवाद्यानां वारयेद् ध्वनिमुत्तमम्।।१५३।।
विद्यापतेः कुलश्रेष्ठो द्वारपान्ते स्थितः स्वयम्।
उत्पोटनं कवाटस्य कर्तु[६३] लक्ष्मीं तु[६४] पार्षदाः।।१५४।।
ततो लख्मीपरिजनो विहाय नीलभूंधरम्।
गुण्डिचामण्डपं तावद्गतमत्र किमसित भो।।१५५।।
इत्येवभुक्त्वा द्वारस्य मोचनं कृतवांस्तदा।
प्रासादान्तस्ततः किंचिन्नीत्वाथ कमलमपतिम्।।१५६।।
उत्तराभिमुखं कृत्वा रमां दक्षिणदिङ् मुखीम्।
रचयित्वा च यो राजन् परस्परनिरीक्षणम्।।१५७।।
मिथः शरीरवसनग्रान्थियोजनमाचरेत्।
विवाहसपतदिवसे मंगलामरणं हृदा।।१५८।।
संचिन्त्य युगपद् भक्तया तयोर्वनदापनां चरेत्।
ततो वन्दापनान्ते च सुवासितजलं पुनः।।१५९।।
पक्वं[६५] ताम्बूलचियं ताम्यां दद्याच्च भक्तितः।

तद्वसत्रग्रन्थिश्लथनं[६६] कुर्य्यात्तावन्नृपोत्तम।।१६०।।
ततो नीलाचले रम्ये स्वपदे स्थापयेद् विभुम।
इत्थिं श्रीजगदीशसय गुएिडचा नामधारिणी।।१६१।।
यात्रा पवित्रा जगता त्रिविधा वयवानितवा।
गुण्डचा गुण्डिचेत्येवं ये जलपनित नरोत्तमाः।।१६२।।
ते सर्वे सर्वयज्ञानां प्राप्नुवन्ति फलं महत्।
भववनधाद् विमुक्तास्ते गुण्डिचा नाम कीर्तनात्।।१६३।।
पश्यतां भक्तिभावेन न जाने किं फलं नृप।
अथ तस्मिन् जगन्नाथे नीलाचलपतो प्रभौ।।१६४।।
नीलाद्युत्सवमाचय्र्य विष्णोर्वन्दापनां चरेत्।
देवतागतु वस्त्राणि माल्यालंकारसंचयम्।।१६५।।
बहिष्कृत्य ततः शीघ्रं देवानां परि द्योतयेत्।
महास्नानं ततः कुय्र्याद यथाविधि नृपोत्तम।।१६६।।
सर्वागलेपनं कृत्वा नवीनाम्बरमर्चयेत्।
दिव्यमाल्यानि देयानि भक्तिश्रद्धान्वितः शुचिः।।१६७।।
चतुर्थकालपूजां च कृत्वा विधिवदर्चकः।
ततो नक्तं विसृज्याशु सर्वास्तांश्च दिवोकसः।।१६८।।
पूर्वतस्नापयेद्देवान् दिव्ये पय्र्यकतल्पके।।१६६।।

सूत उवाच

इत्थिं[६७] श्रीवरुणासिन्धोर्दीनबन्धोः जगत्पतेः।
गुण्डिचोतसवनीतिः स्यात्सर्वलोकहितप्रदा।।१७०।।
पतितोद्धारणार्थ वै दीनानां हितकारणात्।
कुर्यर्यातप्रत्यब्‌दमतुलं गुण्डिचाख्यां महोत्सवम्।।१७१।।
ब्रह्माणा कथ्‌यमानं तं गुण्डिचोत्सवमादरात्।
श्रृत्वा तदा स नृपतिर्भेजो मुदमनुत्तमाम्।।१७२।।
चंचन्नीलमहीधरालयवतो लक्ष्मीपतेर्भूपते
यात्रामत्र वरां तदा कथयतः श्रीगुण्डिचाख्यां शुभाम्। (१७३)
सूतात् ज्ञानवतः क्षितो मुनिवराः श्रीत्रद्वयाहलादिनीम्
श्रृत्वा वाचममी तपस्विनचया जाताश्च रोमांचिताः।।१७४।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये
गुण्डिचोत्सवकथनं नाम षोडशोऽध्यायः।।

FOOTNOTES

१ M ऋषिसत्तमः। २ K सम्यक् वक्तुं। ३ B, P, R विश्वाः। ४ K, R, U पूर्ववज्जगति पतेः। ५ K. M. R, U कलयूयुस्ते। ६ K, M, R. U चेत्थिं। sl. 9 is absent in K, M, R, U. After sl. 12, the following verse is present in K. M, R, U -

रथत्रयमतोऽहं वेकृतवान् जगतां पते।

Mss. K. M. R , U Omits sl. 19b. ७ K, R, U वरे नृप। ८ M. U कन्दान्यन्यानिं, R वन्यान्यन्दानि, K वन्यान्यन्यनि। ९ K. R नृपोत्तम; M. U नृपोत्तम। १० K, M. R, U तिष्ठेयूयमित्याज्ञा। ११ M, U ते हि। R अतो K दतो। १२ R ततो देवत्रया, K, U त्ततो देवत्रयाग्रं। १३ K बलं भद्रां। १४ K, R, U प्रतिष्ठां। १५ K. M. U पाककारं। १६ K परि। १७ M. R मे, K सु। १८ M मनोरमे। १९ K, M, R. U कालार्चा। २० K, M, R. U चतुः समेश्च। २१ M नव। २२ K. M, R, U नित्य। २३ K, M, R. U महान्। २४ M, U जनोत्तम। २५ K अनेक। २६ R सुसंयुताः। २७ U यद। २८ K. M. R. U नामयम्। २९ K. M. R, U चिनतयेतु यः। ३० M सुसंयताः। ३१ M एकाहामपि। ३२ K, M, R. U तस्मा। ३३ K. M, R, U तस्या। ३४ M चास्यफलं, R गव्यफलं, B गण्यं फलं, गण्यफलं। ३५ K. M. R, U जगदीहशं। ३६ M हथं। ३७ K, M, R, U वाद्य, ३८ K. M, R, U वन्दापयेद्रमां। Mss. M. R. U, adds the following verse after sl. 93a buit K adds if after sl. 94 -

ततो विद्यापतेः वंशश्रेष्ठः व्यक्तिर्जनादेनात् क।

Mss. M. R, Omits sl. 93b. (क) K. R कश्चि जनार्दनात्। ३९ R रथखयस्य निन्दितम्। ४० U तूर्ण्णभागत्य। ४१ M. U पूर्व, K. R पूर्व। Mss. M. R Omit sl. 94. ४२ R रथत्रयस्य निन्दितम्। ४३ U तूर्ण्णमागत्य। ४४ M. U पूर्व, K, R पूर्व। Mss. M, R, Omit sl. 94. ४५ M नव्य नीरन। ४६ R सुरारिभिः। ४७ K, M, R, U किमुक्तेन। ४८ M जायगय। ४९ K. R. U तपोधनाः। ५० K देवे। ५१ K, U चतुःसमेन दिव्य। ५२ M षडां, R पर्ण्णा। ५३ M विधिवत्। कृत्वा, U विधिकृत् कृत्वा। ५४ K, R, U पि। ५५ M शान्तिरेष। ५६ K, M. R. U मरक। ५७ Mss. K. R Omit sl. 135b. ५८ K, R सुशोभते। ५९ K, M, R, U भावयित्वा। ६० M तदा, R तयो। ६१ M, R प्रासादस्य। ६३ M. K, R. U पुष्पांजलिं मनुत्तमां। ६४ K, M, R, U रक्षेतां। ६५ K. U वंशः। Mss. M, R read sl. 144b as follows -

ये च भक्त्या तदा मत्त्यास्तद्वन्दापनमुत्तमम्।

६६ K, M, R. U प्रश्यन्ति। ६७ K. U लेश। ६८ B पुरः कृत्वा। ६९ Ksl. 148a is absent in U. स्थलं। ७० M, R, U पूर्व। ७१ K. M, R. U कुर्वन्तु। ७२ तु is absent in K. U. | ७३ पक्व is absent in K. R. ७४ K. R शिथिलं | ७५ M इथं | ७६ U Omits it.

सप्तदशोऽध्यायः

इन्द्रद्युम्न उवाच

ब्रह्मन्नुग्रहात्ते वै घोषयात्राश्च[1] ताः हरेः।
इदानीं शायिनी यात्रा भवेत्केन बदस्व मे।।१।।

ब्रह्मोवाच

राजन् गुह्यतरं ब्रूहि[2] हरेः शयनकर्मतत्।
यस्य स्मरणमात्रेण सर्वपापं व्यपोहति।।२।।
क्षणं तद्वीक्षणाद्देव सर्वान् कामानवाप्नुयात्।
सावधानतया भूप श्रृणु यात्रां च शायिनीम्।।३।।
आषाढस्य सिते पक्षे पुण्ये तत्र हरेदिने।।
चतुर्थर्चावसाानेऽपि वस्त्रमाल्यादिकं पुनः।।४।।
उत्तार्य देवता देहात्प्रत्यर्चा मूर्तिकत्रयम्।
समानीय[3] सुराग्रेऽपि स्थापयेन्नृपसत्तम्।।५।।
भद्रासने वलस्याथ शंखं चक्रं हलं तथा।
मूषलं धारयन्तीं तां प्रत्यर्चा च शुभोदयाम्।।६।।
तिष्ठन्ती सर्वभूषाभिर्मूषितां सुमनोहराम्[4]।
तथा चक्रायुधस्यापि शंखचक्रगदाब्जधृक्।।७।।
नानांकारसंयुक्ता प्रत्यर्चा सुमनोहरा।
तादृशां देवताग्रेऽपि स्थापयेत्तादृशासने।।८।।
तथैव भद्रां प्रत्यर्चा सर्वलक्षणलक्षिताम्।
पद्मद्वयं वराभीति भ्राजमानं कराम्बुजम्।।६।।
पदद्वयेन[5] तिष्ठनतीं स्थापयेन्नृपसत्तम।
प्रत्येकं च सुवर्णस्य पंचविंशतिसंख्यकेः।।१०।।
पलेर्विनिर्मिता रम्याः प्रत्यर्चाश्च पृथक् पृथक्।
पूर्वोवविधिना पंचामृतेः संस्नाप्य पजकाः[6]।।११।।
बीजपूरद्रवेणे स्नापयित्वा कुशोदकेः।
चारुचेलेन संप्रोध्य दिव्यनव्याम्बरद्वयम्।।१२।।
वासयित्वा पृथक् ताश्च गन्धमाल्यासु[7] भूषणेः।
भूषयित्वा ततः स्वे स्वे देवपार्श्वे निवेशयेत्।।१३।।
बलादिदेवतानां च चतुः समविलेपनम्।
नवीनवस्त्रालंकारगन्धपुष्पेश्च भूषयेत्।।१४।।
छत्रकाहालघण्टादिमर्दलध्वनिसंयुतम्।

चरुहोता तदा भूप पाकशालान्तराद् बहु।।१५।।
नैवेद्यं च समानीय पूर्ववत् पंचपंक्तितः।
स्थपयित्वा ततो भूप चतुर्विंशतिभिः परैः।।१६।।
उपचारैः समभ्यर्च्य पूजान्ते पूजकासतदा।
पूर्वस्यां परमेशस्य दिशि[८] मण्डपसत्तमे।।१७।।
चतुर्द्वारसमायुक्ते सुधालेनलेपिते।
नितानमण्डिते रम्ये तादृशे तत्र मण्डपे।।१८।।
दन्तिदन्तसमुद्भूतां नानारत्नसमन्विताम्।
डोलां संयोज्य परमां पेटों[९] तां तत्र मंजुलाम्।।१९।।
तूलीं नीलोपधानं च ततः[१०] कर्पूररेणुभिः।
महासुदासितं कृत्वा ततस्ताः प्रतिमा शुभाः।।२०।।
पूर्वदिङ्. मस्तकत्वेन स्नापयेयुस्तदाऽनघ।
अग्निशर्मा ततस्तमर्णं दिव्यं दामनकं तथा।।२१।।
पीतवस्त्रद्धयं तावत्कर्पूरावर्तिकं तथा।
दूर्वाक्षतचयं दत्त्वा तथैव सप्तवर्तिभिः।।२२।।
पिष्ठकावर्तिभिस्तावस्कुर्याद्वन्दापनां नृप।
देवांगाच्चन्दनं तावद् बहिष्कृत्य शनैः शनैः।
तुभ्यं दास्यति तद् भूप कृतकृत्यतया ततः।।२४।।
गृहीत्वा तन्महाभक्त्या स्वस्थचितो भवेतदा।
बलभद्र नमस्तेऽस्तु रोहिणीनन्दन प्रभो।।२५।।
रेवतीबल्लभसा श्रीमान् सुखेन शयनं कुरु।
जगदीश जगन्नाथ जगदानन्दकारक।।२६।।
जगद्धाम जगदृप नमस्ते जगतां पते।
दुष्टानां नाननायार्थ शिष्टानां प्राणहेतवे।।२७।।
लक्ष्मीकलत्रकल्पेऽसिमन् सुखेन शयनं कुरु।
भद्रे देवि नमस्तुभ्यं सर्वभद्रप्रदायिनि।।२८।।
भद्राय जगतामत्र नमस्ते शयनं कुरुं।
निगद्य प्रार्थनास्त्वेताः मत्पुष्पांजलित्रयम्[११]।।२९।।
दत्वा[१२] तत्पेटिकां तावद् बध्नीया दृढमादरात्।
मण्ढपद्वारसंस्थास्य कवाटस्य च बन्धनम्।।३०।।
दृढं कार्य प्रयत्नेन तदा नृपशिरोमणे।
स्वापयात्रामिमां विष्णोर्ये पश्यन्ति मुदान्विताः।।३१।।
सुखमत्र परं भुक्त्वा पुत्रपोत्रसमन्विताः।

गन्तारस्ते परं धाम शेषेऽपि सुरदुर्लभम्।।३२।।
कदाचित् यदि भूपाल स्वप रात्रापतेद्रथे[१३]।
तदा तृतीयाकालार्चा प्रान्ते विधिममूं चरेत्।।३३।।
चातुर्मास्यानतरे राजन् मासवृद्धिर्यथा भवेत्।
तदा श्रावणमासस्य शुक्लेऽपि हरिवासरे।।३४।।
हरेः शयनयात्राया विधिः काय्र्यो नसंशयः।
पंचमासनभिव्याप्य[१४] भ्रमाद् यदि हरेश्च[१५] तत्।।३५।।
स्वापकर्म यदा भूयात्तदा लोके महद्भयम्।
देशोच्चेदनमत्सुग्रं राजा नश्येतदा ध्रुवम्।।३६।।
मरकं च पतेद् घोरं तस्मात्तत्तु न कारयेत्।।३७।।

सूत उवाच

श्रृणुध्व मुनिशार्दूला ब्रह्माणा कथितं परम्[१६]।
राजानं प्रति तद्विष्णोः शयनं कर्म तत् श्रुतम्।।३८।।
कथयामि रहस्यं[१७] वो ऋषयो गरुडस्य च।
शायनं[१८] कर्म तत्सर्व शुणुतां पापनाशनम्।।३९।।
द्वादश्यां च तिथो विप्रा गारुडं शयनं भवेत्।
त्रिकालपूजाप्रान्ते च[१९] गरुत्वनतं शुभोदयम्।।४०।।
पंचाभुतेन संस्नाप्य मंण्डयेन्नभववाससी[२०]।
गन्धपुष्पेरलंकृत्य विकारमयमुत्तमम्।।४१।।
नैवेद्यं च प्रकुर्वीत पूजां पंचोपचारतः[२१]।
ततो वन्दापनां कुर्याद् दद्यात् पुष्पांजलिं द्विजाः।।४२।।
पल्यंकस्य तले रम्ये प्रंभोस्तस्य परात्मनः।
तार्क्षसोख्येन शयनं कुरुष्व भक्तसत्तमाः।।४३।।
इति सम्प्राथ्र्य गरुढं चिन्तयेत्कमलापतेः।
पय्र्यकतलसंसुपतं हरेः प्रियचिकीर्षया।।४४।।
इत्थिं शयन यात्राया विधिं कथयतो विथेः।
इन्द्रद्युम्नो महीपालः श्रृत्वा हृष्टतरा भवत्।।४५।।
पुनर्ब्रह्माणमनधं ऋषयः स च भूपतिः।
प्रपच्द स्वच्छकीर्तिर्यत्साम्प्रतं तद् वदामि वः।।४६।।
रीनालाचलकन्दरेऽतिमधुरे सारे श्रितस्य श्रियः
कान्तस्यास्य जनस्य[२२] येऽद्यनिचयक्लेशघ्नमेतं दृढम[२३]। (४७)
अध्यायं परमादरेण ऋषयः शृण्वन्ति भूमितले
ते नूनंसुखमाविभुज्य सहसा गच्छन्ति लोकं हरेः।।४८।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शायिनीयात्राविधिकथनं[२४] नाम सप्तदशोऽध्यायः।

FOOTNOTES

१ K. R घोषयात्राश्रु। २ K. R पुण्यं। ३ M स्नामार्नित्वा। ४ R सुमनोहरं। ५ U पद्म। ६ K, M, R.U पूजकाः। ७ R गन्धमाल्याविभूषणे; K गन्धमाल्यविभूषणेः। ८ M दिथि। ९ K. R. U पेटिकां। १० K तत्र। Ms. R Omits sls. 22, 23, 26b-28a ११ M. R. U सत् पुष्पांजलि, K सपुष्पांजलि। १२ M सित्वा। १३ K पतद्रथे। १४ K पंचमासानकर्तव्या। १५ K हरेश्चरेत्। १६ K पुरा। १७ M रहरेयं वा, K. R रहसयं वा, U रहसयं व। १८ K शयनं। १९ K, R, U अथ। २० K, U मण्डये वाससा। २१ M पंचोपचारतः। २२ K. R, U जनाश्च। २३ K. R, U द्रतम्। २४ K शयन् U Omits it.

अष्टादशोऽध्यायः

इन्द्रद्युम्न उवाच

ब्रह्मन् शयनयात्राथा यो विधिः कथितस्त्वया।
साम्प्रतं स श्रुतो देव यत्पृच्छामि च तद्वद।।१।।
दक्षिणायनयात्रापि केन वा विधिना विधे।
कर्तव्या कथ्थय त्वं भो सर्वज्ञोपन्न[1] हेश्वर।।२।।

ब्रह्मोवाच

दक्षिणायन यात्राया विधिं शृणु महीपते।
यदा भवति संक्रान्तिः कर्कटी वा जगत्पतेः।।३।।
प्रातः पूजावसानेऽथ तद्दिनेऽपि यथाविधि।
महास्नानं प्रकुर्वीत पूजकः शुद्धमानसः।।४।।
देवतांगे ततः काय्र्य चतुःसम विलेपनम्।
पूर्ववच्च ततो तदव्यवस्त्राणि वीक्षणदिभिः।।५।।
संस्कृत्य परिधास्येति मन्त्रमुक्त्वा स मन्त्रवित्।
अभिमन्त्र्य च देवांगे देवतानां समर्पयेत्।।६।।
अलंकरणमासीत्युक्त्वालंकारार्पणमारभेत्[2]।
श्रीश्च ते मनुमित्येव मुच्चाय्र्य सुमनोऽर्पणम्।।७।।
ततो काहालघण्टादि छत्रचामरसंयुतम्।
नैवेद्य दुर्लभं तावच्चरुहोता समानयेत्।।८।।
पूर्ववत् पंक्तिमध्ये हि स्थापयेत्तनन्तरम्।
अग्निशर्मा बलेर्दिव्यं दामदामनकं न्यसेत्।।९।।
तथैव जगतामीशं[3] चारु दामनकं स्रजम्।
पीतवस्त्रद्वयं तावद्दद्याच्चन्दनमुत्तमम्।।१०।।
सुभद्राये ततो दद्यान्माल्यदामनकं तथा।
एतदन्तेऽर्चका स्त्ययेऽपि[4] पूववन्मध्यमार्चनम्[5]।।११।।
कुय्र्यासुर्नित्यनेवेद्यादधिकं च चतुर्विधम्।
कृत्वा नैवेद्यमाश्चय्र्यमर्पयेत्पृथिवीपते[6]।।१२।।
मुखे[7] नीराजनं कृत्वा जगन्नाथर्चकस्तदा।
सिंहासाद् बहिर्भूयो गच्छेद् द्वारसमीपतः।।१३।।
घण्टादिन्युपचाराणि पात्रहोता करे तदा।
घृत्वा तदन्तिकं गच्छेतथा ब्रह्मा कमण्डलूम।।१४।।
चरुहोता जगन्नाथपंक्तितः किंचिदुत्तमम्।

पायसान्नं करे धृत्वा गच्छेयुः पूजकादद्यः।।१५।।
जयश्च विषयो यत्र द्वारपालो च तिष्ठतः।
सामान्यविधिना तत्र पूजकोऽसौ समर्चयेत्।।१६।।
तदननं सहसा कृत्वा कालभागसमन्तिम्।
ततो जयं च विजयं क्षेत्रपालं गणेश्वरम्।।१७।।
देहलीस्थां कालरात्रिं दिक्पालांश्च दिशं[7] क्रमात्।
प्रत्येकं पूजयेत् सर्वा देवताश्चन्दनादिकना।।१८।।
छत्रचामरघण्टानि काहालमर्द्दनादि यत्।
आचाय्र्योऽपि बलिं दद्यादष्टास्वासु यथाक्रमम्।।१६।।
कुमुदं कुमुदाक्षं च पुण्डरीकं च वामनम्।
शंकुकर्ण्ण सर्वनेत्रं सुमुखं सुप्रतिष्ठितम्।।२०।।
प्रत्येकं पूजयेनमन्त्री चन्दनादिभिरुत्तम।
एतस्यामि विधेरन्ते पुनः सिंहासने वसन्।।२१।।
गण्डूषादिकमाचाय्र्यो दद्यात्तसमे मुरारये।
अथासौ पूजको ब्रह्मात्गिग्नशर्मा च पूर्ववत्।।२२।।
वन्दापनां प्रकुय्र्यासुः श्रद्धाभक्ति समन्विताः।
इमामनयात्रां वे पवित्रां सर्वकामदाम्।।२३।।
पश्यनित भक्त्या ते सर्वे भुक्ताः स्युः पापजालतः।
अन्ते विष्णुपुरं यान्ति देवानामपि दुर्लभम्।।२४।।
संक्रान्ती कर्मटीयाश्चेद्रथे कालवशात्पतेत्।
विधिरेष च कर्तव्यो भक्त्या भूपतिसत्तम्।।२५।।

सूत उवाच

नीलाद्रो दुरितौधनाशकुशले तीर्थाज्जले मंजुले
नानाशर्मनिकेतने त्रिभुवने ख्याते जगत्पावने। (२६)
तां यात्रां परमामिमां मुररिपोः श्रुत्वाबजयोनिस्तदा
हृष्टानष्टविल्मषाश्च ऋषयो जाताश्च तत्रोत्सुकाः[9]।।२७।।

इति श्रीनीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये[10] अयनयात्राकथनं[11]
नामाष्टादशोऽध्यायः।

FOOTNOTES

१ K.Uसर्वज्ञोयनमहेश्वर। २ K.M.R.U माचरेत्। ३ K.U जगतामिशं। ४ R स्तैऽस्तु, U स्तेपि, K स्तेऽपि। ५ R मार्जनं। ६ K मर्चये। ६ K.M.U मुख, R सुख। ७ K पश। ८ B.P.L पजको। ६ U तत्रोत्सुकः। १० U Omits it . ११ K. R दक्षिणायनयात्रा

ऊनविंशोऽध्यायः

इन्द्रद्युम्न उवाच

पद्मयोने नमस्तुभ्यं पितामह नमोऽस्तु ते।
नीलाचलपतेः विष्णोः श्रावणे मासि यद् भवेत्।।१।।
तत्सर्व च[1] विशेषेण वद सम्प्रति तत्वतः।।२।।

ब्रह्मोवाच

साणु साधु नृपश्रेष्ठ त्वं विष्णोभक्तिसत्तमः।
कथयामि समासेन तत्त्थेवाचन दुतम्।।३।।
श्रावणस्य च मासस्य त्वमावास्यादिने नृप।
अरुणोदयवेलायां प्रातः पूजां समाचरेत्।।४।।
असयामपिच पूजायां नैवेद्यमधिकं भवेत्।
नानापूपसमायुक्तं नानाव्यंजनसेंयुत्म्।।५।।
पायसं सेचरान्नं च चतुर्विधमनुत्तमम्।
तदा देयं नृपश्रेष्ठ विष्णवे मुरजिष्णवे।।६।।
निर्मिता स्वर्णरत्नेन विद्यावसुकुलोदभवः।
तथा विद्यापते वंश्योऽनिकेऽलंकुतमर्पयेत्[2]।।७।।
पंचाभुतेस्ततो मन्त्रेर्महासनानं समाचरेत्।
ततो मध्याह्नपूजां च कुर्यान्नृपतिसत्तम्।।८।।
वन्दापनां ततः कुय्र्यापूर्ववज्जगतां पतेः।
ततः रावणपोर्णम्यां प्रातः पूजावसानतः।।९।।
पूर्ववत्प्रचरेन्मन्त्री महास्नानं यथाविधि
चतुःसमविलेपं च कृत्वा वेशं मनोहरम्।।१०।।
नानालंकारमाल्यादिनवीनाम्बरदानतः[3]।
बलभद्रागतो राजन् स्थापयेत्कलशं नवम्।।११।।
भद्रासनं च तत्रैव पिष्टकेर्धटयेतदा।
षष्ठीदेव्याः प्रतिकृतिं मृकण्डुतनयसय[4] च।।१२।।
तथेव रचयेद्धीमान् सप्तानां चिरजीविनाम्।
ततोऽर्चकोऽग्निशर्माणं संकल्पयति कर्मवित्।।१३।।
कुय्र्यादाचाय्र्यचरणमग्निशर्मार्चकस्य च।
ब्रह्मावरणमाकुय्र्यात्ततेवायं महीपते।।१४।।
आचार्यस्तु ततः पीठे वसन् कुम्भे गणेश्वरम्।
वरुणं च तथादित्यप्रमुखांश्च नवग्रहान्।।१५।।

इन्द्रादिदशदिवपालान् तथेव क्षेत्रदेवताः[४]।
मृत्युंजयं तथा सर्व लोकाधिपतिमुत्तमम्।।१६।।
ब्रह्माणां मां तथा सर्वव्यापिनं विष्णुमेव च।
स[५] सर्वविद्याधिपतिं तथशानं च पूजयेत्।।१७।।
प्रतिपत् प्रमुखानां च तिथीनां[६] पतिपूजनम्।
सप्तविंशतिनक्षत्राण्यशिवनयादीनि[७] पूजयेत्।।१८।।
तथा द्वारशराशीनां मेषादीनां समर्चनम्।
स्वं नक्षत्रं स्वराशिं च क्षेत्रपालात्न्देवते।।१९।।
कुलदेवान्[८] पूजयित्वा तथा च मृत्युदेवताः।
धीषणा वृद्धिमात्रा च गौरी च[९] कटपूतना[१०]।।२०।।
एताश्च देवताः सर्वाः कुम्मे पंचोपचारतः।
पूजयेद् विधिवतपाकं[११] ततो[१२] भद्रासने नृप।।२१।।
षष्ठीदेवीं पूजयित्वा मार्कण्डेयं च पूजयेत्
अश्वत्थमानमेवात्र बलिं व्यासं च पूजयेत्।।२२।।
हनुमनतं ततो धीमान् विभीषणमुदारधिकम्।
कृपं परशुरामं च पूजयेदतिभक्तितः।।२३।।
पंचापचारविधिना चतुर्थ्यन्तं स्वनामतः।
ततो मध्याह्नपूजां च यथाविधि समाचरेत्।।२४।।
बलभद्रसयाग्निशर्मा मंगलारोपणं चरेत्।
वन्दापनां ततः कुर्याद् विधिना स नृपोत्तम१३।।२५।।
आचाय्र्यो जगदीशस्य कुर्याद् वन्दापनां तदा।
ब्रह्मा कृत्वा सुभद्रायाः कर्पूरवर्तिकं शुभम्।।२६।।
दूर्वाक्षतान्यर्पयेद्वे[१४] ततो विद्यापतेर्नृप।
सन्तानसतत्र चाग्रेऽपि विष्णोस्तन्य सुदर्शनम्।।२७।।
स्थापयेदथ तं विष्णुमर्चकः प्रार्थयेत्तदा।
दीनबन्धो जगन्नाथ जगन्मंगलकारक।।२८।।
आज्ञां देहि रमाकानतस्तम्मरुपं सुदर्शनम्।
बलजनमोत्सवार्थ च तथा देवर्षिपूजने[१५]।।२९।।
अंगिरारमपूजाये तद्वटस्य प्रदक्षिणे।
कण्ड्वाश्रमार्चनार्थ च क्षेत्रभ्रमणहेतवे।।३०।।
एतदर्थ महाबाहो हयाज्ञापय सुदर्शनमं।
इत्येवं प्रार्थनाभुक्तवाचाय्र्यः काश्र्यविदां वरः।।३१।।
जगदीशांगतश्चाज्ञामालामानीय तच्छिरे।

विश्वावसोश्च वंश्यास्ते तथा विद्यापतेर्नृप।।३२।।
बहिः प्रस्थापयामासुः सुदर्शनमनोमयम्।
नानालंकारसंयुक्तं पुष्पामाल्यविभूषितम्।।३३।।
रत्नढोलान्तरस्थं तं प्रासादं भ्रामयेद् पुनः।
मार्कण्डेयान्तिकं नीत्वा महोत्सवतया तदा।।३४।।
अग्निहर्माणमाचाय्र्यस्ततः संकल्पयेत् पूरः१७।।
अग्निशर्मा तथा चाय्र्य ब्रह्मावरणभाचरेत्।।३५।।
वस्त्रयज्ञोपवीताद्यलंकारेश्च चन्दनेः।
पुष्पेश्च वरणं कृत्वा तत्र[१७] भद्रासने न्यसेत्।।३६।।
नवीनं वसनं तत्र न्यसेतसप्त च विष्टरान्[१८]।
कुशेर्विनिर्मितान् तावत्कुर्यात्पूर्वमुखांश्च तान्।।३७।।
ध्यायेत्सप्तर्षिभावेन तानेव सप्त विष्टरान्।
गोतमं च भरद्वाजं विश्वामित्र तथा मुनिम्।।३८।।
जमदग्नि वसिष्ठं च कश्यपं त्वत्रिमेव च।
एतानत्र च संचिन्तय ततः सप्तर्षिमन्त्रतः।।३६।।
मन्त्रयेत् मन्त्रवत् प्राज्ञः क्रमादवनिपालक।
इदं विष्णुरिति व्यक्तं मन्त्रमुक्त्वा ततो द्विजाः।।४०।।
स्नापयेच्च ततः सप्त ये च मन्त्रमुदीरयेत्।
अथायास्तत्र[१८] पीठे च वसननाचाय्र्यसत्तमः।।४१।।
असनाद्यर्धसंस्कारं[१९] पय्र्यन्तं कर्म संचरेत्।
सप्ततेति च मन्त्रेण ह्यावाहनमधाचरेत्[२०]।।४२।।
सप्त होत्रेति मन्त्रेण स्थानं[२१] च काय्र्यभुत्तमम्।
वितानस्वेति[२२] मनुना[२३] वस्त्रं दद्याच्च नूतनम्।।४३।।
यज्ञोपवीतमित्युक्त्वा देयं यज्ञोपवीतकम[२४]।
तद्विष्णोरिति मन्त्रेण ह्युत्तरीयमथार्पयेत्।।४४।।
गन्धद्वारेति गन्थं वे दद्याद्देशिकसत्तमः।
ाप्तमिति[२५] च मन्त्रेण पुष्पं दद्यान्मनोरमम्।।४५।।
धूपं धुरसिमन्त्रेण दद्यान्नेवेद्यमुत्तमम्[२६]।
जपं कुय्र्यादनेनेव दद्यात् पुष्पांजलिं ततः।।४६।।
सवयाहुतिं च गायत्रीं पठित्वा तद् सिवर्जनम्।
तसमादाचाय्र्य[२७] एवासो सनध्याकर्म समाचरेत्।।४७।।
तत्र कुशत्रये पूते ब्रह्माणां मां ऋषिनमि।
आवाह्य तर्पयेत्ततोऽष्टव सुतर्पणम्।।४८।।

धृत्वाध्वरो च सोमं च तथैवापालनं[२८] पुनः।
धनिनं प्रतयुषं चैव प्रमासं देशिकोत्तमः।।४९।।
एकपादाहिर्वुध्न्यो च विरूपाक्षमतः परम्।
रैवतं च हरं चैव वनिहरूपं[२९] च त्र्यम्बकम्।।५०।।
संरेक्वरं च सावित्रीं जयन्तं च पिनाकिनम्।
तथा भूतेश्वरं तावदुपराजितमुत्तमम्।।५१।।
हन्द्रं धातारभुग्रं च पूषाणमत्रमेव च[३०]।
वरुणं चाप्यर्यमणं[३१] तथैवांशु च तर्पयेत्।।५२।।
विवस्वान् सविता त्वष्टा विष्णुरुद्रश्च[३२] पद्‌भजः।
क्रतुर्दनो वसुः सत्यः कालः कामोधरी तथा।।५३।।
रोचनश्च पुरुरवा भाद्रवश्चेति ते दश।
तर्पयेत् क्रमतोऽपयेतां[३३] तथैवांकारमेव च।।५४।।
गायत्रीं तर्पयेद्धीभान् तथैवोष्णुगनुष्ठुभौ।
बृहती पंक्तिमेवात्र सत्रिष्टुब्जगती तथा।।५५।।
ऋग्वेदं च यजुर्वेदं सामवेदमतः परम्।
अथर्ववेदमत्युग्रं तर्पयेदवनीश्वर।।५६।।
आपदोध्यनं चैव बृहस्पतिमनामयम्[३४]।
इन्द्राणीं मित्रावरुणं दाक्षायणिमकल्मषाम्।।५७।।
यमं च धर्मराजं च तर्पयेत्पूजकोत्तमः।
मृत्युं तथान्तकं राजन् बैवस्वतमतः परम।।५८।।
कालं च तर्पयेत् प्राज्ञः सर्वभूतक्षयं तथा।
ओदम्बरं च दध्नं च रोद्रं चित्रमतः परम्।।५९।।
चित्रगुप्तं च यमुनां क्रमेण परितर्पयेत्।
इन्द्रद्युम्न महीपते स च सदा[३५] मन्त्री च सन्तर्पये
तानेव स्फुटमत्र नीलवसनो भूयां तिथौ सादरम्।
येनासय प्रतिभा भवेत्तदनु च क्षिप्रं यथार्चाभवे
तत्वां सम्प्रतिभो वदामि नृपतेसपष्टं समाकर्ण्णय।।६०।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये बलभद्रजन्मनि तर्पणकथनं[३६] नाम
ऊनविंशोऽध्यायः।

FOOTNOTES

१ K, R स। २ M र्वश्योऽर्थिकोलंकृतिमर्पयेत्, K वंशोऽलकऽलकृतमर्पयेत्, U र्वश्योऽलिखेंकृतिमर्पयेत्। Ms. R Omits sls. 10 and 11a. ३ M दानतिः। ४ K

मृकुण्ड। ५ K, M, R, U क्षेत्रदेवतां। ६ स is absent in R.। ७ R तीर्थानां। ८ K, R सपता। ९ K, R, U देवताः। १० K Omits च। ११ K कटकपूतान। १२ K, R, U विधिवत् प्राज्ञ। १३ U स्ततो। १४ K, R नृपसत्तम। १५ K दूर्वाक्षतानयर्चयेद्वे। १६ K, M, R, सप्तर्षि। १७ K. M. R पुनः। १८ U ततो। १९ R विष्टरात्। २० M अथाय, K, R, U अथायं। २१ K. M. R. U आसना। २२ M तथा चरेत्। २३ K, M, R स्थापनं। २४ K; M, R, U द्वितान। २५ K, R मन्त्रेण। २६ U पवित्रकम्। २७ K, U सप्तसीभीति। २८ K, M R दीपं ज्योतिरसीति च। After sl. 46a, the followinh Verse is present in K, M. R - क यज्ञोपनयमन्त्रेण दद्याननेवेद्यमुत्तमम्। (क) K, R यज्ञो नयां । २९ K ततसताचार्य्या U ततऽसत्वाचार्य्या। ३० M तथैवापालनो, K तथैव पालवौ, K तथैवा पालकौ, U तथैवापालबो। ३१ U ब्रह्मरूपं त्रयम्बकम्। ३२ R मित्रमेव, K मित्रनो व च। ३३ K.M,R चार्य्यमाणं, U चायर्यमाणं च। ३४ M रिद्र, R, U रिन्द्र

Ms. M reads sl. 54a as - रोचन पुरूरवसमाद्रवो।
Ms. R reads sl. 54a as - तथानूप परूरसमार्दवो।
Ms. K reads sl. it as - लोचनश्च तथा भूप परूरसमाद्रवो।

३५ K क्रमशोऽप्ये। ३६ m वोष्णुगनुष्टुपे, R वोष्णुचानुष्टुपो, K वेष्णिगनुष्टुपो। ३७ K, M वाचस्पति, R वाचस्पति। ३८ K, R, U तदा। ३९ M तर्पणाधिकथनं।

विंशोऽध्यायः

ब्रह्मोवाच

सव्याहुतिं स प्रणवा गायत्रीं देवमातरम्[1]।
भावयित्वा जपं कुय्र्यात्ततो मृतिकया नृप।।१।।
हस्तप्रमाणतः कार्या प्रतिमा रेवतीपते।
फणामुकुटसनध्या हलं मुषलमेव[2] च।।२।।
धारयन्ती३ च सा रमयावलस्य प्रतिमा भवेत्।
पंचामृतेन दिवयेन दविक्राणमन्त्रः।।३।।
आचाय्र्याः स्नापयित्वाथ पुरुषसूक्तेन वारिणा।
नंद्यांशुकेन सम्प्रोच्छय् परिसाधयेति मन्त्रतः।।४।।
वसत्रं दद्यात्ततो मन्त्रीं धोतं च सुपरिष्कृतम्।
यज्ञोपवीतमनत्रेण यज्ञसूत्रं समर्पयेत्।।५।
पणसेति[4] मनुश्चोक्त्वा प्युत्तरीयं तदार्पयेत्[5]।।
गन्धद्वारेति गन्धं वे श्रीश्चेऽनेन पुष्पकम्।।६।।
उपचारेः षोडशानि रूद्राध्यांयेन पूजयेत्।
अभावेन तथा पंचोपचारेः परिपूजयेत्।।७।।
कर्पूरवतिं परमां कृत्वा तस्य विसर्जनम्।
कुय्र्यात्पंपचारेश्च सुदर्शनमधाचरेत्।।८।।
ततो वन्दापनां कुर्यादथप्रासादपूर्वतः।
आस्ते काम्यवटः श्रीमान् साक्षाननारायणप्रभुः।।९।।
ये च मर्त्याः प्रकुवर्न्ति दर्शनं च प्रदक्षिणम्।
छायानिवासमेवात्र ते सर्वे मनुजोत्तमाः।।१०।।
ब्रह्महत्यादिपापेभ्यो मुक्ता वेकुण्ठवासिनः।
एतद् वृक्षस्य मूले हि चामेरंगाररसः[6] पुरः।।११।।
आश्रमोऽसित महीनाथ नयेत्तत्र सुदर्शनम्।
गन्धादिना पूजयेतं तथा वन्दापनां चरेत्।।१२।।
वटवृक्षं प्रति सप्तभ्रमयेच्च सुदर्शनम्।
प्रदक्षिणं च प्रथमं ये पश्यन्ति नरोत्तमाः।।१३।।
ब्रह्महत्यादिपोभ्यो मुक्तासते स्युर्न संशयः।
स्वर्णस्तेयाद् विमुक्ताः स्युर्द्वितीयभ्रमणे क्षणात्।।१४।।
सुरापानजपापेम्यस्तृतीयभ्रमणे क्षणात्।
चतुर्थभ्रमणं दृष्ट्वा मुक्ताः स्युर्गरुतल्पगात्[7]।।१५।।

पचंमं भ्रमणं चास्य भ्रमणे यदि पश्यति।
तत्संसर्गजपापेभ्यो मुक्तो भवति वै जनः।।१६।।
षट् प्रदक्षिणमालोक्यं सर्वयज्ञफलं लभेत।
सप्तभ्रमणसल्लोको विष्णुपुरं ब्रजेत्।।१७।
तत्र वेकुण्ठभवने[8] ज्ञानं प्राप्य विमुक्तिभाक्।
ये च मतर्या महाभक्त्या वुक्षस्यासय प्रदक्षिणम्।।१८।।
कुर्वन्ति तेऽश्वमेधस्य लभनते फलमुत्तमम्।
एतत् काम्यवटात्[9] राजन्नाकल्पवटपादपम्।।१६।।
एतनमध्यस्थलं दिव्यं महत्पुण्यकरं सदा।
अत्र वासकृतां भूप.मुक्तिमुक्तिप्रदायकम्।।२०।।
स्थलमेतनमहापुध्यं[10] दृष्ट्वा नारायणीं शुभाम्११।
त्रिशूलडम्बराभयहस्तां शुभप्रदाम्।।२१।।
आस्ते निखिललोकानां मनोरथफलप्रदा।
तस्य दर्शनमात्रेण सर्वपापं व्यपाहति।।२२।।
भ्रमणानन्तरं राजन् कालिकायाश्च दक्षिणे।
उग्रसेनोऽस्त[12] तत्रैव सुदर्शनमथो नयेत्।।२३।।
नीत्वार्चयेतथा कृयृर्याद्वनदापनमनुत्तमम्।
तस्माननयेततः कण्वाश्रमस्य निकटं प्रति।।२४।।
सुदर्शनं च सम्पूंज्य तत्र वनदापनां चरेत्।
महोत्सवं तदा क्षेत्रे कुयृर्याननृपतिसत्तम।।२५।।
मार्गे शोभां च सर्वत्र कुयृर्याद् भकत्या तदुत्सवे।
द्वारि द्वारि जनसतावच्च्वरेयुश्च[13] महोत्सवम्।।२६।।
पताका साविता नालि जृम्भ च तदा चरेत्।
घण्टामर्दलशंआदि ध्वनिं च रचयेत्तदा[14]।।२७।।
लाजानां शर्कराणां च दुग्धानां च तथा न१प।
गोधूमानां विकारेऽपि नैवेद्यं सुपरिष्कृतम्।।२८।।
सुदर्शनाय तद्दद्याच्चारुभूरितरं तदा।
एतनिनर्माल्यनिचये स्पर्शदोषो न विद्यते।।२६।।
शंकामत्रैव[15] नो कुयृर्याज्जनेश्वर कदा बुधः।
स्तम्भरूपस्य चक्रस्य जगन्नाथस्य च प्रभोः।।३०।।
निर्मालये च कदा भेद कुर्यादवनीश्वर।
कुर्याच्चेन्नरके घोरे पच्यन्ते नात्र संशयः।।३१।।
ततः प्रासादरतनस्य तृतीया वरणस्य च।

पूर्वद्वारं समासाद्य तद्धलनदापनामाचरेत्।।३२।।
प्रासादान्तः स्थलं नीत्वा वस्त्रमाल्यादिकं हरेत्१६।
देवाग्रे स्थापयित्वास्य माहसनविधिं चरेत्।।३३।
पंचाभृतेश्च विधिवतततो विद्यापतेर्नृप।
वंश्योऽपिवायेद्दिव्ये सिंहानिपदे निजे।।३४।।
ततः कुय्याद् प्रयत्नेन सायंकालसमर्चनम।
पृथक् समर्चयेच्चक्रमुपचसोर्यथाविधि।।३५।।
अग्निशर्मा ततः कुय्र्याद्विन्दापनविधिं मुदा[१६]।
अनेन विधिना राजन् पोर्णम्यां श्रवणस्य च।।३६।।
महोत्सवं प्रकुय्र्यात्सवं निजकल्याणहेतवे[१७]।।
एवमुत्सवामानन्दान् मानवा ये जनाधिप।(३७)
पश्यन्ति सततं तेषां दुरितं भस्मसाद् भवेत्।
अनते विष्णुपुरं यान्त पुनरावृतिवतिर्जतम्।।३७।।

सूत उवाच[१८]

श्रावणे मासि तद्वष्णो विधिना भाषितं विधिम्[१९]।
श्रृतवा स[२०] नृपतिरेष्ठः कृतक्त्यो भवेत्तदा।।३८।।
ब्रह्माणः स पुनविप्राः पृष्टवान् य नृपोत्तमः।
तद्वदामि शृणुध्वं वे शृणृतां पापकर्षणः[२१]।।३६।
विष्णोर्भाद्रपदे मासि या यात्रा गदिता शुभा।
अवधारय मो विप्रा तां च पुण्यविवर्धिनीम्।।४०।।

ऋषय ऊचुः

सूत प्राज्ञ द्विजश्रेष्ठ नीलाचलपतेर्हरेः।
यात्राश्चारुतरास्तास्ता श्रुतास्त्व भोऽति हर्षदाः।।४१।।
राज्ञा पृष्टं च यत्तद्वे बृहि व्यास सुशासत[२२]।।४२।

सूत उवाच

अध्यायमेतत्परमादरेण शृण्वन्ति जल्पन्ति च ये मनुष्याः।
ते पुत्रपोत्रः सह शर्मा मुक्त्वा गच्छन्ति लोकं परमं मुरारेः।।४३।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसूतसम्वादे
विंशोऽध्यायः।

FOOTNOTES

१· K, R वेद। २ K, M, R, U मुत्षलमुध्वलम्। ३ K धारयनत। ४ K, R शयसेति।

५ K.R यदापयेत् । ६ K.R ऋषेरंगिरसः U परःद्व ऋषेरंगिरसः पुरः । ७ M मुक्तागुरुता दद्यात्, R, U मुक्ता गुरुतल्पपाद्धात । ८ M, U भुवने । ९ R एतत् वट्यद्राजन्त, K एतत् काम्यवट्यद्राजन्न, U एतत् कसामावटाद्राजना । १० M स्थलंमेतमुहत् पुण्यं । ११ K, M, U नारयणी शुभा । १२ R उग्र मनोऽसित । १३ K, R, U जना । १४ R चरयेत्तदा । १५ R शंका मन्त्रे जनो । १६ M चरेत्, हरे । १७ K, R नृप । १८ K जन । १९ सूत उवाच is abdsent in M. २० M विधिः । २१ K, R च R Omits sls. 39-41. Mss. K, M, U Omits sl. 40 । २२ K नाशनं । २३ K, U सुशासितं ।

एकविंशोऽध्यायः

ब्रह्मोवाच

कथयाम्यधुना भूप भाद्रवे मासि यद् भवेत्।
विष्णोर्नीलाचलस्यास्य तच्छणुध्वं श्रियःपते।।१।।
भाद्रवे मासि कृष्णायां पंचम्यामरुणादेय।
प्रातः पजा च कर्तव्या तदन्ते विश्वासोर्नृप।।२।।
विद्यापतेश्च कुजला तथा विश्वाससोर्नृप।
आगत्य बलभद्रस्य जगन्नाथस्य च प्रभोः।।३।।
भद्रायाश्च मुखानां च ह्यर्ध्वनेशंश्च पार्श्वयोः।
मनोरमां स्वर्णरेखा मच्छलित्रितयान्विताम्[1]।।४।।
दत्वा च भूषयेयुस्ते यथाशोभं नृपोत्तम।
पंचाभृतेः स्नानमथो कारयेदर्चकः पुनः।।५।।
कुर्यानमध्याह्नपूजां च पूर्ववद्देवतात्रयम्।
वन्दापयेतदन्ते च श्रद्धाभक्तिसमनिवतः।।६।।
कृष्णायामथ सप्तमयां सायंपूजाविध्सानतः[2]।
देवकी सान्त्वनार्थाय[3] जगदीशं पुनर्यजेत्।।७।।
नानाव्यंज्नसंयुक्तं नानापूपसमन्वितम्।
क्षलितान्नं च नैवेद्य तदा दद्यान्महीपते।।८।।
ततोऽष्टमां[4] दिने सायंकाले नद्यां सुसंयतः[5]।
स्नानत्वाचाय्र्यो देवगृहे प्रविशेत् सुमनोरमे।।९।।
वैष्णवाचमनं कृत्वा नीरोधनगृहाग्रतः।
सूतिकागृहनिर्माणं वस्त्रेण परिकल्पयेत्।।१०।
पट्टनेत्रांशुकचयेः समन्तात्समलंकृतम्।
चन्दनानि च मालाश्च रक्षामणिसमन्वितम्[6]।।११।।
स्थापयेतत्र मतिमान् शोभने सूतिकागृहे।
वारि पुष्पं तथाभूतं सर्षपं वह्निमेव च।।१२।।
स्थापयेतत्र भूपाल सूतिकाभवने तदा।
द्वारद्वयं[7] द्वारपाला मुसलायुधपाणयः।।१३।।
तिष्ठेयुस्ते तदा भूप सूतिकामन्दिरस्य च।
काष्ठं[8] विनिर्मिता षष्ठीदेवी तत्र स्थिता भवेत्।।१४।।
श्रृंखलाद्वयमेवं च स्थापयेतत्र मन्दिरे।
नानाभूषणसंयुक्तं कुय्र्यात्सूतिकागृहम्।।१५।।

आचाय्र्यः सपतविंशत्यंगुलीमानसगन्वितम्६।
मण्डलं चतुरस्रं च रचयेत्तत्र भूपते।।१६।।
सूत्रेण प्रथमं कुय्र्याचचतुरस्रमनिन्दितम्।
तिय्र्यगूर्ध्व च तन्मध्यं कुर्यर्याद्देशिकसत्तमः।।१७।।
दश पंच[१०] च रेखाभिः पुनस्तादृशसंख्यकेः[११]।
शतद्वयं च कोष्ठानां[१२] षट्पंचाशत्समन्वितम्।।१८।।
षट्त्रिंशत्कोष्ठिकामिश्च मध्ये पदमं लिखेच्द्‌दुमम्।
आद्ये च कर्णिकी कुर्याद द्वितीये केशराशि च।।१६।।
तृतीये पत्ररचनां दलाग्राणि चतुर्थके।
तद् बाह्ये वंतृलं रेखां रचयेत्पीठमुत्तमम्।
तथा द्विपंक्तिमालम्ब्य बिलं[१४] कुय्र्याज्जनातुरः।।२१।
द्वारशोभां ततः कुर्यात्तथा पंक्तिद्वये शुभे।
उपशोभां ततश्च षट्कोणं ततोऽर्द्धागुलिमानतः।।२२।।
सत्वं रजस्तमश्चेतति रेखया रचयेत्क्रमात्।
तद्बाह्ये पूर्वतः काय्र्य द्वारं चारुतरं बुधैः।।२३।।
तत्पश्चिमे[१५] च कलशं चक्रध्वजसमन्वितम्।
रचयेन्मंजुलं भूप पश्यतां विंसमयत्पदम्।।२४।।
मण्डलस्योत्तरे देशे तथा दक्षिणदेशतः।
पंचवर्ण्णेश्च चूणेश्च षट्कोणं रचयेद् बुधः।।२५।।
ततः शुक्लाकृतितया चतुःकोणेषु भूपते।
शोभं च रचयेद्धीमान् तादृशेश्चारुचूर्णकेः।।२६।।
पद्मसय कर्णिका पीता करणीया मनोरमा।
तस्य प्रतिदलं रक्तरेखा द्वयसमन्वितम्।।२७।।
केशरं रचयेत्पीतं बिन्दुं दद्यात्तदन्ततः।
तत्पीतबिन्दुमध्येषु रक्तबिन्दून् समालिखेत्।।२८।।
पत्राणि शुक्लवर्णानि कृत्वाष्टासु च दिक्षु च।
रक्तरेखा च दातव्या दलानां व्यक्तिहेवे।।२६।।
दलेऽर्द्धचन्द्रकारेण कुय्र्यादग्रं तदग्रकम्।
वृत्तिरेखाश्च[१६] शुक्लाः स्यादभिसन्धिश्च श्यामला।।३०।।
वृत्तिवाह्ये च राजेन्द्र शुक्लाः स्याच्चतुरसतदा।
एतयोर्मध्यदेशं च कृष्णवर्ण ब्राह्ये पीठमालिखेत्।
तत्पीठत्रिपदे कोणे रक्तान् पादान् समालिखेत्।।३२।।
चतुश्चतुष्कदेष्वेषु पीठपात्रं ततो द्विजः।

शुक्लं कुर्याच्च तद्ब्राह्येऽप्येकाशीतिपदेषु[१७] च।।३३।।
बोथी च परितः[१८] कुय्याचछुक्लबर्णा मनोरमाम्।
तद् वीथयाम्[१९] फलपुष्पेश्च सहिताश्च लता न्यसेत्।।३४।।
नानावर्णो विचित्रास्ता रचयेद्देशिकोत्तमः।
तद्ब्राह्ये मध्यतो भूयः षट्पदे शुक्लवर्णतः।।३५।।
द्वारं च रचयेश्रीमान् तद्द्वारोमयपार्श्वतः।
चतुश्चतुः पदेनैव शोभां च रक्तवर्णकेः।।३६।।
तस्याश्चोभयपार्श्वेऽपि[२०] चतुश्चतुःपदे पुनः।
पीतवर्ण्णा मनोरमामुपशोचां समाचरत्।।३७।।
चर्तुर्दिक्षु द्विजश्रेष्ठ एवं कुय्र्यात्प्रयत्नतः।
चतुःकोणेषु षट् षडिभः पदैः कृष्णेर्मनोहरम्।।३८।।
सर्वतोभद्रनामेदं मण्डलं सर्वसिद्धिदम्।
सर्वमंगलसननद्धं सर्वेश्वर्यकरं महत्।।३९।।
एतस्मिन्मण्उले दिव्ये कृष्णजनमार्चनं यदा।
कर्तत्यं नृपशादूलं प्रीतः विष्णोः न संशयः।।४०।।
सूत उवाच
पूजायां तत्र यात्रायां फलं कोटिगुणं भवेत्।
विनेदं मण्उलं विप्रा जन्मपूजा यदा भवेत्।।४१।।
दि सा निष्फला ज्ञेया राज्ञा कीर्तिविनाशिनी।
सर्वतोभद्र मे तद्वै मण्डलं कृष्णजनमनि।।४२।।
पूजायां च प्रकर्तव्यं कर्तव्यं च द्विजर्षभाः।
मण्उलस्य विधानं तत्कथयित्वा चतुर्मुखः।।४३।।
पुनस्तत्रैव पुजां स वक्तुमुत्सहतेसम तम्।।४४।।
दारुब्रह्मकलेबरस्य ऋषयो लख्मीपतेः सादरम्।
नानाकर्मनिकेतनसय[२१] करुणासिन्धोश्च नीलाचले
इन्द्रद्युम्नमहीपतिं प्रति तदा यात्राश्च जल्पन्नसौ
ब्रह्मा कृष्णसमुदद्भवोत्सवमिदं वक्तुं समिच्छन् मुनिः।।४५।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिसूतसंवादे[२२]
एकविंशोऽध्यायः।

FOOTNOTES

१ Mss. K, R, U read sl. 3a as follows -

विश्वावसोश्च कुलजास्तथा विद्यापतेर्नप।

१ K. R मंगुलिंत्रितयायतिम्। U मंगुलं त्रितयायताम्। २ K, M, R, U वसानतः। ३ K. R देवकीशयनार्थाय। ४ K अताऽष्टमी। ५ K, M, R, U सुयंयताः। ६ K, M, R. U मनिन्दितम्। ७ K,R द्वारदेशे। ८ K,M,P,R कोष्ठे। ९ K सप्तविंशत्यंगुलमान्। १० K दशसप्तक, U दशपंचक। ११ K, U रेखकेः। १२ K, U कोष्ठीनां। १३ M, P, R पर्त्नीं। १४ K, R विर्धीं। १५ P ततपश्चाद्धेम। Sl. 24b is absent in K, M, R, U. १६ K वृत्तिरेखापि U वृतरेखापि। Ms. M reads sl. 33a as follows -

चतुश्चतुः पदेनैव त्वेषु पीठगात्रं ततो द्विजः।

and Ms. K reads it as - चतुश्चतुष्वदेवेषु पीतागात्रं ततो द्विजः। (R पीठपात्रं)। १७ M काशीत। १८ R बीर्चीं परिततः। १९ K,R तद्वीची। २० M, R, U पाश्वेऽपि। After sl. 39a, the following Verse is present in K - जकलशं शुक्लपीते वाणं शुक्लं च रक्तकम्। २१ R, U नानाशर्मनिकेतनस्य | Mss. R, U read sl. 45b as follows -

ब्रह्मा कृष्णभवोत्सकवार्चममिदं वक्तुं समिच्छन्मुदा। (क) K, M भवांस्तवार्चन २२ K, M, R मुनिसुतसम्वादे।

द्वाविंशोऽध्यायः

ब्रह्मोवाच

बलं भद्रां ततो विष्णु नानालंकारदर्शिभिः।
भूषयित्वा नृपश्रेष्ठ मनोरमतया तदा।।१।।
सायंकार्लानं कुर्यात्तदन्ते पूजकोत्तमः।
जन्मार्चारम्भसमये प्रथमं वरुणार्चनम्[1]।।२।।
संकल्पं च ततः[2] कुर्यात्तद्वदामि शृणष्व[3] मे।
धनधान्यसुपात्राणां पोत्राणां यशसां तथा।।३।।
आयुषो महदेश्वर्य सिध्येच्च रिपुनाशनद्य।
सर्वत्र जयसाम्राज्यभिषेकाणां तथा दि,जः।।४।।
धर्मार्थकाममोक्षाणां प्राप्त्यर्थमिति चादरात्।
उत्क्या श्रीकृष्णचन्द्रस्य जन्मार्चकर्मसाम्प्रतम्।।५।।
विप्रद्वाराहमेततु करिष्ये च तदाप्यसो।
अग्निशर्मा च संकल्पमिति कुर्य्यात्सुसंयतः।।६।।
संकल्पानन्तरं भूयो वस्त्रद्वयसमन्वितम्।
यज्ञोपवीतसंहितं स्वर्णकुण्उलसंयुतम्।।७।।
मुद्रिकासहितं गन्धपूष्पयुक्तं दधन्मुदा।
श्रीकृष्णजन्मपूजायां कर्म कर्तुमहं वृणे।।८।।
इत्युच्चार्य स वरयेदाचाय्र्य विशांपते।।६।।
ब्रह्माणं त्वामहं तावद् बृणे स धरणीसुरः।
ब्रह्मावरणमाकुय्र्याद् भक्तिश्रद्धान्वितो हि सः।।१०।।
ततस्तु सर्वतोभद्रमण्उलस्याग्रतसतदा।
भद्र पम्ठासनं लिख्येदष्ठांगुलसमनिवतम[5]।।११।।
सार्द्धहस्तद्वयेनापि देध्र्येण पारसंयुतम्।
सार्द्धहसतायतियुतं श्रीपर्णीकण्इसंयुतम्[6]।।१२।।
अभावे सालकाष्ठेन त्वर्दुनेन्धनतोऽपि वा।
मनोहरतया राजन् कुर्य्याद्भद्रासनं परम्।।१३।।
चित्रपटं च तत्रैव न्यसेत्तच्चतुरस्रकम्।
सार्द्धहसतंप्रमाणं तु मनोरमतरं[7] तदा।।१४।।
तत्राष्ठदलमम्भोजं शोभनं स्यात्प्रयत्नतः।
तत्कर्णिकायाः परमे मध्ये पय्र्यकमालिखेत्।।१५।।
तत्र तूलीं नयसेत्तावदुपधानं मनोरमम्।

तादृशे दिव्यपर्य्यके त्वर्धसुप्ता च देवकी।।१६।।
वामहस्तोपरि शिरा दक्षजानुस्फुरोत्करा।
आदौ मीलितनेत्रा सा सर्वाभरणसंयुता।।१७।।
चित्रांशुकपरीधाना राजमाना नृपोत्तम।
दिव्योरुदेशे कृष्णस्तु तसयाश्चैव मनोहरः।।१८।।
चारवेणीधरः श्रीमान् सर्वाभरणभूषितः।
अतसीकुसुमश्यामो मनदहासां चिताननः।।१६।।
कोस्तुभोल्लासिहृदयो दिगम्बरतया मधुसूदनः।।२०।।
तिष्ठन् क्षावकरे मातृः स्तनं शिशुतया स्पृशन्।
कर्णिकाया मध्यदेशे लिखेदेवं जनाधिप।।२१।।
स्थितोत्तरे दले लक्ष्मीः स्वर्णवर्णा मनोरमा।
विचिशाम्बरभूषदृया चारुगन्थविलेपना।।२२।।
कुर्वतोऽ निजहसताम्यां देवकीपादघर्षणम्।
पश्चिमे दलके भूयो वसुदेवः सुभूषितः।।२३।।
अनन्तरुपिणा[१०] विप्राश्चाद्यमानशिरःस्थलम्[११]।
गौरांगो वदवत् कृष्णं हृद्देशे चकितेक्षणः।।२४।।
यशोदा स्वर्णवर्णाढ्यानीलवस्त्रान्तिा सती।
नानालंकारसम्पन्ना दक्षिणेऽपि दले स्थिता।।२५।।
जानुक्ष्योपरिलसन्निहस्तद्वयाम्बुजा।
जनयन्ती योगमायां तथा पूर्वदले मुनिः।।२६।।
गर्गः स्फटिकवर्णाभः कषायवसनो जटी।
अक्षमाला दण्डवरश्चण्डांशुरिव भास्करः१२।।२७।।
वायव्यकोणदलके ह्यूग्रसेनो महीपतिः।
गौरः किंरीट वलया[१३] नानाभूषणभूषितः।।२८।।
रक्तवस्त्रपरीधानः खड्गचर्मधरो बली।
वह्निकोणदले तावद्रोहिणी चारुलक्षणा।२६।।
केतकीवर्णरुचिरा नीलवस्त्रासुभूषणा।
पुटिंतं हस्तयुग्लं कुर्वन्ति सुस्मिताधरा।।३०।।
अग्रेऽर्द्धचन्द्रो राजेन्द्र तथा नैर्ऋतकोणतः[१४]।
दले तत्र च ननदः सयात्पीतवर्णो महायशाः।।३१।।
निबद्धचूलरुचिरश्चारु चेलांचितांगकः।
नानालंकारसम्पन्न परमं लगुडं दद्यत्।।३२।।
विलम्मानशमश्रुश्च स्फुरिताननपंकजः।

ऐशानयसय च कोणसय दले[१५] मुषलधारिणः[१६]।।३३।।
प्रतिमा नीलवस्त्राढ्या शरच्चन्द्रनिमाकृतिः।
फणाविकटशीर्ण्णे यं हलं च मुषलं परम्।।३४।।
धारयन्ती लसद्भूषा वन्द्या वृन्दारकादिभिः।
एवं च पतिमा राजन् पंचवर्णे विचित्रिताः[१७]।।३५।।
पट्टे तत्र विराजेयुः कृष्णजनमोत्सवे नृप।
पट्टस्य प्रतिभा[१८] बिम्बं रचयेद् भक्तिभावनः।।३६।।
रजतस्य पले नैव मण्डलाकारमुत्तमम्।
तस्याभावे तदर्द्धेन तदभावे तदर्द्धतः[१९]।।३७।।
तसमान्नूनं[२०] न कर्तव्यं कर्तव्ये तच्च निष्फलम्।
एवंरूपेण मतिमान् पद्मं वसुदलान्वितम्।।३८।।
वसुदेवादिसहितं कुर्य्यान्मंजुतरं नृप।
आचाय्र्यस्तु ततः शृद्धो भूत्वा संयतमानसः।।३६।।
आसनादर्द्धसंस्कारपर्यन्तं कर्म संचरेत्।
आद्ये प्रणवमुच्चार्य द्वितीये देवनामधृक्।।४०।।
तृतीये च नमःशबृदमुच्चर्य च चतुर्थके।
आवाहयेत्पंचमे च तत्रागच्देति संवदेत्।।४१।।
अर्घ्य गन्थं च पुष्पं च धूपदीपौ क्रमातदा।
दत्वा स्नानार्थमुद्युक्तो भवेदाचार्यसत्तमः।।४२।।
षटपलं दथिं गुग्धं च चतुःपलं धृतं मधु।
त्रिपलं क्षिपलं खण्डमेकत्र भाजने न्यसेत्।।४३।।
पंचाभृतेन तेनैव स्नापयेस्स्त्रद्देवताश्च ताः।
पट्टेऽपि राजते तत्र ततः स्मप्रोछ्य तत्पुनः।।४४।।
पट्टमंचे[२१] स्थापयित्वा ततः पूजां समाचरेत्।
शर्करादुग्धलाजानं नारिफेलफलस्य च।।४५।।
विकारसम्भवं दिव्यं नैवेद्यं वितरेतदा।
देवकीवसुदेवश्च यशोदाननद एव च।।४६।।
श्रीबलोऽप्युग्रसेनश्च रोहिणी गर्ग एव च।
एतेषां देवतानां च स्वे स्वे नाम्नि प्रपूजनम्।।४७।
प्रणवादि नमोनतेन पूजयेच्चनदनादिना।
गन्थादिनापि विधिना पूजयेत्कपूजकोत्तमः।।४८।।
ताम्बूलं[२२] प्रसमर्प्याथ दद्यादाचमनं ततः।
क्रमेण प्रार्थयित्वा तु[२३] दद्यात्पुष्पांजलि पृथक्।४६।।

सवासवादि देवेश[२४] गृहसाघण मम[२५] पूजनम्।
इमां पुष्पांजलिं मातः स्वीकुरु स्मेरधारिणणि।।५०।।
त्राहि मां भक्तसन्तप्तं जगनमंगलदायिनी[१]
वसुदेव यदुश्रेष्ठ वासुदेव पितः प्रभो।।५१।।
पुष्पांजलिमिमां तुभ्यं दास्यामि च नमोऽस्तु ते।
यशोदे देवतारुपे कृष्णानन्दविवर्द्धिनि।।५२।।
नमस्तुभ्यं जगनमातस्त्रहि मां भवसागरात्।
जगदानन्दचित्तस्यानन्दसन्दोहकारक।।५३।।
आनन्दं देहि में नित्यं तुम्ये नमो नमः१।
सिन्धुजे कमले लख्मि रमे विष्णुप्रिये शुभे।।५४।।
नमस्तेऽस्तु जगनमातः सौक्ष्यं देहि सदाऽनघे।
प्रलम्बारे नमस्तुम्मयं बलभद्र नमोऽस्तु ते।।५५।।
बलं भद्रं यशः सोख्यं देहि मे रेवतीपते।
उग्रसेन लसत्कीर्ते श्रीकृष्णांध्रिपूजकः[२]।।५६।
पूजयामि महाबाहो सुखं मे देहि सर्वदा।
नमस्ते रोहिणी देवि श्रीकृरूणग्रजपालिके।।५७।।
सुखमारोग्यमेश्वयृर्य देहि मे कृपया सदा।
गर्गाखिलतपः शील ज्ञानवेराग्यमन्दिर।।५८।।
त्वामहं शरणं प्राप्तस्त्राहि मां भवसागरात्।
प्रत्येकमेवं[३] सम्प्राथृर्य दद्यात्पुष्पांजलिं द्विजः४।।५६।।
ततो विसर्जनं नीत्वा प्रार्थयेज्जगदीश्वरम्।।६०।।
जगन्नाथ नमस्तेऽस्तु जगतां पतये नमः।
नारायण जगद्धाम श्यामसुन्दरमापते।।६१।।
दीनबन्धो कृपासिन्धो धर्मपालनतत्परः।
दानवानां विनाशाय रक्षणाय सतां पुनः।।६२।।
त्वत्तो भवन्ति मतस्याद्या अवतारास्तज्ञया।
इदानीं कृष्णचन्द्रस्य जन्मने पद्मलोचन।।६३।।
आज्ञां कुरु महाबाहो दारुब्रह्म नमोऽस्तु ते।
इत्युक्त्वा जगदीशांगान्मालामनीय सादरम्।।६४।।
न्यसेत् कृष्णगले तावनमालां तामतिमंजुलाम्।
तमानीय स्थापये[५] मण्डले पूर्वदिङ्मुखम्।।६५।।
देवकीगर्भसंस्थ तं चिन्तयित्वा प्रपूजयेत्।
लाजादीनां विकारोऽथिं नैवेद्यं वितरेत्तदा।।६६।।

पूजेत्कालोपचारेस्तु[६] बालकृष्णाख्यमन्त्रतः।।६७।।

सूत उवाच

नीलाद्रिसंस्थस्य रमापतेः प्रभोनर्रनावतारेषु च तेषु तेषु।
नृपाग्रतस्तेन च पद्मयोनिना समीरितास्तानि गदामि चोत्सवाः।।६८।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसूतसम्वादे
द्वाविंशोऽध्यायः

FOOTNOTES

---

१ M वरुणार्शनं। २ K, R तदा। ३ K, U शृणुष्व मे। ४ K, R परिनाशने। ५ K, R. U रक्षेदष्टांगुल। ६ K, M, R निर्मित। ७ K, R मनोहरतरं। ८ K, U अर्द्धोन्मीलित। ९ K, U कुर्वनित, R कुर्वति। १० U अनन्ते रूपंणा। ११ U बृन्दाच्छाद्यमान, U वृन्दाश्छाद्यमानः। १२ U भास्वरः। १३ K, R मुकुट, । १४ K, R कोणके। १५ R हलं। १६ज K परिपूजनं। १७ M, R विचित्रताः। sl. 36a is absent in K. M, R. U. १८ K, M, R प्रतिबिम्बं। १९ K, R तदर्द्धकं। २० K, R तसमानूनं। २१ K, R सत्तमः। २२ K. U पट्टमध्ये। sl. 48b is absent in K, M, R. U. २३ R तत्र तां। २४तु is absent in M. After sl. 49, the following Verse is present in K, M. R. U. श्रीकृष्णजननी श्रेष्ठे देवकीस्फुरिताकृति। (क) M श्रीकृष्णस्य जननी)। २५ K, R देवायूर्ये। २६ M मपि। २७ K, R नमोऽस्तु ते। २८ K पूजने। २९ R एत्येकमेवं। ३० K द्विजाः। ३१ K: M, R कुयूर्याज्जगदी, U कुयूर्याज्जगन्नाथान्तिकं। ३२ K. M, R, U यजेत् कालोपचारेस्तु।

त्रयोविंशोध्यायः

ब्रह्मोवाच

पूजान्ते राजते पात्रे हरिद्राम्भः परं दद्यत्।
एशतुर्वशमास्यो वे मन्त्रमुच्चार्य यत्नतः।।१।।
देवकीगर्भतो जातोः कृष्णभूदिति भावयन्।
कृष्ण पादाम्बुजतले तन्नीरं परिपातयेत्।।२।।
कोमलांगधनश्याममतिरक्तकरांध्रिकम्[१]।
स्मेराननं चारुभुजं किरीटमुकुटोज्ज्वलम्।।३।।
गले कोस्तुभरत्नादृयां चारुचन्दनचर्चितम्।
बन्धुकादरमाकन्द कन्दरूपं मनोहरम्।।४।।
नाडीसं विलसं न्नाभिं तदेवं भामयेन्नृप[२]।
जीरकद्वयसंयुक्तं कटुकत्रयसंयुतम्[३]।।५।।
जातिलवगसहितमेलाफलमनुत्तमम्।
तेजः पत्रं तदेवेकं पलाग्रिं पलितं[४] नृप।।६।।
एतच्चुर्णोर्द्वसंख्यातः शर्करा च भवेत्ततः।
सर्वेषां मेलनं कृत्वा गोधृतेर्वाटिकां तदा।।७।।
अष्ठोत्तरशतं कुर्याज्जलदोषप्रशान्यें।
ताश्चैव वाटिकाः सर्वा नवनीतं तथा द्विजाः।।८।।
भक्तिश्रद्धान्वितस्तावत् श्रीकृष्णाय समर्पयेत्[५]।
ततोऽग्निशर्मा सहासा च हरिद्रां च समप्रयेत्[७]।
अग्निशर्माऽर्चको तावत् कर्पूरावर्तिमुत्तमाम्।।१०।।
कुय्र्यास्तां नृपशार्दूल जगनमंगलहेतवे।
यमुनाकल्पनं कुय्र्यात्पश्चिमायां[८] दिशि द्विजः[९]।।११।।
कृष्णं स्पतफणाच्छन्नं लंधयेद् यमुना ततः।
उत्तरे मण्डपे रम्ये चतुर्द्वारविभूषिते।।१२।।
तोरणाशोभिते लिप्ते सुधामयरसैः परैः।
वितनतालसन्दीप्ते चारु चामरशोभिते।।१३।।
न्यसेत् कृष्णं च[१०] रामं च भद्रासनपदे पुनः।
वसोर्द्धाराविधनं च कुर्यान्मांगल्यवृद्धये।।१४।।
एकं विष्टरमायोज्य कृष्णनाभौ समादरात्।
वाममायेति[११] मन्त्रेण वाटीच्देदनमाचरेत्।।१५।।
स्वर्णबुरेण च ततः षष्ठीदेवीं समर्चयेत्।

गौर्य्याः पुत्रो यथा स्कन्द इत्युक्त्वा प्रार्थनां चरेत्।।१६।।
षष्ठीदेव्याः प्रार्थना स कुय्यादाचार्य्यसत्तमः।
ततः पंचामृतेनाशु श्रीकृष्णं स्नापयेत्सुधीः।।१७।।
कृष्णोऽसीति मनुं जप्त्वा तन्नामकरणं ततः।
तच्चक्षुरिति मन्त्रेण बहिर्निष्क्रमणं ततः।।१८।।
अन्नात्पतिमिश्रुत[१२] मनु मुक्त्वा च पूजनकोत्तमः[१३]।
अन्न प्राशनमाकुरर्याद् शिवोनामेति मन्त्रतः।।१९।।
चूडाकरणमाकुय्र्याद्[१४] भद्रंकर्णेति[१५] मन्त्रतः।
कर्णसंधस्मदा काय्र्य परिधास्येति वस्त्रकम्।।२०।।
दघात् यज्ञोपवीतं तु तन्मनत्रेण समर्पयेत्।
जातः कंसवधार्थायेत्युक्त्वाऽर्घ्य च समर्पयेत्।।२१
अवतारसहस्राणीत्युक्त्वा पुष्पांजलिं न्यसेत्।
यथा कृष्धस्य नृपतेः विधिर्जातो जगद्धितः।।२२।।
रामस्य च तथा काय्र्यः कीर्त्यायुः सुखवृद्धये।
क्षीरोदार्णवसम्भूत इति चन्द्रार्द्धमाचरेत्।।२३।।
वन्दापयेद्रामकृष्णो त्वग्निशर्माविधानतः।
काहालस्य च घण्टानां मर्दलानां विशेषतः।।२४।।
अन्येषां विविधानां च वाद्यानां परितः स्व्ने।
जाते चामरवृन्दानां चालनेपरिशोभने।।२५।।
श्वेतच्छत्रधृते तावत् त्रासोन्नाशनसंयुते।
मेघाडम्बरशोभाढ्ये जयशब्देः प्रजृम्भिते।।२६।।
करतालध्वनो जाते कृष्णजन्ममहोत्सवः[१७]।
प्रवर्तेत तदा राजन् त्रैलाक्यसुखवर्द्धनः।।२७।।
महोत्सवे जायमाने दिव्यपय्र्यकशाखिनौ।
रामकृष्णो ततो नीत्वा वेनतयोग्रतः स्थले।।२८।।
दिव्यपय्र्यकमध्ये तौ वासयित्वा शनैः शनैः।
तिलानां नारिकेलानां मोदकेः परितोषयेत्।।२९।।
कालोपचारतः पूजां कुर्याद् वन्दापनां ततः।
चारु डोलान्तरे राजन् रामकृष्णो च तो पुनः।।३०।।
स्वापयेत्परया भक्त्या संसारार्णवतारको।
आचाय्र्याय तो राजन् स्वर्णमेकं प्रयतनतः।।३१।।
दक्षिणां श्रद्धया वद्यान्निजमांगल्यहेतवे।
दिव्यवस्त्रं च गां चेव दत्वा सन्तोषयेद् द्विजम्।।३२।।

सुवर्ण्णस्यप्यभावे च तदर्ध वितरेद् बुधः।
दक्षिणाया अभावेन तत्सर्व निष्फलं भवेत्।।३३।।
ततश्चतुर्थकालार्चा विष्णोस्तस्य परात्मनः
कुय्र्याद्विं विधिवद् भक्त्या पूर्ववतसुखमाहितः।।३४।।
सप्तम्यास्त्वर्द्धरात्रे चेदष्ठमी स्याद् भवेत्तदा।
जन्मपूजा च[१८] कर्तव्या सैवोपोष्या तदा भवेत्।।३५।।
अष्टम्यामरात्रे तु नवमी च भवेद् यथा।
तदा पूजा च[१९] नो काय्र्या कर्तव्या पूर्ववासरे।।३६।।
अष्टम्यां च तिथौ तावत् वरो च बुधसोमयो५।
रोहिणीनामकं तावन्नक्षत्रं च यदा भवेद्।।३७।।
तदा जयनती परमा सा भवेद् बहुपुण्यदा।
योगेऽसिमननुपवासं[२०] चार्चनं जागरणं तु ये।।३८।।
कुर्वन्ति मनुजश्रेष्ठाः कोटिगोदनजं फलम्।
वाजपेयाश्वमेधानां तुला पुरुषदानजम्।।३९।।
सम्वत्सराध्वरभवं स्वर्णकोट्यर्पणोदभवम्।
यत्पुणयं सयाम्हीनाथ तल्लीभान्ते न संशयः।।४०।।
अयं योगस्त्वर्द्धरात्रे[२१] स चेत्स्यादष्टमीयदि।
कर्तव्यमुपवासादि श्रीमतां वरभक्तितः।।४१।।
न सयाच्चेदष्टमी तावन्न कर्तव्यं कदाचन।
उपवाशश्च पूजा च तिथौ कर्तव्यमादरात्।।४२।।
अर्द्धरात्रे व्रतमिदं नृपेन्द्र नीलभूधरं[२२]।
तिथिमूलं च कर्तव्यं तद्व्रतं[२३] नात्र संशयः।।४३।।
कृष्णावतारलीला च करणीया प्रयत्नतः।
नवम्यां च तिथौ राजन् प्रातः पूजावसानतः।।४४।।
बलस्य जगदीशस्य भ्रदायाश्च यथाविधि।
महास्नानं प्रकुर्याद्वि सर्वागें चन्दनं न्यसेत्।।४५।।
ततो नव्यांश्कुं दद्यादाचाय्र्यः पूर्ववत्ततः।।४६।।
जगदीशस्य भद्रायास्ततो मध्याह्नपूजनम्।
पूजान्ते नृपशार्दूल त्वग्निशर्मा स पूजकः।।४७।।
ब्रह्मा सोऽपि च ते सर्वे सिंहासनागतास्तदा।
अग्निशर्मा जगन्नाथ मंगलारोपणं चरेत्।।४८।।
मंगलारोपणप्रान्ते एकदेव त्रिदेवताः।
कर्पूरात्रिकं[२४] दद्याद् दूर्वाक्षतचयं पुनः।४९।।

तदन्तेऽप्यग्नियशर्मासो जगदीशपुरः स्थितः२५।
सप्तवर्तीस्तदा कुयात्पिष्टवर्तिमनुत्तमम्[२६]।।५०।।
सोऽपि[२७] कुर्ययात्ततो भद्रामंगलारोपणं पुनः।
ततः पुजकयुग्मेन बलस्य जगतां पतेः।।५१।।
कर्पूरात्रिकं[२८] काय्र्य तथा दूर्वाक्षतर्पणम्।
भद्रायात्स्वग्निशर्माऽपि तद्वत् कुर्याज्जनातुरः।।५२।।
अथाग्निशर्मा भद्रायाः प्रीत्यर्थ नृपसत्तम।
सपतवर्तीः पिष्टवर्ती कुर्याद् भक्तिसमन्वितः।।५३।।
नीत्वाथ दुर्गा भद्राया समीपं नृपसत्तमः२६।
सम्प्रार्थयेत् सुभद्रां तां सर्वमंगलदायिनीम्।।५४।।
भद्रे देवि नमस्तुम्यं सर्वभद्रपदे शुभे।
आज्ञापयतु दुर्गाया जन्मार्थ परमेश्वर।।५५।।
एवं सम्प्राथ्र्य भद्राया मालामानीय संन्यसेत्।
दुा[२९] प्रति ततस्तां तु कृष्धदौलाग्रतो न्यसेत्।।५६।।

सूत उवाच[३०]

तदन्ते पूजकस्तावत्दौलान्तरगतां तु ताम्।।
पंचाभृतैः स्नापयेद्वे भक्तयासौ नृपसत्तम।।५७।।
स्थापयित्वा नन्दगृहे[३१] यशोदागर्मतः पुनः।
संभूतां तानिति यदा भावयेद्विजपुंगवः।।५८।।
उपचारैः समन्यर्च्च्य ततो वन्दापनां चरेत्।
विधिमेतं च यः पश्येत्कुर्याद् वा सुसमाहितः।।५६।।
सर्वकामफलं प्राप्य विष्णुलोके महीयते।
ऋषयो देवदेवस्य जगदीशस्य च प्रभोः।।६०।।
ब्रह्माणा गदितं तावदन्यत् शृधुत मेऽधुना।।६१।।
ज्ञानाननदपयोनिधौ मतिमतांश्रेष्ठे तपस्यालये।
सूतेऽस्मिनिनतिसंवदन्त्यतिशयं श्रीसौनकाद्यास्तदा।
श्रीनालाचलनाथ चित्रचरितं श्रृत्वा च हृप्य परम्।
जातास्ते ऋष योदयो चितलयद्धर्मातुरा भास्वराः।।६२।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसम्वादे[३२]
त्रयोविंशोऽध्यायः

FOOTNOTES

---

१ M,U एजतर्दश, R एततुर्दशमास्यो, K एजतुर्दशमासो। २ K धनश्चामसम। ३ K.

R भावये नृप, U भ्रामये नृप। ४ K, R कटुत्रययमन्वितम्, M कटुखसंचतिम्, K, U कटुकत्रयमन्वितम्। ५ K, R कलितं नृप। ६ K, R निवेदयेत्। ७ R पीतवस्त्रेण। ८ M द्विजाः। ९ K, U स। १० K वाममद्देति, U वामदेवेति। sl. 17a is absent in K< M, R, U. ११ M अन्नात् पनिश्रुत हति, K, R अन्नाः परिश्रुत इति, U अन्नः परिश्रुत ईति। १२ K, M, R, U पूजकः। १३ R चूडाकरणमामन्य। १४ R भद्रं कर्णोति। १५ K, R प्रदापयेत्। १६ K, R महोत्सवे।

कर्तव्या जन्मपूजा सावुपवासस्तदा भवेत्।

and Ms. U reads it as -

जन्मपूजाच्च कर्तव्या वुपवासस्तथा भवेत्।

Ms. M reads -

जन्मपूजा सा कर्तव्या वुपवास्यथा भवेत्।

१७ U यथा। १८ U त्र। १९ K योऽसमं। २० M योगस्त्वर्द्धरात्रौ, R सोगस्त्वोर्द्धरात्रो चन, U योगस्त्वर्द्धरात्रो न चेत स्या, K यत् स्वर्द्धरात्रो च न। २१ R भूधरः। २२ K, R, U कर्त्तव्यं। २३ K, R वर्तिकं। २४ K, R, स्थिते। २५ R कुय्र्यात् विष्टकावर्ति। २६ K, M, R, U सोऽपि। २७ K, R वर्तिकं। Ms. M reads sl. 53b as -

सप्तवर्ति तया कुर्यात् पीठवर्तिमनुत्तमाम्।

२८ K, M, R, U पूजकोत्तमः। २९ सूत उवाच is absent in K< M, R, U. ३० M, P नन्दगेहे। K, RAfter sl. 60a, K adds सूत उवाच। ३१ K, R मुनिसूतसम्वादे।

चतुर्विंशोऽध्यायः।

ब्रह्मोवाच

त्रयोदश्यां[1] तिथो राजन्नाचार्यो जगतां[2] पतेः।
तृतीयकालपूजां च कुर्य्यात्परमभक्तितः।।१।।
तदन्ते जगदीशांगादामालां सुमंजुलाम्।
घण्टानां मर्दलानां च काहालकांसयतालयोः।।२।।
निःस्वने जायमानेऽथ छत्रचामरजृम्भणे।
महोत्सवतया तां तु गृहीत्वा कालिकानितकम्।।३।।
गच्देतत्र तदा कालीं प्रार्थयेन्नृपसत्तम।
कालरात्रि नमस्तुभ्यं सर्वविघ्नविनाशिनी।।४।।
त्वं विष्धुवल्लभा नित्यमाज्ञा कुरु जगत्पतेः।
पाकशालां समागच्छ शीघ्रमेव शुभेऽधुना।।५।।
अमावस्यादिनं प्राप्य नैवेदये विघ्ननाशिनी।
तत्परा भवे हे मातर्नमस्तुभ्यं सुरेश्वरि।।६।।
इत्युच्चार्य च तां कालीं कालरात्रिं समर्चयेत्।
तस्याः मालां समानीय पाकशालान्तरे पुनः।।७।।
कवचित्प्रदेशे संस्थाप्य त्वभावास्या दिने नृप।
सप्तपूरसमेतानि पिष्टकानि च कारयेत्।।८।।
गोधूमचूर्ण्ण परमं तण्डुलानां तथा नृप।
चूर्ण्ण च शर्करा दुग्धं मिश्रितं परिपाचयेत्।।९।।
पाकान्ते[3] मर्दयेद्धीमान् घृतेषु परमेषु तत्[4]।
पक्वपत्राकृतितया तदा पूपानि कारयेत्।।१०।।
तिलानां नारिकेलानां चणकानां तथैव च[5]।
आमिक्षाणां च निचयमेकत्र परिपातयेत्[6]।।११।।
मरीचार्द्रकयोस्ताबज्जीरकाणां च संचयम्।
पाचयित्वा[7] यथायोग्यं कुर्यात् पूवमनुत्तमम्।।१२।।
वंशनिर्मितपात्रेषु चतुरस्रेषु चारुषु।
हस्तत्रयप्रमाणेषु रम्भादलयुतेषु च।।१३।।
सप्तपूरकसं राजन् मध्यानि विपुलानि वै।
तानि[8] पूपानि[9] दिव्यानि बहूनि नृपसत्तम।।१४।।
समर्पयेनमहाभक्त्या यथाविधि तया हरिम्।
अरुणोदयवेलायां प्रातःपूजा विधीयते।।१५।।

ततो वन्दापनां कुर्याद् भक्तिभावसमन्वितः।
तत्प्रसादं तदा दत्त्वा द्विजेभ्यो नृपतीश्वर।।१६।।
ततः स्वयं च मुंजीत कृतकृत्यो भवेन्नरः।।१७।।
सूत उवाच
अमावस्या दिने विप्रा य एनं विधिमाचरेत्।
सर्वकामफलं लब्ध्वा विष्णुलोकं ब्रजेद्[10] ध्रुवम्।।१८।।
अमावस्या दिने तत्र ये पश्यनित जनार्दनम्।
तत्प्रसादं परं मुक्त्वा मुक्तास्तसयुर्द्विजोत्तमः[11]।।१९।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सप्तपूरिकामावस्यानिर्णय नाम
चतुर्विंशोऽध्यायः।।

FOOTNOTES

१ M.R.U चतुर्दश्यां, K चतुर्दिश्यां। २ K.R जगति, जगती। ३ R पाकाये। ४ M चत्। ५ K.M.R.U परंतप। ६ M परिपातये, R पालयितवा, K पारिपातयेत। ७ M पातयित्वा, K पातयित्वा, R पातयित्व। ८ K.M.R अन्य। ९ R दिव्या। १० R ब्रजे दुतं। ११ M.R मुक्तासतोस्युद्विजोत्तमा, K मुक्तास्तेद्विजोत्तमा, U मुक्तास्तेद्विजोत्तमाः।
After sl. 19, K adds the following -

विधिनां कथिताद्विरदं विधिपरिश्रृतवादतितुष्टमानसः।
नृप नृच्छति तत्पुनः सत कथितमुमारमते तदा द्विजा।।

१२ M. U Omit it. Ms. K शौनकादिमुनिसूतसम्वादे।

पंचविंशोऽध्यायः

ब्रह्मोवाच

शुक्लायामथ पंचम्या प्रातः पूजावसानतः।
मार्कण्डेयेश्वरस्यापि निकट सन्नयेद्रमाम्।।१।।
तत्र पूजां समाचर्य्य तथा वन्दापनां चरेत्।
महोत्सवतया तां तु लक्ष्मी स्वपदमानयेत्।।२।।
शुक्लाष्टमी दिने प्रातः पूजाननतरतो नृप।
लक्ष्मीं प्रति जगन्नाथान्माल्यमाज्ञास्वरूपकम्।।३।।
समर्प्य पश्चिमाशायां स्वस्थानं तां समानयेत्।
ततः पर्य्यङ्.कतल्पेऽपि स्थापयित्वा हरेः प्रियाम्।।४।।
वस्त्रालंकारमाल्येश्च भूषयेत्परमेश्वरीम्।
पूर्ण्णपात्राणि पंचेव तदग्रे स्थापयेततः।।५।।
नारिकेलफलं दिव्य[1] कुष्माण्डीवपूरकम्।
नागरंग च रम्भायाः फलं च दाडिमं[2] फलम्।।६।।
जातीफलं तिन्दुकं च तथैलाफलमुत्तमम्।
द्राक्षाफलं गुवाकं च बकुलस्य फलं तथा।।७।।
जम्मीरं कर्कटफलं तथैव बदीफलम्।
तथा जम्बूफलं राजन् तथा संस्थापयेत्पुरः।८।।
स नारिकेलाभ्रदलं[3] स्रजलघटम्वे च।
वेष्टितं[4] नववस्त्रेण दूर्वाः षोडशसंख्यकाः।।६।।
साक्षताः स्थापयेतस्याः कथां संश्रावयेद्रमाम्।
कथान्ते तत्फलानयेव समर्प्य पूजयेततः।।१०।।
उपचारैः षोडशमिरथवा पंचभिर्द्विजः।
आमिक्षायास्त्रयो भागाः माग गोधूमचूर्ण्णकम्।।११।।
संमध्य[5] पात्रेऽपि चिरं धरृतेर्दिव्येश्च पाचयेत्।
नारिकेलस्य शकलेः पूरिताम्यन्तराणि च।।१२।।
कृत्वा षोडशसंख्यानि मोदकानि पृथूनि च।
कृत्वा नैवेद्यामस्येतनमहालक्ष्म्ये निवेदयेत्।।१३।।
वन्दापनां तदा रम्यां कुर्यात्पूजां ततोऽर्चकः।
एवं षोडशसंख्यानि दिनानि नृपसत्तम।।१४।।
कुय्र्याल्लखीव्रतमिदं सर्वेषां हितकाम्यया।
असम्भेऽथवा कुय्र्यादाद्ये चान्ते च पूजनम्।।१५।।

वन्दापनामपि तथा कुर्याद् भूपतिसत्तम।
एकादश्यां च शुक्लायां प्रातः पूजावसानतः।।१६।।
वलस्य जगदीशस्य भद्रायाश्च प्रयन्ततः।
महास्नानविधिं कृत्वा लेपयेच्चन्दनादिना।।१७ ।
नवीनवस्त्रालंकारर्भूषयेतान् सुरानपि।
मध्याह्नपूजां विधिवत्कुर्यादवनिपालक।।१८।।
चतुर्थकालपूजान्ते महास्नानं च पूर्ववत्।
कृत्वा चन्दनलेपं च सर्वास्वापि[६] च पूर्ववत्।।१९।।
नव्याम्बरार्पणं कृत्वा भूषणेः परिभूषयेत्।
क्षलितान्नं ततो भूप नानापूपसमन्वितम्।।२०।।
व्यंजनोत्करसंयुक्तं दिव्यं भूरितरं नृप।
तादृशं वरनैवेद्यं कृत्वा सम्पूजयेत्तदा।।२१।।
चतुर्विंशतिभिर्मक्त्या ह्युपचारैः मनोहरेः।
नीराजनं ततः कुय्र्याद् गच्छेत् शयनमन्दिरम[७]।।२२।।
अग्निशर्मा ततः पेटी समुतफेटनमाचरेत्।
पुष्पांजलिं प्रगृहयाथ प्रार्थयेदतिभक्तितः।।२३।।
देवराजनमस्तुभ्यं कलपनां परिवर्तक।
यतश्चराचरं सर्व जगदेतत् प्रवर्तते।।२४।।
जाग्रत्सवप्नसुषिष्वेतत्सर्व योऽवति स्फुटम्।
सत्वं प्रभो निजसयासय पार्श्वस्य परिवर्तनम्।।२५।।
कुरु लोकहितार्थाय नाशाय च दुरात्मनाम्।
परिवर्तनकालोऽयं हिताय जगतां महान्।।२६।।
इन्द्रस्तु ध्वजमाम्ब्रय तवाज्ञा परिपालयन्।
काले वर्षति ते भीत्या पुण्डरीक निभेक्षेण[८]।।२७।।
त्वत्पादकमलद्वन्द्वप्रेक्षणोपतया हरिः।
दैवतैः सह लक्ष्मीशं ध्वजेऽपि परिवर्ततें।२८।।
जलं मुंचति तावद्वै प्रजानां रक्षणाय सः।
एवंरूपेण मतिमान् प्रार्थयेज्जगदीश्वरम्।।२९।।
वीणया तोषयेद् भूप जगदीशं सुरेश्वरम्।
बलस्य जगदीशसय भद्रायाश्च मनोरमाः।।३०।।
प्रत्यर्चाश्च पृथक् कृत्वा पुष्पांलिमनुत्तमम्।
दत्वा तान् स्वपदे तत्र परिवर्तितया द्विजः।।३१।।
ततो वन्दापनां कृत्वाा पेट्याश्च दृढमुद्रणमै।

एततिस्मन् समये राजन् ये पश्यनित जनार्दनः।।३२।।
पापपलजविनिर्मुक्ता विष्णुलोकं ब्रजनित ते।।३३।।

ऋषय ऊचुः

नीलाद्रिनिलयस्यास्य विष्णोस्तावत्परातमनः।
सूरुतं[9] तद् भवति[10] पार्श्वस्य परिवर्तनम्।।३४।।
अन्यतिकं कथितं ब्रह्मन् ब्रह्मणा नृपते पुरः।
तदृच्यतां नृपश्रेष्ठ तत्र कोतूहलं हि नः।।३५।।

सूत उवाच

यूयं धन्या द्विजश्रेष्ठा विष्णुभक्तिपरायणाः।
नीलाचलपतेस्तस्य यात्रां वक्तुं क्षमश्च कः।।३७।।
इन्द्रद्युम्नेन यत्पृष्टं पुनर्ब्रह्माणमादरात्।
कथमानं मया तं तु शृणुध्वं मुनयोऽधुना।।३८।।
क्षेत्रे श्रीपुरूषोत्तमे खिजगतां सारे मुरारेः प्रिये
तीरे[11] क्षीरमहार्णवस्य रुचिरे दूरीकृतां धोत्करे।(३८)
तत्रास्ते परमः पुमान् प्रतिदिनं नानावताराातिान्
यात्रां तां प्रचुरां वितस्य ऋषयो यूयं शृणुध्वं मुदा।।३६।।
इति श्रीसूसंहितायां नीलाद्रिमहोदये पार्श्वपरिवर्तनं नाम पंचविंशोऽध्यायः।।

FOOTNOTES

१ K, R, U रम्यं। २ K, R, U दाडिमी। ३ R नारिकेलाभ्र कदलं। ४ K, R वेष्ठनं। ५ M संमध्य, R समद्धि, K संमन्थ्य। After sl. 15, the following Verses are present in M, R, K, U -

ततो मध्याह्नपूजान्ते जगदीशांगणे नृप।
माझामाल्यं समानीय सुदर्शननमि न्यसेत्।।
यमेश्वरानितकं तावत् पूर्ववत्तं समानयेत्।
क्षेत्राधिपतिरीशोऽयं यमेशास्यो यतो नृप।।
परिशीलनाय क्षेत्रस्य सुदर्शनमनो नयेत्।
तं तथ पूजयित्वा च ततो वनदापनां चरेत्।
पुनर्दवालयं प्रापय पूर्ववत्तस्य पूजनम्।
सुदर्शनममि न्यसेत्
यमेनाख्यो यतो नृप तं तत्र पूजयित्वा)

६ R.U सर्वाकष्वपि। ७ K मन्दिरे, रायक। ८ K.U निमेक्षण। ९ U सूतश्रृतं। १० U तदभवतः। ११ U तदभवतः। १२ M तीर। १३ U क्षार।

षड्विंशोयध्यायः

ब्रह्मोवाच

अग्निकोणे ततः कुर्यादधिवासादि कर्म तत् ।
पवित्रायाः पुरः कुर्याद् वरुणार्चनमुत्तमम्[१] ।।१ ।।
स्वस्तिवाचनमाच्य्र्य त्वाचायृर्यवरणं ततः ।
तथैव ब्रह्मवरणं कुय्र्यादग्नेश्च पूजनम् ।।२ ।।
पात्रासादनकाकुय्यात्तथाधारचतुष्टयम् ।
भूरादिकां तदा कुय्र्यान्भवुातमनुत्तमाम्[२] ।।३ ।।
सहस्रहोमं वै[३] कुर्यान्मन्त्ररोजन मन्त्रवित् ।
अभावेन तदर्द्ध स्यात्तदभावे शतत्रयम् ।।४ ।।
पूर्ण्णहुतिं ततः कुर्य्यात्पवित्रा स्वर्ग्गतो भवेत् ।
राजते पट्टसूत्रे वा त्वष्टोत्तरशतैर्गुणैः ।।५ ।।
अभावे सयात्तदर्धेन तस्याभावेन सा पुनः ।
सप्तविंशतिसंश्खतेगुणैः स्याद्गुणिनां वर ।।६ ।।
यवप्रमाणग्रन्थीनां सप्तविंशतिसंयुता ।
चतुर्दिक्षु तदा कुर्यान्नाभिपर्यन्तमुत्तमा ।।७ ।।
एका स्याग्वानुपश्यन्ति मापादमपरा भवेत् ।
एवं रूपेण मतिमानेकत्र परियोजयेत् ।।८ ।।
त्रयाणां सुरमुख्यानां कुर्यात्प्रीत्यर्थमुत्तमः ।४ ।।
सर्वतोभद्रमालिख्य तत्र कुम्भं सुसन्यसेत्[५] ।।६ ।।
ततस्तत्र महीनाथ विष्णुं च परिपूजयेत् ।
गन्थादिभिश्च[६] नैवेद्यर्यजेद् भूपालसत्तमः ।।१० ।।
अग्रेपद्मत्रयं बीर शोभनं विलिखेद् बुधः ।
तेषु पद्मेषु पत्राणि वंशानि रुचिराणि च ।।११ ।।
अशुंकाव्यादितानये च[७] स्थापयेदतियत्नतः ।
इदं विष्णुरिति क्षिप्रं मन्त्रमुच्चार्य मन्त्रयेत् ।।१२ ।।
पवित्राच्छादनं तत्र कंतव्यमतियत्नतः ।
गन्थद्वारेति मन्त्रेण गन्थं दद्यान्मनोरमम् ।।१३ ।।
श्रीश्चेति[८] मनुं जप्त्वा पुष्पं दद्यानमहपते ।
वितानत्वेति[९] मन्त्रेण दद्यादामनकं बुधः ।।१४ ।।
चक्रमन्त्रेण मनसा स्थापयेच्च सुदर्शनम् ।
एवं रूपेन वै कुय्र्यात्सपवित्राधिवासिनम् ।।१५ ।।
देवानां तु महास्नानं कृत्वा सर्वांगलेपनम् ।

नवीनवस्त्रालंकारेभूर्षयेत्परमेश्वरम्।।१६।।
चतुर्विंशतिभिस्तावदुपचारैः प्रपूजयेत्
द्वादश्यां च तिथौ प्रातः पूजान्ते त्वधिवासितम्।।१७।।
पूर्व पवित्रकं दद्यादेवेभ्योनृपसत्तम।
महास्नानं विधानेन स्नापयेच्चन्दनेन तु।।१८।।
सर्वांगे[१०] लेपयेतवद्दिव्यनव्याम्बरार्पणम्।
अलंकारार्पणं कृत्वा ततोयसो पूजकोत्तमः।।१९।।
तथा ब्रह्मग्निशर्मा च त एव धरणीपते।
घण्टा काहालमधुरी मृदंगप्रमुखस्वनैः।।२०।।
छत्रचामरवृन्दादि[११] स्फुरितैश्च महोत्सवैः।
भ्रामयेयुः पवित्रासताः प्रासादं ते त्रिवारतः।।२१।।
क्षेत्रयमभितथा कृत्वा देवाग्रतो न्यसेत्।
वीक्षणं नेत्रमन्त्रेण प्रेक्षणं चास्त्रमन्त्रतः।।२२।।
तेन तालत्रयं कृत्वा तेनैव बन्धनं दिशाम्।
कवचेनावगुण्ठ्याथ मन्खराजेन मन्त्रवित्।।२३।।
अष्टवारं तदा जप्त्वा स्पृष्ट्वा तान् प्राबयेत्तदा।
देव देव जगन्नाथ भक्तानुग्रहकारक।२४।
वर्षपूजा फलप्राप्त्येः गुहाणेदं पवित्रकम्।
वलभद्र नमस्तेऽस्तु रोहिणी नन्दनप्रभो।।२५।।
अंगीक्रु मया देव दीयमानं पवित्रकम्।
भद्रे देवि नमस्तेयस्तु[१२] नमस्ते परमेश्वरि।२६।।
गृहाएेदं मया दत्तं माश्चारु पवित्रकम्।
इति सम्प्राथ्र्य देवांस्तान् पवित्रार्पणमाचरेत्।।२७।।
द्वितीयकालपूजार्थं[१३] पाकशालनतराद् दृतम्।
नैवेद्यं प्रचुरं दिव्यं चरुहोता समानयेत्।।२८।।
देवागे स्थापयेद् भक्त्या पंक्तिमध्ये यथाविधि।
अग्निशर्मा ततो दद्याद् बलभद्रं रमापतिम्।।२९।।
समुद्दिश्य परं माल्यं तदा दामनकं पुनः।
चन्दनं प्रतीवस्त्रे च[१४] पृथक् दद्याद् विशांपते।।३०।।
आचाय्र्यः पूर्वबत्पूजां कुय्र्यात्संयतमानसः।३१।।

सूत उवाच

पवित्रोत्सवमेतं वे प्रतिवर्ष द्विजोत्तमाः।
कुर्वन्ति जगदीशस्य पद्मयोनेस्तदाज्ञया।।३२।।
भाद्रवस्य च शुकलया द्वादश्यां बुधवासरे।

श्रवणासहितो यावत्तदा योगो महान् भवते।।३३।।
नोचेदयं द्विजास्तावद् द्वादश्यामपि तच्चरेत्।
पवित्रोत्समेवं ये कुर्वन्ति भुवि मानवाः।।३४।।
पश्यन्ति च मुहुस्तेषां सफलस्युर्मनोरथाः।
अन्ते ते विष्णुभवनं गच्छन्ति सुरदुर्लभम्।।३५।।
अस्योत्सवरस्थार्थकृते[15] वर्षपूजा च निष्फलां
तस्मादिमं पकुर्वीत प्रतिवर्ष तुष्टिदायकम्।
पवित्रोत्सवमाकुर्याद् भक्तिश्रद्धान्वितस्तदा।।३७।।

ब्रह्मोवाच

ततो मध्याह्नपूजान्ते जगदीशान्तिकं नृप।
प्रत्यर्च्चा समनस्थप्य पवित्रार्थमनातुरः।।३८।।
वन्दापयेत्तदा भक्त्या जन्मार्थ वामनस्य तु।
वन्दापयेत्तथा धीमान् प्रार्थयेत्परमेश्वरम्।।३६।।
आज्ञज्ञपय जगन्नाथ वामनोत्पत्तिहेतवे।
नानावतारलीलानां प्रवर्तक जगद्गुरो।।४०।।
इत्युक्त्वा पुजकस्तावद् पुष्पांजलिपुरःसरम्।
हरेर्दक्षांगतो मालां प्रत्यरोपरि[16] संन्यसेत्।।४१।।
निरोधनगृहाग्रेऽपि सव्रतोभद्रमण्डलम्।
लिखित्वा वासयेतत्र प्रत्यर्चा वामनात् दयाम्।।४२।।
अग्निशर्माणमाचार्य्यः संककृयति[17] तत्त्ववित्।
कुर्यादाचार्य्यवरणं ब्रह्मावरणमेव च।।४३।।
अग्निशर्मा पूजकस्तु पुण्याहवाचनं चरेत्।
सुवर्णस्य पलेनैव वामनप्रतिभां शुभाम्।।४४।।
तदर्द्धेन तु वा कुर्यात् प्रयत्नेन नृपोत्तम।
पंचाभृतैः स्नापयेत्तामदिते गर्भसंस्थिताम्।।४५।।
ध्यात्वा सम्पूजयेद्धीमानुपचारेश्च पंचभिः।
दुगधशर्करयोस्तत्र नारिकेलुल्स्य च।।४६।।
विकारसम्भवं कुर्य्यान्नैवेद्यं रचयेत्सुधीः।
ततस्त्वेजतु मन्त्रेण दद्यादगभोदकं पुनः।।४७।।
अदितेर्गर्भतो जातं वामनां तं विभावयेत्।
दाम दामनकं गन्थं पीतवस्त्रद्वयं तदा।
हरिद्रापिण्डकं दद्यादग्निशर्मा ततोऽर्धकः।।४८।।
पूर्ववत्वटिका ददयाचलदोपो प्रशान्तये।
कर्पूरारात्रिकं कुर्य्याद्वसोद्धारं च वे पुनः।।४६।।

वामनं गरुडस्याग्रे ब्रह्मचारिस्वरूपिणम्।
वेगेन[१८] रचयेतावत् शुद्धसुक्ष्माम्बरद्वयम् ।।५०।।
कृष्णाजिनं त्रिपुण्डं च यज्ञसूत्रकुशांस्तथा।
दण्डं कमण्डलु पात्रीं वामनाय प्रयच्छयेत्।।५१।
अग्निकोणे ततो दुर्गा वर्तते सुरवन्दिता।
तां तु सम्प्रार्थयन्तं तं वामनं भावयेदिति।।५२।।
दुर्गे देवि जगद्धात्रि सर्वकामप्रदेऽनधे।
दधिभिक्षां च मे देहि गिरिजे ब्रह्मचारिणी[१९] ।५३।।
श्रुत्वेमां प्रार्थनां दुर्गा स्यान्नपूर्ण्ण सुरेश्वरी।
वामनाय ददो भिक्षां रक्षो रक्षो विदारिणी।।५४।।
तदैवं मनसाऽचार्यो भावयित्वा त्रिवरतः।
ददयादधि मनोरम्यं वामनाय नृपोत्तम।।५५।
दुर्गया सहितं पंचोपचारैः संप्रपूजयेत्।
तन्दापनां ततः कुय्र्यादग्निशर्मा च पूर्ववत्।।५६।।
तातसौ[२०] स्वपदे रक्षेदुत्सवस्य समापने।।५७।।
नीलाचले पेऽखिललोकसारे
स्थितस्य विष्णोत्तमुं मुत्सवं हि।
भक्त्या निरीक्षितसुखं[२१] विभुज्य
ब्रजनित लोकं परमं मुरारेः।।५८।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये वामनजन्मोत्सवो नाम
षड्विंशतितमोऽध्यायः।

FOOTNOTES

Before sl. 1, K adds the following Verse -
पार्श्ववर्तनतो राजन् तदन्तरतः पुनः।
१ P वरुणार्च्चन। २ K, R, U मनिन्दिताम्। ३ K. R. U भा। ४ K. R मुत्तम्, U मुत्तम। ५ R संन्यसेत्, K. U संन्यसेत्। ६ R गन्धादिमिश्च विधिना, K. U गन्धादि नैव विधिना। ७ M. U त्व R Omits it। ८ U श्रीश्चते। ९ M द्वितानप्रेति, K, R द्वितानस्त्वेति, U द्वितानस्त्वेति। १० K, M. R. U सर्वांग। ११ R वृन्दानां। १२ R वृन्दानां। १२ K, M, R, U नमस्तुम्यं। १३ K, R तृतीय। १४ R ण। १५ R अस्योत्सवस्याकरतद्, K अस्योत्सवस्याकणाद्, U अस्योत्सवस्थानकृतो। १६ R प्रत्यर्चा परि, K, U प्रत्यर्चोपरि। १७ K, M, R, U संकल्पयति। १८ U धारा। १९ K, U वेशेन। २० K, U चारिणे। २१ K, M, R. U ततस्तौ। २२ U निरीक्ष्यात्र संखे प्रभुज्य।

सप्तविंशोऽध्यायः

ब्रह्मोवाच

तृतीयप्रहरस्यान्ते विष्णोस्तस्य परात्मनः[1]।
निद्राभंगः प्रकुर्यात्तु प्रार्थयेदर्चकः प्रभुम्।।१।।
जगदीश रमाकान्त नानालीनाप्रवर्तक।
शक्रध्वज समर्च्चायि ह्याज्ञापय नमोऽस्तु ते।।२।।
प्रार्थयित्वेति राजेन्द्र देवांगन्माल्यमुत्तमम्।
आनीय मर्दलाकरे दत्वा घण्टादिचामरैः।।३।।
महोत्सवैर्भ्रामयेच्च प्रासादं मंर्दलाकृतिम्।
तृतीयावरणस्यापि वाह्ये पूर्वदिशि न्यसेत्।।४।।
स्थाने तस्मिन् प्रथमितो वरुणार्चनमाचरेत्।
आचाय्र्योऽप्यग्निशर्माणं संकल्पयेति सादरम्।।५।।
अग्निशर्मा ततो राजन्नाचार्य्यवरणं चरेत्।
तथैव ब्रह्मावरणभग्निशर्मा चरेत्पुनः।।६।।
आचार्यत्स्वग्निपूजां च कुर्यात्पंचोपचारतः।
प्राजापत्यादिकां तावच्चतुराहुतिमाचरेत्[2]।।७।।
पुण्याहवाचनं कृत्वा ततो भूरादिकां द्विजः।
नवाहुतिं समाकुर्य्याद्दिक्पालान् स्वस्वमन्त्रतः[3]।।८।।
पंचविंशतिसंख्यातामाहुतिं रचयेत्तदा[4]।
अष्टाक्षरेण मन्त्रेण सहस्रं होमयेद् बुधः।।९।।
धुतावताः संहुतेद्धीमान् समिधश्च परन्तप।
नृसिंहमन्त्रराजेन तिलहोमं सहस्रशः।।१०।।
अभावेऽपि तदर्द्ध स्यात् पूर्णाहुतिमथाचरेत्।
एवं यथाविधितया होमं कुर्यर्यात् प्रयत्नतः।।११।।
शक्रध्वजस्य दण्डस्य हस्तानां पंचविंशतिः।
प्रमाणं स्याद्यथा रम्भा काण्डवद्धरणीपते।।१२।।
तत्काष्ठं खदिर चैव दरवं छेदवर्जितम्।
अथवा चम्पकं कुर्यादर्ज्जुनीयं च सालकम्[5]।।१३।।
ध्वजकाष्ठं विधातव्यं नान्यतोऽपि कदाचन।
चक्रद्वयेन तत्कुर्याद यन्त्रितं सुस्थिरीकृतम्।।१४।।
न स्पृशेत्तद्यथाभूमिं तत्तथैव समाचरेत्।
एतनमरूमिति प्राज्ञो भावयेन्नृपसत्तम।।१५।

सार्द्धहसतानतियुतान् चतुरस्रश्च वंशजान्।
सार्द्धहस्तद्वयान् लोकान् सप्त तत्र च कल्पयेत्।।१६।।
तानथो परिभागेऽपि कुर्यात्तु चतुरसत्रकान्।
भूलोकं पंचवणेश्च भूवलोकं च कर्बुरम्।।१७।।
स्वर्लोकं शुक्लवर्ण्णन्तु महलोकं च रक्त्कम्।
जनलोकं[५] कृष्णवर्ण हरिद्वर्ण तपस्तथा।।१८।।
सत्यलोकं परं कुर्यामुक्ता रजतवर्णकम्।
अष्टो नागांश्च भूलोके स्वस्वनाम्या प्रपूजयेत्।।१६।।
भुवलोके महाराज वामदेवं पराशरम्।
गौतमं गर्गमपरं पूजयेद्यर्चकोत्तमः।।२०।।
इन्द्रं यमं च वरुणं कुबेरं स्वर्लोकेऽखिलसौक्ष्यदे।।२१।।
जनलोके जनाधीशं वह्निं निऋतिमेव च।
पवनं च तथेशानं पूजयेत् पूजकोत्तमः।।२२।।
जनलोके[६] नृपश्रेष्ठ कल्पवृक्षं मनोरमम्।
वागीश्वरं चंगिरसं पूजयेश्च यथाविधि।।२३।।
तपोलोके तपःशीलं नारदं मुनिपुंगवम्।
सनत्कुमारमत्रिं च पूजयेत् क्रमतः पुामन्।।२४।।
सत्यलोके महीनाथ सावित्र्या सह मां तदा।
सरस्तत्या च सहितं भावयित्वार्च्चयेद् बुधः।।२५।।
लख्मीनारायणै तावन्मर्दला कृतकेऽर्चयेत्।
ध्वजनीं[७] च बहिः पुच्दं[८] बज्रं स्वं पचयेत्तथा[९]।।२६।।
पुरः पंचामृतेः स्नात्वा पूजा पंचोपचारिकाः।
कायर्या तत्र ततः शीध्रं पाकशालान्तरात्तदा[१०]।।२७।।
चरुहोता पायसान्नमानीयत स्थापयेत् पृथक्।
ध्वजस्य दिक्षु सर्वासु दिक्पालवलिमाचरेत्।।२८।।
वन्दापयेद् ध्वजं तावदग्निशर्मा ततः परम्।
ध्वजं पंचोपचारेण पूजयेद्दिनसप्तकम्।।२६।।
सतस्मिन् पूजिते शक्रध्वजे नृपतिसत्तम।
कदाचिन भयं राज्ये दुर्भिक्षं[११] नरकं पचेत्।।३०।
इन्द्रस्तु प्रीतिमासाद्य कालेऽम्बुवर्षणं चरेत्।
प्रजाश्च सुखसम्पना दीर्धायुश्च नृपो भवेत्।।३१।।
एवं विधिं प्रकृर्वीत प्रतिवर्ष नृपोत्तम।
अन्यथा शत्रुभीतिः स्यात्सम्यक् हानिश्च जायते।।३२।।

प्राजक्षयो भवेत्तावद्राज्यमंगो भवेद्धुवम् ।
तावते ऋषयो मुरान्तक तथा[12] संकीर्ण्णना नन्दिने
[13]निर्द्धताद्यचयासतपोवनरताः[14] शान्ताश्च दाताश्च ते१५ ।
तं सूतं कारयन्ति मज्जनयन श्रीनीलभूमिधर
प्रोद्दत्कन्दरे संस्थितस्य च हरेः संतुष्टुवुश्चेष्टितक् । ।३३ । ।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये शौनकादिमुनिसूतसम्वादे शक्रध्वजो[16] त्सवकथनं नाम सप्तविंशतितमोऽध्यायः

FOOTNOTES

१ K, M महात्म्नः । २ R तावच्चतु आहुतिं । ३ m मात्रतः । ४ M, R, U रचयेतथा । ५ U रसालजम् । sl. 18a is absent in K. ६ R महर्लोके । ७ R महर्लोके । ८ ए, M Uस्वं पूजयेतथा, R स पूजयेत्ततः, K संपूजयेत्ततः । ६ K पुनः । १० K, R त्ततः । ११ M दुर्भिक्षं नरकं पतेंत, K, R, U दुर्भिक्षं मरकं पतेत् । १२ K. U कथासत्कर्ण्ण नानन्दिनो । १३ U निर्द्धूता । १४ R पोर्जनरताः । U पोजनरताः । १५ R तो । १६ R शेण्टितं । १७ U शत ।

अष्टाविंशोऽध्यायः।

सूत उवाच

एवं कथयतो विप्रा ब्रह्मणोऽयं स भूपतिः।
कृतकृत्यतया श्रुत्वा पुनर्यतपृष्टवान्नृप।।१।।
तदब्रवीभि समासेन श्रूयतां मुनिसत्तताः।।२।।

ब्रह्मोवाच।

पौर्ण्णमी दिवसस्यास्य स्थिते दण्डत्रये नृप।
निद्राभंग हरेः कुर्याद गोविन्दाख्यां ततस्तदा।।३।।
प्रत्यर्चा पार्श्वतो नीत्वा पूजितः[1] स कृतांजलिः।
प्रार्थयेत् कमलाकानतं भक्त्या परमया नृप।।४।।
दीनबन्धो जगन्नाथ नीलाचलपते प्रभो।
आज्ञपयतु गोविन्दं पौर्ण्णस्युत्वहेतवे।।५।।
प्रार्थयित्वा देवांगान्मालां दद्यान्मनोरमान्।
छत्रचामरघण्टादिस्फुरदुत्सवसंयुतम्।।६।।
शक्रध्वजसमीपे तां प्रत्यर्चा च निवेशयेत्[2]।
शक्रध्वजं च गोविन्दं चक्रं च पूजकोक्रतमः।।७।।
पंचोपचारविधिवत्पूजयेच्छद्धयान्वितः[3]।
वन्दापयेदग्निशर्मा स्वस्थाने तं प्रवेशयेत्।।८।।
द्वादशीनतो राजन् नक्तं च सप्तमेऽहनि।
वासवीयं घ्वजं तोये विसृज्य त्वरितं क्षिपेत्।।६।।
अष्टमेऽह्नि ध्वजे ये च पश्यन्ति नृपसत्तम।
भवेद्वंशक्षयस्तेषां सुकृतं च विनश्यति।।१०।।

इन्द्रद्युम्न उवाचः –

ब्रह्मन् भाद्रवमासस्य विधिं श्रुत्वा महत्सुखम्।
प्राप्तमाश्विमासस्य विधिं कथय साम्प्रतम्।।११।।

ब्रह्मोवाच

साधु साधु नृपश्रेष्ठ भक्तोऽसि जगतापतेः।
यतो विष्णुकथां श्रुत्वा हृष्टो भवति सर्वदा।१२।।
आश्विनस्य च मासस्य विधिं श्रृणु नृपोत्तम।
आश्विनस्यासिते पक्षेऽष्टमया[4] वे सुमूर्तके[5]।।१३।।
प्रातःकालार्चनं कृत्वा क्षालयेद्देवतापुरः।
जयदुर्गा सुवर्णेन रचिता सुमनोहराम्[6]।।१४।।

भद्रान्तिकेऽपि संन्यसय सुभद्रां प्रार्थयेद् द्विजः।
भद्रे देवि नमसतुम्यमाज्ञापय सुरेश्वरी।।१५।।
दुर्गोतसवांगभूताय सहस्रकुम्भमेव तु।
अभिषेकाय गिरिजां जगदाननदकारिणीम्।।१६ ।
इति सम्प्रार्थ्य राजेन्द्र सुभद्रांगसत् स्रजं पुनः।
आनीय दुर्गादेव्याये प्राससादनस्य च पूर्वतः।।१७।।
मण्डपेऽत्र[७] मनोरम्ये नानामण्डनमण्डिते[८]।
चतुरस्रे चतुर्द्वारि नितानैः परिशोभिते।।१८।।
भद्रासने विवेश्याथ तां दुर्गा नृपसत्तम।
आचार्यो वरुणार्चा स मुय्र्यात्पंचोपचारतः।।१६।।
अग्निशर्माणमापूतं संकल्पयति सादरम्।
सोऽमरावरणं[९] ब्रह्मा ब्रह्मावरणमेव च।।२०।।
कुर्यादाचाय्र्या एवायं ततः पुण्याहवाचनम्।
आसनादींस्तथा दीपोपचारान्तं विधिं चरेत्।।२१।।
गन्थपुष्पोदकं तावत्संस्कुयर्रद् बीक्षणादिना।
सोवर्ण्ण राजतें वापि कुभीं ताम्रसमुदभवम्।।२२।।
कुर्यात् श्यातपलाम्भोभिः परिपूर्ण यथा भवेत्।
पंचाशत्पलपूर्ण[१०] ब्रह्यभागे रचयेत्पुनः।।२३।।
तदर्द्ध रचयेद्धीमसन् ततो नूनं न कारयेत्।
कुर्याच्चेन्निष्फला पूजा जायते च परन्तप।।२४।।
वनदुर्गा वनुं मन्त्रं पठन् वै स्नापयेत्ततः।
अष्टोत्तरसहस्रेण जलकुम्भेन चाम्बिकाम्।।२५।।
ततो नव्याम्बरेणेष प्रोंछयेददतियत्नतः।
नानांकारवृन्देन नवे वसनेन च।।२६।।
भूषयित्वार्च्चयेत्पंचोपचारेण यथाविधि।
वन्दापनां ततः कुय्र्यात्स्वपदे तां[११] निवेशयेत्।।२७।।
अशुभं चेद्दिने चास्मिन्नष्टम्यां च विधिं[१२] चरेत्।
अष्टम्यां च विधिं[१३] प्राप्य पूजाननतरतो नृप।।२८।।
समाधवां न्यस्य दुर्गा रत्नसिंहासने विभोः।
प्रार्थयेत्पुण्डरीकाक्षं माधवायार्चकोत्तमः।।२६।।
आज्ञपय सुरश्रेष्ठं नानाकोतुकारक।
माधवं दुर्गाया सार्द्ध पूजार्थ करुणानिधे।।३०।।
ततो मालां दक्षिणांगात्संन्यसेन्माधवोपरि।

भद्रे भद्रपदे मातराज्ञापय सुरेश्वरि।।३१।।
दुर्गेय पूजिता पावन्माधवेन समं शुभे।
इति भद्रां[१४] स[१५] सम्प्राथ्र्य दुर्गा तन्माल्यमर्प येत।।३२।।
छत्रघण्टादिकं[१६] राजन्मुत्सवं रचयेनमुहुः।
ततः पश्चिमदिग्भागं नीत्वा तो प्रार्थयेद् द्विजः।।३३।।
माधवात्तिदशावीश दूरयात्राश्रमध्नकम्।
पाद्यं गृहाण मे दत्तं भक्त्या परमया विभो।।३४।।
पाद्यं गृहाण त्वं दुर्गे मार्गकमंविनाश्नम्।
श्रद्धयापि मया दत्तं सर्वकामपद्रे शुभे।।३५।।
इति सम्प्राथ्र्य राजेन्द्र दुर्गमाधयोस्तयोः।
पादाम्बुजतले रम्ये कर्पूरोदकमाक्षिपेत्।।३६।।
पादप्रक्षालनं जातमिति चिते विभावयेत्।
ततोऽर्चकस्तत्र पदे स्नापयित्वाऽर्च्येच्च तौ।।३७।।
वन्दापयेदग्निशर्मा पूर्वोक्तविधिना नृप।
त्रिकालार्चावसाने तौ रात्रो मार्गे महोत्सवेः।।३८।।
नीत्वा तो स्वपदे रक्षेदेवमष्टो दिनावधि।
ततोऽष्टमदि राजन् तृतीयाऽर्च्चावसानतः।।३९।।
वन्दापयेत्ततो रक्षेत्पदे स्वे सुमनोहरे।
एवं रूपेण तस्येव प्रासादस्य बहिः पुनः।।४०।।
अष्टो दिनान्यमिव्याप्य पूर्वस्यां दिशि पूजयेत्।
प्रथमेऽह्नि नृपश्रेष्ठ प्रथमार्च्चावसानतः।।४१।।
वन्दापनां प्रकृर्वीत भक्त्या परमया तद्वा।
अष्टमयां च तिथौ राजन् यामिन्यां यतमानसः।।४२।।
तृतीयकालपूजाया अनते वन्दापनां चरेत्।
विष्णोर्दक्षिणदेशे तु नवम्यां पूजयेत्ततः१७।।४३।।
एतत्सप्तदशाह्नेषु वासरस्य क्षयो यदि।
न भजेद्दक्षिणे पूजा तत्र चैवाष्टमी दिने।।४४।।
वन्दापयेन्नयमयां च भक्तिभावसमन्वितः।
वृद्धिश्चेद्बाह्यसतो राजन् पूजयेननव वासरान्।।४५।।
स मुहूर्ते दशम्यां वे प्रातः पूजावसानतः।
जगदीशाग्रतः कुर्याद वरुणार्चनमुत्तमम्।।४६।।
मंगलारोपणार्थ वै मुयर्यात्पुण्याहवाचनम्।
प्रत्यर्च्चा च नृपश्रेष्ठ देवतानां समीपतः।।४७।।

नीत्वा बलादिदेवानां मंगलारोपणं चरेत्।
वन्दापनां ततः कुर्यात्त् प्रार्थयेद्देवसत्तमान्।।४८।।
बलभद्रंनमस्तेऽस्तु नमस्ते मूषलायुध।
राममाज्ञापय विभो दशम्युत्सवहेतवे।।४९।।
जगदाधार देवेश जगदीश जगत्पते।
माधवं मदनं कामगोपालं कृष्णमेव च।।५०।।
विजयां[१८] च दशम्यां वे ह्यूत्सवाय़ जनार्दन।
आज्ञापय जगन्नाथ जगतं हितकारणात्।।५१।।
हरिद्रावर्णरुचिरे भद्रे भद्रपदे शुभे।
उत्सवायं दशम्यां तां दुर्गामाज्ञज्ञपयेश्वरीम्।।५२।।
इति सम्प्राथय्र्य नृपते देवेम्यो माल्यमुत्तमम्।
आनीय दद्यात्प्रतयचर्चास्तास्ताच्चैव यथाक्रमम्।।५३।।
छत्रघण्टावलीराजज्क्षहालमर्दलादिभिः[१९]।
लोलैश्चामरवृन्देश्च तथैव जयनिःश्वनैः।।५४।।
महोत्सवं विद्यायाशु प्रासादभ्रमणं तथा
कृत्वाच्र्चाशपिपय्र्यन्तं नीत्वा पंचोपचारतः।।५५।।
प्रत्यच्र्चाः पूजयेतत्र आचाय्र्यो[२०] नृपसत्तम।
वन्दापयेग्निशर्मा ततः स्वंपदमानयेत्।।५६।।
तस्मिन् दिने नृपश्रेष्ठ पश्यत्त्यर्द्धाशिनीं च ये।
लमन्ते कोटिगुणितं क्षेत्रवासफलं च ते।।५७।।
एकादश्यां तिथो प्रातः पूजानन्ततो नृप।
नानालंकारशोभाढ्य़ं रचयेत्परमेश्वरम्।।५८।।
प्रातःपूजा ततः कृत्वा कर्पूरारात्रिकावधि।
नारिकेलातिलाद्रार्णा दुग्धशर्करयोस्तथा।।५९।।
मुद्गानां पक्वरम्भाणां ईक्षुखण्डचयसय च।
सम्बन्धं[२१] दिव्यनैवेद्यं सुव़ासितजलान्विम्।।६०।।
रचयित्वां यथायोग्यं ततो गन्धादिना यजेत्।
कृष्णागुरु परार्द्धेन धूपं कृत्वा ततः परम्।।६१।।
संस्कृत्य वंशव्यजनेर्वाजयेच्च शनैः शनैः।
एतध्युपोद्भवं धूपं[२२] घ्राणयेद्देवतांगकम्।।६२।।
कर्पूरचिह्नकं क्षिप्त्वा सुवासिततरं परम्।
मूलमन्त्रं समुच्चाय्र्या धृत्वा हस्तद्वये पुनः।।६३।।
प्राणदेशं प्रदर्श्याथ कुर्याद्दीपं च संस्कृतम्[२३]।।

न घण्टावादनं कुयर्यु[२४] कर्वहिघण्टाध्वनिर्भवेत्।।६४·।।
गीतं नृत्य तदा नानावाद्यानां निःस्वनं भवेत्।
उत्सवे सति भूपाल पूजकास्तं[२५] निजासनात्।।६५।।
उत्तिष्ठन्तो गबामाज्यजर्जरं सुमनोहरम्।
वेदांगुलप्रमाणं च दीपं नव्यांशुकान्पितम्।।६६।।
कर्पूररजसा युक्तं गन्थव्याप्तदिगनतरम्।
तादृशं दर्शयेयुस्ते मूलमन्त्रपुरःसरम्।।६७।।
उषितवा स्मरणं विष्णोःकृत्वा नैवेद्यसंस्कृतिम्।
विधाय[२६] भक्तिभावेन दद्युः पूजकसत्तमाः।।६८।।
पंचाशज्जपमाचय्र्य गण्डूषात्र[२७] विसंख्यकान्।
ताम्बूलदानं कर्पूरदीपनीराजनं तथा।।६६।।
एवंरूपेण राजेनद दामोदरमनामयम्।
स लक्ष्मीकं यजेन्नित्यं कार्तिकं पोर्णमीमनुम।
एतत्पूजासु ये मर्त्या नीराजनमकल्षम्।
पश्यन्त्ति सर्वपापेभ्यो मुक्ताः यान्ति हरेः पदम्।।७१।।
राजंसतदा नीलधराधरस्थितं सतुतं सुरेन्दाभिरच्युतु च ये।
विलोकयन्ति स्फुटपद्मलोचनं विभूज्य शर्मात्र भविद्यपारगाः।।७२।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये अष्टाविंशातितमोऽध्यायः।।

FOOTNOTES

१ R, U पूजकः। २ K, U प्रवेशयेत्। ३ K, M, R, U विधिना पूजये। ४ K,; M, R, U पत्रे सप्तम्यां। ५ च is absent in K, R, U. ६ R सुमनोरमं, K सुमनोरमां। ७ K, U मण्डपेऽपि। ८ M, P नान। ६ M सोऽपि चा चार्य, R सोऽयं माचाय्र्य, K सोऽयमाचाय्र्य, U आचार्यवरणं चेवं १० K पंचाशज्ज्लपूर्ण्णं। ११ K, U महाहयभावे। १२ M ता। १३ K, R तद् विधिं। १४ K, M, R तिथौ प्रातः। १५ M दुर्गा। १६ K, R, U सु। १७ M तत्र। १८ M, R, U पूजयेत्तथा। १६ K, M, R, U विजया यां। २० K, M, U भ्राज । २१ K, M, R पूजको, U ततश्च। After sl. 60a. the following Verse is present in K, M, R, U -

पयःपेटीसमूहस्य तथा द्राक्षफलस्यं च।

The Variant in M is पेटीकमूहस्य, in R पेटम्मूहस्य, and in M, R द्राक्षीपलस्य च। २२ K, M, R, U संबनिध। २३ K, R, U धूमं प्रापये। २४ R. U च संस्कृति, K स्व संस्कृतिं। २५ K कृय्र्याद्बहि। २६ K पूजास्ते च निजसनात्। २७ M निधाय। २८ K, R, U गण्डूषान् रविसंख्यकान् । २६ R मुक्तो।

ऊनत्रिंशोध्यायः।

तस्मिन्नेव दिने राजन्नीराजन् रमापने।
वन्दापनां प्रकुर्वीत त्रैलक्यानन्ददायिनीम्।।१।।
पोर्ण्णमीदिवसस्यांस्य दण्डे च .तुसंशके।
स्थिते निद्राविभजनं विष्णोः कुर्यात्परन्तप।।२।।
जगदीशाग्रतो रक्षेत् सुदर्शनमनामयम्।
ततो बद्धांजलिर्भूत्वा पूजकः प्रार्थयेद्धरिम्।।३।।
जगद्बन्धो जगन्नाथ जगदानन्दकारक।
भक्तत्रासहरः श्रीमान् क्षेत्रभ्रमणहेतवे।।४।।
भूतप्रेतपिशाचादि कूरकर्मक्षयाय च।
आज्ञपय सुररेष्ठ सुदर्शनमतिप्रभम्।।५।।
सम्प्राथ्र्यानीय[१] माल्यं वै देवांगच्च्वक्रमर्पयेत्[२]।
विद्यापतिकुलाद्भूता विश्वाससुकुलोद्भवाः।।६।।
ते नयेयुर्विमाने तं नानाभूषणभूषितम्।
प्रासादभ्रमणं कृत्वा चांगिरारमभार्गतः।।७।।
यमेश्वरानितकं नीत्वा तत्र गन्धादिना यजेत्।
विद्यापतेः कुलोद्भेत स्तववन्दापयेनमुदा[३]।।८।।
ततः प्रासादपुरतस्तृतीया वरणस्य च।
पूर्वद्वारे चरेद् राजन् पुनर्वन्दापनां बुधः।।९।।
ततोऽग्रे जगदीशस्य स्नानं पंचाभृतेन तु[४]।
कृतास्य स्वपदे रक्षेदुपचारेर्मनोहरेः।।१०।।
चजुविंशतिमिस्तावदाचाय्र्या सुरसत्तमान्
समं सुदर्शनेनैव सत्वारस्तेऽपि पूजकाः।।११।।
यजेयुसते तृतीयार्चा कर्म कुर्यात् सुरादरात्।
वन्दापयेदग्निशर्मा सुदर्शनमनिन्दम्।।१२।।
ततश्चतुर्थकालार्च्चा प्रान्ते देवाग्रतः पुनः।
शुद्धं शुक्लशुकानीह त्रिपंक्तिकतया न्यसेत्।।१३।।
गुवाकपुअजंसं जं पक्वं च कदलीपुंजमुत्तमम्।
लांगलीफलपुंजं च संरक्षदिलुखण्डकान्।।१४।।
सवर्ण्णरोप्यरचितां लांगलीप्रतिमास्तथा।
लाजां लाजविकारं च शर्करायार्विकारजम्[५]।।१५।।
कर्कटीफलवृन्दं व पुरतोऽस्य न्यसेत्तथा।

आचाय्र्याश्चासनं दिन्तं[६] कृत्वा च दीक्षणादिना।।१६।।
समर्पयेयुः संस्कृत्य पठित्वा प्रार्थनामिमा्।
हे देव देव लक्ष्मीश दीनबन्धो जगत्पते।।१७।।
एतत्तिव्यापि[७] सर्वाणि स्तीकुरु त्वनुकम्पया[८]।
दन्तिदन्त समुदभूतान् ह्यूतकर्मपकीर्तितान्[९]।।१८।।
सारात्सारतान्[१०] भूप सोवर्ण्णान् रौप्यकानपि।
कपैदा चिन्तितान् कृत्वा सोऽग्निशर्मा चेकस्तथा। ९।।
ब्रह्मा च देवतानां च कुय्र्यासुदद्यूतभावनाः[११]।
लक्ष्म्या सह मुरारातिं ततो वन्दापयेनमुदा।।२०।।
भूतलीलां च ये विष्णोः पश्यन्ति भुवि मानवाः।
सर्वसुखं विभुज्यात्रं विष्णुलोकं ब्रजनित ते।।२१।।
मासानां प्रवरे मासि कार्तिके पुध्यवर्द्धने।
एकादश्यां च शुक्लायां लक्ष्मीदामोदरस्य वै।।२२।।
पूजानीराजनान्तेऽपि[१२] पुनर्वन्दापनां चरेत्।
देवाडक्तन्नमालय वस्त्रादिं समुताच्र्य महीपते।।२३।।
महास्नानं प्रकुर्वीत चतुःसमविलेपनम्।
क्त्वा नव्याम्बरां मालां भूषणानि शुभानि च।।२४।।
दत्वा मध्याह्पपूजां च कृत्वा वन्दापयेत्तदा।
ततश्चतुर्थपूजानते आचाय्र्याः शुद्धमानसाः।।२५।।
अग्निशर्माप्रतिनिधिर्गत्वा शयनमन्दिरम्।
कवाटोत्फोटनं कृत्वा गृह्णन् पुष्पांजलिं पुनः[१३]।।२६।।
प्रार्थयेदग्निशर्माऽसौ रोहिणेय परन्तप।
रेवतीरमणः श्रीमान् पूर्ण्णचन्द्रनिमाकृते।।२७।।
हलायुध[१४] नमस्तेऽसतु निद्रा मुंच प्रमोऽधुना।
इति सम्प्राथ्र्य हलिने दद्यात्पुष्पांजलिं च सः।२८।।
पुनः पुष्पांजलिं राजन्नग्निशर्मा दद्यत्पराम्।
प्रार्थयेतरिया भक्त्या भक्त्वत्सलमीश्वरम्।।२९।
जगन्नाथ नमस्तेऽस्तु विघ्णो सर्वाधनाशन।
शंखचक्रगदापद्मस्फुरत्कर सरोरुह।।३०।।
यस्त्वं[१५] मासानतिव्यापय[१६] चत्वारः परमेश्वरः१७।
निद्रासुखं प्रभजसे तदनते साम्प्रतं प्रभो।।३१।।
उत्तिष्ठोत्तिष्ठ देवेन्द्र अपराधं क्षमस्व मे।
सुमुखीभव मो देव भवतः[१८] परिपालने।।३२।।

विश्वम्भर नमस्तेऽस्तु चतुर्वर्गप्रदायक।
पठित्वेति सुरश्रेष्ठ पुष्पांजलिमभिन्यसेत्।।३३।।
भद्रे देवि सुरेशानि चतुवर्ग प्रदायिनी।
निद्रां मुंच जगन्मात मंगलानि प्रयच्द'मे।।३४।।
इत्युक्त्वा वितिरेत् भद्रां प्रतिपुष्पांजलिं तदा।
ततस्ते पूजया[19] भक्त्या प्रतिमाः शुभदर्शना[20]।।३५।।
गृहीत्वा देवताग्रेऽपि न्यसेयुः शोभना[21] तदा।
भद्रासने ततः कृत्वा महास्नानं परंतप[22]।।३६।।
प्रोंच्छयेननववस्त्रेण नव्यानि वसनानि च।
गन्थं पुष्पं तथा दत्तवा रक्षे[23] य देवसन्निधो।।३७।।
बलादिदेवतांगादि लपेयच्च चतुः समैः।
नव्यवस्त्राणि गन्थांश्च माल्यानि भूषणानि च।।३८।।
दत्त्वा स्वभूषयेत्तावदीकतया परमया नृप।
ततो वे पाकशालाया नैवेद्यं विविधं बहु।।३९।।
आनीय पूर्ववद्देव पुरतो विन्येसेन्मुदा।
पूर्ववत् सोऽग्निशर्माऽपि गन्थं दामनकं परम्।।४०।।
माल्यं पीताम्बरे दिव्ये दद्यास्ते पूजकास्ततः।
यजेयुश्च ततो राजन् भक्त्या[24] वन्दापयेद् विभुम।।४१।।
एंतदुत्थापानेत्थिं ये पश्यन्युत्सवमादरात्।
सर्वकामफलं प्राप्य मुक्तास्ते पापजालतः।।४२।।
देहान्ते विष्णुभवनं गच्छन्त्यमरदुर्लभम्।
द्वादश्यां च तिथौ राजन् सायंपूजावसानतः।।४३।।
पंचामृतैः परिसनाप्यय गरुडं पूजकोत्तमः।
गन्धवस्त्रालंकृतिभिर्मूषयेदरुणानुजम्।।४४।।
यजेद् गन्धादिनालाजविकारादिकमुत्तमम्।
दद्यान्नैवेद्यमानदात्कुर्याद् वन्दापनां नृप।।४५।।
निदां मुंच खगश्रेष्ठ त्वं विष्णोर्बाहनोत्तम[25]।
जातमुत्थापनं विद्धि मुरारातेर्जगत्पतेः।।४६।।
इति सम्प्रार्थ्य गरुडं दद्यात्पुष्पांजलिं शुभाम्[26]।
आचार्यो भावयेत्तवदुत्थितं गरुडं हृदा।।४७।।
प्राप्तायामथ पोर्णम्यां लक्ष्मीदामोदरार्चनम्।
कृत्वा वन्दापनां रम्यां पश्यतां सुखवर्द्धि नीम्२७।।४८।।
सायंपूजावसानेऽपि जगन्नाथान्तिकं पुनः।

नारायणप्रतिकृतिं शोभमानां नयेत्तदा।।४६।।
लक्ष्मीपते नमस्तेऽस्तु लोकानुग्रहकारक।
नारायणप्रतिकृतिकृतिं शोभमानां नयेत्तदा।।४६।।
लक्ष्मीपते नमस्तेऽस्तु लोकानुग्रकारक।
नारायणप्रतिकृतिमाज्ञज्ञपय सुरेश्वर।।५०।।
दीपोतवाय सदवं[२८] प्रोंछयेत् देहमात्मनः।
सन्ध्यादिपठनं[२९] कुर्यात् यथाविधि नरेश्वरम्।।५१।।
तावनमौनं चरेद्धीमान् यावत् क्षेत्राटनं भवेत्।
मार्कण्डेयेश्वरं मर्त्यो हरेरास्ये[३०] ह्यूदारधीः।।५२।।
वामदेव नमस्तेऽस्तु विरुपाक्ष नमोऽस्तु ते।
त्रिशूलउम्बरुवर स्फुरद् वृषीवाहन।।५३।।
पार्वर्तीरमण श्रीमान् करुणावरुणालये।
इति सम्प्राथ्र्य देवेशं दण्डवत् प्रणमेन्नरः।।५४।।
मनसा पूजयेद् भक्त्या सर्वपापप्रयान्तये।
ततः प्रासादीभागत्य पादप्रक्षालनं चरेत्।।५५।।
आचम्य विधिवद्धीमान् विष्णोर्दशनमाचरेत्।
यः कुर्याद् दर्शनं विष्णोः पादप्रक्षालनं विना।।५६।।
वर्षत्रयेण सुकृतं दर्शनं विफलं भवेत्।
विष्णुद्राही भवेन्न्यूनं सर्वर्ध्माबहिष्कृतः।।५७।।
प्रासादोपरि विभ्राजच्चक्रं प्रथमतो नृप।
प्रार्थयेद् भक्तिभावेन विष्णुहस्ताम्बुजस्थितम्।।५८।।
विष्णुशसत्र नमस्तेऽस्तु कोटिसूर्यसमप्रभ।
तापखस्य विध्वंसि दर्शनं कारय प्रभोः।।५६।।
सर्वपापप्रशमनं चतुवर्गफलप्रदम्।
दर्शनं जगदीशस्य कारय त्वमविघ्नतः।।६०।।
इत्युक्त्वा प्रणमेच्चक्रं ततो मुक्त्श्वरं ब्रजेत्।
शूलपाणे नमस्तुम्यं पार्वतीपतये नमः।।६१।।
मुक्तिप्रदस्व[३१] मे वासि मुक्तीश्वर नमोऽस्तु ते।
एतत् प्रार्थनया भूप पश्येन्मुक्तीश्वरं ब्रजेत्।।६२।।
वटमूलं ततो गत्वा प्रार्थयेद् वटमुत्तमम्।
वटवृक्षं नमस्तेऽस्तु विष्णुरूपोऽयि नान्यथा।।६३।।
यतो क्षये ब्रह्मलये पापं मोचय भामकम्।
इति सम्प्राथ्र्य राजेन्द्र न्यग्रोथं प्रणमेज्जन्।।६४।।

गणेश[३२] उल्लसद्देह सर्वविध्नविनाशक[३३]।
विघनं नाशय विष्णवात्म्न् मुक्तिमुक्तिप्रदायक।।६५।।
नमस्तुभ्यं जगन्नाथ नीलाचलपते प्रभो।
पठित्वा प्रार्थनामेतामाज्ञामालां ततो न्यसेत्।।६६।।
छत्रघण्टादिसहितं नारायणमथो न्यसेत्[३४]।
महास्नानं समाचार्य्य पुनर्गन्थादिना यजेत्।।६७।।
एकविंशतिसंख्या तान् गोधृतैः परिपूतान्।
सप्तपंक्तिस्थितान् दीपान् संस्कृतानर्पयेद्बुधः।।६८।।
नारायण सुरश्रेष्ठ शंखचक्रगदाब्जधृक्।
अंगीकुरू प्रभो दीपान्नेतानद्य मयाऽर्पितान्।।६६।।
इत्युक्त्वा प्रार्थनामन्त्रं[३५] कुर्याद् दीपं समर्पणम्।
कृत्वा वन्दापनां भूप स्वपदे तं निवेशयेत्।।७०।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये कार्तिकमास –
पूजाविधिर्नाम एकोनत्रिंशोऽध्यायः

FOOTNOTES

१ Before sl. 1. ब्रह्मोवाच. is present in K. M, R, U. १ संप्रार्थनीय। २ R देवचक्रसमर्पयेत्, K देवाच्चकं समर्पयेत्। ३ K. R स्तत्र वनदापनां, U सतत्र वन्दापयेन्मुदा। ४ M च। ५ R शर्कराया च विकारानं। ६ M आचार्यश्चासनादिं त, K आचाय्र्याश्चासनादिं ते। ७ M, R, U एतद् द्रव्याणि। K इतत् द्रव्याणि। ८ M कंपय, K र्ण्यानुकम्पया। ६ K प्रवर्तिकान, R प्रवर्तकान्। १० K,M सारत सारतरान्, U सारांतसारतरान्। ११ K, U कपर्दान, चित्रितान्। १२ M, U कुय्र्यासुर्दतभावनां, K. R कुर्ययासु सुतभावना। १३ K,U सुतलीला, U दुतलीलां। १४ M निराजनायेपि। १५ R पुनः ते। sl. 27 and 28 are absent in R. १६ K, M, R परमेश्वर। २० K. M, R. U जगतः। २१ K. M, R, U पूपका। २२ K, R प्रतिदर्शनाः। २३ K, M, R, U शोभने। २४ K. R समाचरेत्। sls. 37b and 38 are absent in R. २५ K रक्षेतां देव, u रक्षेत्तादेव। २६ M भक्त्या वन्दापयेद्,K. R विधुत, K. R चकुर्वन्दापनां तथा। २७ K. R विष्णोर्वाहनसत्तम। २८ K. R शुभां। २६ वर्द्धनं, U वर्द्धिनीम्। ३० K. M. R सर्वात्मान् मुक्तिमुक्तिप्रदायक, U सर्वात्मन् मुक्तिमुक्तिप्रदायक। Mss. K, M, R. U Omit sls. 51b-56 in the Ch. 29 but add those in Ch. 30. ३१ K, M, R, U वन्दनां। ३२ K हरं, U हरं पश्ये दुरारधः। ३३ K, M. R. U Omits sl. 57 in the Ch. 29 but adds this in Ch. 30. ३४ M भक्ति। ३५ K गणेशारिण सन्देह। ३६ K, M

विनाशन। Mss. K. M, R. U read sl. 65b as follows -

विघनं नाशय मे विष्णोदर्शनं त्वां नमाम्यहम्।

Mss. K< M< R. U Omits sls. 58-64 in the Ch. 29 but also those in Ch. 30. Ms. U Omits sl. 65. ३७ K. M. R. U नयेत्। ३८ U मन्त्री। ३९ After sl. 67a, add the following - मादे कुत्रचिद् देशे तुतुभ्रदासने न्यसेत्।
but the Verse in K. M, R. U प्रासादे कुत्रचिद्देशे तं तु भद्रासने न्यसेत्। After sl. 70, the following Verses are present in K -

एतद् विधानं प्रसमीक्ष्य ते य शृणोति वा श्रावयते च भक्त्या।
सव सर्वपापाद् विनिहत्य शोकाच्चान्ते पुनविष्णुपुरं ब्रजेत्।

त्रिंशोऽध्यायः

ब्रह्मोवाच

मार्गशीर्षे च रोजेन्द्र मासे तस्य जगत्पतेः।
या लीला स्यात् प्रवक्ष्यामि श्रृणुध्वं यतमानसः।।१।।
मार्गषीर्षस्य मासस्य कृष्णपक्षे शुभोदये।
पंचमी दिवसे तावत्क्षेत्रभ्रमणमाचरेत्।।२।।
मार्कण्डेया वटे रम्य प्रथमं स्नानमाचरेत्[1]।
तद्वदामि समासेन श्रृणु भूपति सत्तम।।३।।
प्रथमं धौतपादस्थात्सम्यगाचम्य वारिणा।
कृतशोचक्रियः पूर्वनरः संकल्पमाचरेत्।।४।।
विष्णुप्रीत्र्थमत तं प्रार्थयेत्तीर्थसत्तमम्[2]।
तीर्थोत्तम् नमस्तेऽस्तु सर्वपापविनाशक।।५।।
मार्कण्डेयेन मुनिना विनिर्मित सुपावन।
नानातीर्थफलश्रेणी पदत्वं तीर्थसत्तम।।६।।
स्नानं करोमि ते तीरे हर पाचयं मम।
इमं मन्त्रं समुच्चर्य स्नायाद्धर्मप्रदेऽम्भसि[3]।।७।।
वासुदेववस्तुतिं कृत्वा दर्शने त्वां नमाम्यहम्[4]।
हत्युक्त्वा च नमेदमूयो गणेशं सर्वकामदम्।।८।।
ततो वटेश्वरं गच्देतप्रार्थयेतपरमेश्वरम्[5]।
वटेश्वर नमस्तेऽस्तु नमस्ते वृषमध्वज।।६।।
स्व्यम्भुवे नमस्तेऽस्तु सर्व पापं प्रमोचय[6]।
मंगलां प्रार्थयेद्धीमान् सर्वकल्याणदायिनीम्।।१०।।
नमस्ते मंगले देवि सर्वमंगलकारिणी।
विष्णुशक्तैये नमस्तेऽस्तु वटमूलविनाशिनी।।११।।
नीलाचलपतेर्विष्णोदर्शनं देहि ललसम्।
अनुकम्पाय मां देवि नमस्तुभ्यं सुरेश्वरि।।१२।।
स्तुत्वेत्थिं मंगलादेवीं प्रणमेत् भक्तितो नरः।
वटं प्रदक्षिणीकृत्य क्षेत्रपलान्तिकं व्रजेत्।।१३।।
क्षेत्रपाल नमस्तेऽस्त[7] सर्व पापं विनाशय।
क्षेत्रवासं सदा देहि तमखारोहण प्रिय।।१४।।
इति स्तुत्वा नभेदभूयः रीकण्ठं क्षेत्रपालकम्८।
नरसिंहस्थलं गत्वा प्रार्थयेत्तदनन्तरम्६।।१५।।

उग्ररूप नमंस्तेऽस्त शंखच[९] गदाधर[१०]।
हिरणकशिपोर्वक्षो दारुणोरुनखोत्करः[११]।।१६।।
चन्द्रसूर्याग्निमन्ने सर्वपापविनाशकृत्।
मुकितप्रद नमस्तुभ्यं पापं संहर मु प्रभो।।१७।।
प्रार्थयित्वा नृपश्रेष्ठ नरसिंह नमेद् बुधः।
विमलं विमलास्थ्घानं गत्वा तां प्रार्थयेत्तथा।।१८।।
दूर्गे देवि नमस्तुभ्यं विष्णुभक्तिप्रदायिनी।
विमले निर्मलध्यिं दहि सर्वप्रदेऽनधे।१९।।
त्वं लक्ष्मीस्त्वं च साविंत्रीत्वं हि देवि सरस्वती।
सर्वरूपे नमस्तुभ्यं सर्वपापप्रणाशिनी।।२०।।
चतुर्वर्गप्रदे विष्णोर्वल्लमे त्राहि मां शुभे।
इति प्रार्थनया भूप प्रणमेद् विमलां नरः।।२१।।
पातालेश्वर देवेश नीलकण्ठ वृषध्वज।
दीनबन्धो कृपासिन्धो त्राहि मां भवसागरात्।।२२।।
स्तुत्वा नत्वा नृपश्रेष्ठ पातालेशं नमेदं[१२] बुधः।
ईशानेश धराधीश नन्दमानन्दवर्द्धन।।२३।।
त्रिलोचन नमस्तेऽस्तु खाहि मुत्युंजय प्रभो।
इति स्तुत्वा नमस्कुय्र्यात्तमीशानेशमीश्वरम्[१३]।।२४।।
वैनतेय महाबाहो विष्र्णोर्वहनसारभृत।
पंक्षिराज नमस्तेऽस्तु विष्णुभक्तिं प्रयच्छ मे।।२५।।
अनयरा[१४] परया स्तुत्या स्तुत्वा तमरुणानुजम्।
प्रणिपत्य मुहुर्भु मौ द्वारपालान्तिकं ब्रजेत्।।२६ं।
जय त्वं विष्णुभक्तोऽसि विजयत्वं हरेः प्रियः।
विष्णोः स्वरूपतां धृत्वा[१५] यदासा ते च वां भजे।।२७।।
इत्थिं स्तुत्वा द्वारपालौ प्रणमेन्नृपसत्तम।
प्रासादान्तःस्थलं प्राप्य पश्येद् वे सुरसत्तमान्।।२८
स्तुत्या परमया भक्त्या भक्तभक्तिभिदे भुवि।
नमस्ते रेवतीकान्त रोहिणीवन्दन प्रभो।।२९ं।
सप्तोरुगफयाष्टि शीर्षाय च नमो नमः।
कुन्देन्दुशंखधवल चलतकुण्डलमण्डित।
कादम्बर्यारुणरीमन्नेत्रपदमजनार्ति हन्।।३०।।
हलायुथ[१६] नमस्तेऽस्तु[१७] नमस्ते मुषलायुध[१८]।
जगन्नाथ नमस्तेऽस्तु नमस्ते भक्तवत्सलः।।३१।।

नमस्तेऽस्तु रमाकान्त[१९] करुणावरुणालय।
जीलजीमूतसंकाश नीलाचलपते प्रभो।।३२।।
नीलाम्बरानुज श्रीमन्नीलंपद्मज लोचन।
दीनबन्धो कृपासिनधो दीनं मां भवसागरात्।।३३।।
पद्माकारे नमस्तुभ्यं नमस्ते[२०] परमेश्वरि।
सृष्टिस्थितविनाशानां हेतुस्त्वं जगदम्बिके।।३४।।
सुदर्शन नमस्तुभ्यं कोटिसूर्यसमुद्धते।
वासुदेव कराम्भोजस्थितस्त्वं त्राहि मां भवान्।।३५।।
हे[२१] श्रीमाधव देवेश शंखरु प नमोऽस्तु ते।
संसारसागरे मग्नं मामुद्धार जगद्गुरो ।।३६।।
त्राहि मां कमले लक्ष्मि विष्णोर्वक्षस्थलस्थिते।
दारिथ्रानलसन्तप्तं कटाक्षमृतसेचना त्[२२]।।३७।।
विश्वधात्रि नमस्तुभ्यं गदारुपे हरिप्रिये।
हर मे पापनिचयं सर्वशर्मप्रदायिनी।।३८।।
ततः परमया भक्त्या जगदीशं सुरेश्वरम्।
एमऋपता तावन्मनसा तं प्रपूजयेत्।।३६।।
पद्मं चाष्टदलं सुवर्णघटितं नानामणि प्रस्फुरं।
त्कान्तिश्रेणिमनोहरं स्फुटतरं धात्रा स्व्यं निर्मितम्।।४०।।
नित्यं चासनमाद्यन्मुनिगणेर्भत्त्रापि संचिन्तिम्।
पद्मेश स्फुटपद्मलोचन हृदा दत्तं व्वमंगीकृरु।।४१।।
स्वगताय जगदीशपेशलं पुण्यषट्कममलं मयार्मितम्।
परिगृहाण विभो करुणानिधे तदधुनामधुना परिरंजितम्[२३]।।(४२)
शामाकादियुतं[२४] मतं मतिमतां स्फीतं सुशीलं[२५] हृदा।
दत्तं पाद्यमिदं गृहाण च मया भकतया सुधासन्निमम्।।४३।।
अध्र्य तावदिदं यवादिसहितं दत्तं मया चेतसा।
कारं[२६] वारमनन्तकेशव हरे लक्ष्मीपते स्वीकरु।(४४)
लवंगजातीफलकादियुक्त गृहाण[२६] देवायाचमनीयमेतत्[२७]
दत्तं हृदा तुभ्यमन्तशर्मप्रदं मया तत्परया च भक्त्या।।४५।।
दध्यादिद्रवसंयुक्तं मधुपर्क मनोरमम्[२८]।
मनसातरसा दत्तं पूर्वन्मनसार्पितम्।
गृहाण जगतां नाथ पाथोरुह निमेक्षण[२९]।।४७।।
गंगादितीर्थवरर्नुितनीरपूर्णेर्लक्ष्मीपतेः कनककुम्मचयेर्मनोज्ञेः।
कर्पूरकुंकुमलषन्मृगाभिगन्धव्यामिश्रितेश्च मनसा स्नपनं करोमि।।

चंचच्चण्डकरस्फुरद्धतिहरं रम्यं मनोज्ञं प्रियं[30]
पीतं पूततरं महासुखकरं सूक्ष्म त्वमंगीकुरु। (४८)
नानाभूषणसंचयं सविनयं यात्रा स्व्यं निर्मितम्।
चितेन्नेष मयार्पितं त्वमधुना स्वीकृर्वज श्रीपते।।४६।।
यज्ञोपवीतेन समं मुरारेर्दिव्योतरीयं[31] मनयसार्पितं यत्।
गृहाण तच्चारुतरं नवीनं हे दीनबन्धो भव सानुकम्पः।।५०।।
गुगन्धमानन्दमरेण दत्तं चित्तेन मे माधवदेव देव।
गंगीकरु त्वं कृपया मुरारे संसारसारं वर सौरभश्चिः।।५१।।
मल्लोचम्पकपतिकासुतुलसा पुन्नागसतमितकी।
कुन्दोदुत्तमपुष्पजाल रचिता मालातुला मजुला।।५२।।
कर्पूरागरुवासिता मधुरिपो चित्तेन भक्त्या मया।
दत्तां सम्प्रति गृह्यतां नवधनश्यामाभिरामाकृते।।५३।।
गन्धव्यापतगन्तरोऽतिमधु रो यो योगनिद्राहरो
दत्तो मे मनसा महासुखकरो धूपोऽधुना गृह्यताम्(५४)
दिक्संख्याकलितांगधूप वसुसंयुक्तो मुरारे तथा
दीपोऽयं नवगोधृतोत्करलसद् वत्त्र्या स्फुरद्गृह्यताम्।।५५।।
चंचद् गव्यध तेन पाचिततरं सारं महासुन्दरम्
नानापूपभरं सदा सुखकरं स्पीतं तथान्नं बहु।
नानाव्यंजनसंयुतं बहुवणिक्[33] द्रव्येः परं रंजितम्!
हे लक्ष्मीश विशेषतोजनकं[34] दत्तं हृदा गृह्यताम्।।५६।।
पुनराचमनीयामादरान्मथुरानाथ मया ह्यथार्पितम्।
मुखशुद्धिकरं गृहाण मो अपराधं विविधर क्षमस्व मे।।५७।।
जातीफलादिसहितं सुहितं हतारे
ताम्बुलजातुलं विमलं मनोम्। (५८)
आनन्दवृन्दजनकं मनसार्पितं मे
पूतं गृहाण नवनीदर[35] सुन्दर त्वम्।।५६।।
छत्रचामरभरोत्तमवीणा यन्त्रं वाद्यमधुरी प्रमुखाढयम्।
गीतनृत्यरचनं मनसा यत्कथ्लिपतं सुखयतां नृहरे त्वाम्।।६०।।

ब्रह्मोवाच[36]

एवंपेण राजेन्द्र श्रीपतेर्मनसार्चनम्।
कृत्वा प्रदक्षिणं कुर्याच्चातुर्वारं शनैः शनैः।।६१
स्त्सूयात्पुरुषसूक्तेन पुरुषः पुरुषोत्तम।
आसन्नप्रसवा नारी कक्षहस्त शिरोघटा[37]।।६२।।

यथा गच्छेतथा विष्णो ग्रजेत्तस्य पदक्षिणे।
हृदेश हस्तयुगलं पुटीकृत्य विंशांपते।।६३।।
कुर्यात्प्रदक्षिणं विष्णोर्न कुया्र्यादबा्हुकम्पनन्।
भूजयोच्चालनं चैव निष्फलं सत्यात्प्रदक्षिमिदं हरेः।
पदे पदेऽश्वमेधानां फलं प्राप्नोत्संश्सयम्।।६५।।
अभ्यन्तरे यदा कर्तुमसमर्थो भवेन्नरः।
द्वितीयावरणेकृत्वा तत् फलं लभपते धुवम्।।६६।।
दण्डवत्प्रणमेत्मर्त्यो वारं वारं नृपोत्तम।
कृतकृत्यस्तदा भूयो विष्णोस्तस्य निरीक्षणात्।।६७।।
सूतके मृतके चैव यदा विष्णुं विलोकयेत्।
विष्णुद्रोही भवेन्नून सुकृतं तस्य नश्यति।।६८।।
यदा स्यात्कृतसंकल्पो विष्णोर्दशनकर्मणि।
द्वितीयावरणं सप्तप्रदक्षिणमयं चरेत्।।६६।।
प्रदक्षिणे ततो[३९] भूप तत्फलं लभते च[४०] सः।
कदाचितद् दुर्जनो लोको महाविष्णुं स्पुशेद् यदि।।७०।।
सूतके मृतके चैव महास्नान समाचरेत्[४१]।
बृहद् विधितया कृत्वा महास्नान समाचरेत्[४२]।।७१।।
सवागे लेपयेद् दिव्य चन्दनं चारु सौरमम्।
शीतलद्रव्यनैवेद्यं दत्वा सन्तोषयेद्धरिम्।।७२।।
निरोधनलये सोऽपि पुजाकाले विशेद् यदि।
सर्व तदेव नैवेद्यं बहिष्कृता नृपोत्तम।।७३।।
सचैलं स्नानमाच्र्यस्तदा कृय्यादुदारधीः।
महास्नानं हरे काय्र्यमन्यथा नारकी भवेत्।।७४।।
सूतके मृतके पाकशालायां चेद्विशेन्नरः।
पाकशालान्तरस्थायि द्रव्यं सर्व बहिः क्षिपेत्।।७५।।
पाकशालाऽथ धोतव्या वेष्णवाग्नि पुनश्चरैत्।
पुनः पाकं समाचय्र्य केशवाय निवेदयेत्।।७६।।
सूतके मृतके मर्त्यः स्पृशेद्दिव्यं हरेर्यदा।
कदाचिद्दव्यं हरये न देयं तच्च भूपते।।७७।।
अन्यथा तु भवेद्राजा विष्णुद्रोही न संशयः।
रक्षो ग्राह्या च सा पूजा विफला जायते धुवम्।।७८।।
ये पश्यन्ति जनार्दनं क्षितितले नीलाचलेशं विभुम।
तेन श्री कमलोद्भवेन विधिना चोक्तकन भक्त्या[४३] मुहुः।(७६)

ते मर्त्याः सुखमत्र पुत्रनिकरैः सार्द्ध विभुज्याऽखिलम्।
देहान्ते पदमच्यतस्य सहसा गच्छन्ति देवेप्तिसम्[४४]।।८०।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये दर्शनविधिर्नाम त्रिंशतमोऽध्यायः[४५]।।

FOOTNOTES

१ K, R, U स्नान कर्म यत्। २ M तीर्थमुत्तमं। Ms. L OMits sls. 1-8 but includes those in ch. 27. ३ M स्नायाद्धर्महृदोऽम्मसि। Mss. K, R, Omits sls. 5-7 . After sl. 2, Ms. L adds -

मार्कण्डेय उवाच। प्रथमं स्नान कर्मवत्।

sl. 8a is absent in K, R. ४ M, U प्रोंछयेद्दहमात्मनः Mss. K, M, R, add sls. 51b-65 of ch. 29 after sl. 8a of ch. 30. ५ U नृपतीश्वर, L धरणीसुराः। ६ K, M, R, U विमोचय। ७ K, M, R, U नमस्तुभ्यं कपालासिधर प्रभो। ८ R क्षेत्रपालनं। ९ L प्राथयो द्विजाः। After sl. 8 Ms. L adds -

इतिश्रीक्षेत्रहात्म्ये सप्तविंश अध्याय, सू उवाच।

१० K, M, R, L शंखं चक्रधरं प्रभो, U शंखचक्रगदाप्रभो। ११ M दारुणोरुनखोत्कर, R दारुणात्करुनखोत्कर, K दारुणेकनखोत्कर। १२ U नमेद् बुधः। After sl. 21, Ms. L adds -

ततः सरस्वतीम् गम्ये वीणाहस्तोऽनुप्रदाम्।
सरस्वती नमस्तुभ्यं ज्ञानदायिनी शोभने।
विद्यादेवही जगन्माता वाग्देवीं त्वां ततो नम्यहम्।
महालक्ष्मी नमस्कुर्या ततो विष्णुप्रियाशुभाम्।
गोविलदिन नमस्तुभ्यं नमे देही पुष्कलम्।
अनमोस्नतथा देही जगन्नाथ प्रियेऽनधे।
इति प्रार्थनया तत्र पद्मासनमतां नमेत्।

१३ M नमीश्वरम्। १४ R अनयं १५ M यात्रसाने च तो भजे, U यात्रा सासी च तो भजे।जK, R नमस्तुभ्यं। १६ K, M, R, U, L मूषलायुध। १७ K, R नमस्तुभ्यं। १८ M, R लंगलायुध, L, U लांगलायुध। After sl. 31a , the following Verse is present in K, L, M, R -

प्रलंत्वाटे महाधोरोत् संसारात्र हि मां प्रभो।

(Varient in U, महाधोरात्), १९ K, M, R नमस्ते कमलाकानत, U नमस्ते करुणाकान्त। After sl. 33, the following Verses are present in K, L, M, R, U -

त्राहि त्वं परमानन्दजगदानन्दकन्दक।
भद्रे देवि नमस्तुभ्यं सर्वभद्रप्रदायिसनी

तापत्राया भियुते मां त्राहि संसारसागरात्।

(The Variant in K, R are जगदानन्दकारक, श्रीमधव। २० K, R सेचनं।

वक्षत् मानसि पूलजां श्रृणुध्वं द्विजसत्तमा।

इति श्रीश्रेत्रमाहात्मये अष्टाविंश अध्याय सूत उवाच।

२१ L परिनिर्मितम्। २२ K, M, U श्यामाकादियुतं, R श्यामाकादियुतं। २३ K, R, U सुशीतं। २४ K, R, U वारं वारमनन्त। २५ K, R, U पूतं गृहाण। २६ U Omits देवा। २७ M मनोहरं। २८ R निरेक्षणं। २६ K, M ,R, U दिव्याम्बरं सुन्दरं। ३० U दिव्योत्तरीयं। ३१ R सोममुक्ति, K सौरभक्तिनमनोज्ञं। ३२ R मालातुली मंजुला। ३३ K, R क्षणिक सद्दव्ये; U क्षणिक भद्रव्ये।। ३४ K, R, U दजलं। ३५ K, R नवनीरसुन्दरत्सवम्। Ms. L Omits sls. 54 - 59a. ब्रह्मोवाच is absent in K, R, Ms. sl. 64, Ms. L adds - । सूत उवाच ३७ K, R शिरोधलः। ३८ M इत्थं। Ms. L omits sl. 66. After sl. 64, Ms. L adds -

इति श्रीक्षेत्रमाहात्म्ये एकत्रिंश अध्यायः।

३६ K, M, R, U तत्प्रदक्षिणतो। ४० L वृ। Ms. L OMits sl. 66. ४१ K, M, R, U हरेर्नप। Ms. L omits sls. 70-76. ४२ L तिसं मुदा। Ms. L omits 77-78. ४३ L विप्रोत्तमा। ४४ L Omits it.

एकत्रिंशोऽध्यायः

ब्रह्मोवाच

दर्शनान्ते ततो गच्छेत् श्वेतगंगा शुभोदयाम्।
प्रार्थना परया भक्त्या सर्वपापपोपशान्तये।।१।।
गंगे देवि जगद्धात्रि नमस्ते विष्णुवल्भे।
दक्षपार्श्वे स्थिते मार्तज्जयामि[1] तवाम्मसि।।२।।
पापं नाशय तां गंगा नत्वा चैव मुहुर्महुः।।३।।
स्नानं च विधिवत् कुय्र्यान्माधवो तो विलोकयेत्।
श्वेतमत्स्यकनामानौ पश्यतां सर्वकामदौ।।४।।
श्वेतमावदेवेशं पश्यतां तमुकितदायकम्।
पापान्त्रकारसूय्र्यस्त्वं पापं नाशय मे प्रभो।।५।।
मत्स्य माधवभावेन मुक्तिदस्त्वं सदानध।
विष्णोर्दक्षिणपार्श्वस्थ पापं नाशय[2] मेऽधुना।।६।।
इत्येवं प्रार्थनामुक्त्वा पश्येतो माधवौ नरः।
कृतकृत्योऽभवेत्तावतायसोः दर्शनतो नृप[3]।।७।।
उग्रसेनस्थलं गत्वा प्रार्थयेदतिमक्तितः।
उग्रसेन महाबाहो भवान् राक्षसनाशक[4]।।८।।
क्षेत्रस्नानं जनानां च दण्डदोऽस्य पराधतः।
आया जगदीशस्य दण्डदोऽध पराधिनाम्।।९।।
आज्ञापय महावीर समुद्रस्नानहेतवे।
हनूमनतं ततो दृष्ट्वा चिरंजीवनमव्ययम्[5]।।१०।।
रामपप्रिय नमस्तेऽस्तु नमस्ते पवनात्म्ज।
पापं हर कपिश्रेष्ठ दुव्रतासुननाशन[6]।।११।।
एवं स्तुतिं[7] च कृत्वा वे तीर्थराजानितकं व्रजेत्।
दण्डवत् प्रणमेत्सप्त वारं वारिधिमव्ययम्।।१२।।
संकल्पं विधिवत्कुर्याद्दुरितक्षयपूर्वकम्।
नीलाचलपतेर्विष्णोः प्रीतयर्थ नृपसत्तम।१३।।
वालुकावेदिकां कृत्वा चतुरस्रं सुशोभनाम्।
तत्र चक्रं विधायाथ तन्मध्ये जगदीश्वरम्।।१४।।
सप्तधा मूर्तिमत्रैव चेकामूर्ति विभावयेत्।
उपचारैः षोडशमिर्मनसा पूजयेद् द्विजः।।१५।।
अथवा पंचमिस्तावदुपचारैः हरिं यजेत्।

दश दिक्षु यजेत्तावद् गोविन्दादीन परंतप[८] ।।१६।।
आज्ञापय[९] महाबाहो शंखचक्रगदाबफज्धृक् ।
समुद्रे स्नातुकामं मां नीलाचलपते प्रभो ।।१७।।
प्रार्थयित्वा तदा विष्णुं नमस्कुर्यात् पुनः पुनः ।
समुद्रं तं नमस्कृत्य प्रार्थयेदतिभक्तितः ।।१८।।
तीर्थराज नमस्तेऽस्तु नमस्ते सरितांपते ।
त्वद् दर्शनं भवेत् पुण्यस्पर्शनं पापनाशनम् ।।१९।।
त्वयि स्नानात् भवेन्मुक्तिस्नात्वां वन्देऽपि नित्यशः ।
तदानीं[१०] त्वज्जले सिन्धो करोभि स्नानमुत्तमम् ।।२०।।
यथोक्तफलदो भूत्वा पाप नाशय मे बहु ।
इत्युक्त्वा परमप्रीतास्त्रिवारं स्नानमाचरेत् ।।२१।।
तीर्थराजं नमस्कुर्यात्ततश्च तर्पणादिकम् ।
कृत्वार्थ पूर्ववत् पूजां मनसा तरसा चरेत् ।।२२।।
पूर्ववत् स्नानमाचयृर्य विष्णोस्तस्य परात्मनः ।
लोकंश्वरं ततो गच्छेत् प्रार्थ येद् भक्तितो द्विजः[११] ।।२३।।
गंगाधर नमस्तेऽस्तु लोकनाथ महेश्वर ।
सर्वव्याविविनाशय पार्वग्तीपतये नमः ।।२४।।
नमामि त्वां महाबाहो पापं तापं च नाशय ।
इत्युक्त्वा परया भक्त्या लोकनाथं नमेद् बुधः ।।२५।।
कुष्ठव्याधिसमायुतः पश्येद्यर्ण शिवें च यः ।
कुष्ठव्याधिविनिर्मुक्तः कामवत्सुन्दरो भवेत् ।२६।।
ततो गत्वा मंगलायाः समीपं प्रार्थयेच्च ताम् ।
दुर्गे देवि नमस्तुम्यं मंगलजे मंगलपद्रे ।।२७।।
पापं नाशय मे क्षिप्रं सर्वदेत्यविनाशिनी ।
शंखपृष्ठस्थिते मातः क्षेत्रस्य हितकारिणी ।।२८।।
धनं धान्यं सदाऽरोग्यं पुत्रं पौत्रं च देहि मे ।
इति स्तुत्वा महीनाथ प्रणमेनमंगलां शुभाम् ।।२९।।
आलम्बा दक्षिणे कृत्वा इन्द्रद्युम्नो सरो व्रजेत् ।
संकल्पं च पुरः कृत्वा प्रार्थयेतीर्थमुत्तमम्[१२] ।।३०।।
इन्द्रद्युम्न नमस्तुम्यं[१३] नमसतेऽमृतदायक ।
पापं नाशय मे क्षिप्रं मज़्जतोहयमेधज ।।३१।।
इत्युक्त्वा तज्जले स्नात्वा तर्पणाविदकमाचरेत् ।
ततो विल्वेश्वरं गतवा प्रार्थयेदवनीश्वर ।।३२।।

महादेव नमस्तेऽस्तु नमस्ते शंकरप्रभो।
विश्वेश्वर नमस्तुभ्यं दर्गेश वदो भव।।३३।।
वृषध्वज नमस्तेऽस्तु सर्वकाम फलपद्र।
पापलालहरः श्रीहमान् वतुवर्गलप्रद।।३४।।
नमस्तुभ्यं नमस्तुभ्यं नमस्ते राक्षसान्तक।
नीलकण्ठ नमस्तेऽस्तु महारुद्र नमोऽस्तु ते।।३५।।
शिव सर्वेश देवेश्रा नागेश स्मरसूदन।
लिंगरुपी शिवस्त्वं हि क्षेत्रस्याधिपते प्रभो।।३६।।
त्रिपुरारे नमस्तुभ्यं मृत्युंजय[१४] नमोऽस्तु ते।।।।
दिव्यैः विशंतिसंख्यातैर्नामभि नृपसत्तम्।।३७।।
बिल्वेश्वरं नमस्कुर्यात्तीर्थराजजले पुनः।
चक्रतीर्थ परं स्नानं कुर्याद्वे विधिना द्विजः।।३८।।
ततो गच्देर्द्दिशं नाथ यमेशनिकटं पुनः।
प्रार्थयेत्परम प्रीत्या म[१५] कलेशोपशानतये।।३९।।
यमेश्वर नमस्तेस्तु पापं मे हरं संहर[१६]।
स्तुत्वा नत्वा यमेशं तं चामुण्डासन्निधिं ब्रजेत्।।४०।।
चामुण्डे चण्डिके दुर्गे महापत्[१७] प्रविनाशिनी।
शिवे शिवप्रिये गौरि त्राहि मां दुःखसागरात्।।४१।।
इत्युक्त्वा नृपशार्दूल प्रणमेत् सिंहवाहिनीम्।
कपालमोचन श्रीमान् दक्षयज्ञ विनाशन[१८]।।४२।।
मणि कर्णतटस्थाय नमस्तुभ्यं महेश्वर।
अनया परया भक्त्या नमस्कुर्यात्तमीश्वरम्।।४३।।
तृतीयावरणं राजान् प्रासादस्य महत्तरम्।
ततः प्रदक्षिणं कृत्वा दण्डवत्प्रणतिं तथा।
स्तुत्वा परमया भक्त्या ततो निजगृहं व्रजेत्।
निराहरो जितक्रोधो जितनिद्रो निशां नयेत्।।
एवं प्रदक्षिणं[१९] कुयूर्यात्क्षेत्रस्य पंचमी दिने।।४६।।
ततः षष्ठीदिने प्रातः कृत नित्यक्रियः शुचिः।
देवार्च्चनादिकं कृत्वा यथाशक्ति द्विजन्मने।।४७।।
भोज्यं दद्यान्निजेः सार्द्ध कुयूर्यात्पारणमुत्तमम्।
एवं यः कुरुते भूप क्षेत्रभ्रमणमादरात्।।४८।।
पृथिव्याः शतवारेण भ्रमणात् फलमालमेत्।
देहान्ते विष्णुभवनं स गच्दत्सुरदुर्लभम्। (४९)

ततोऽष्टमी दिने प्रातः पूजानन्तरतो नृप।
महास्नानविधिं कुयृयाद्विष्णोस्तस्य कृपानिथेः।।४९।।
सर्वागे चन्दनं दत्त्स्वां नवयवस्त्रार्पणं चरेत्।
पुष्पालंकारनिचयैः भूषयेत्कमलेक्षणम्।।५०।।
देवतानां पुरो देशे क्लाशन् स्थापयेन्नृप।
आचायृर्याः रचयेयुस्ते वरुणार्च्चनुमुत्तमम्।।५१।।
ततो मध्याहृपपूजा सा कर्तव्य च यथाविधिं।
मलकव्यजनादीनि[२०] सा कर्तव्र्या व्यंजनानि च।।५२।।
नानापूपसमूहं च शितान्यैवेद्यमीदृशम्।।५३।।
दद्यांनमध्याह्नपूजायां सुखार्थ कमलापतेः।
ततोऽर्चकध्च ब्रह्मा च सोऽग्निशर्मा च भक्तितः।।५४।।
मंगलारोपेण मे वै कुयृयासुः प्रीतये हरेः।
वन्दावयेयुः क्रमतो विष्णुं नीलाचलेश्वरम्।।५५।।
एतदुत्सवमाननदाद् यः कुयृर्याननृपसत्तम।
पश्येद् वा परया भक्त्या मुक्तः स्यात् पापवृन्दतः।।५६।।
अनते विष्णुपरं गच्छेत्सर्वशर्मप्रदं[२२] परम्।
अस्मिन् मासि शुभे लग्ने सुमूर्ते शुभे दिने।।५७।।
दद्यान्नवान्मतुलं हरये विविधं बहु।
नानापूपसमायुक्तं[२३] व्येजनावलिसंयुतम्।।५८।।
मुद्‌गानि नूजनद्रव्य व्यंजनेयिचतरंजनैः।
परमान्नयुतं त वद्दद्यान्नूरभिदे मुदा[२४]।।५९।।
दत्पा वन्दानां कुर्याद् विष्णुप्रीणनहेतवे।
कृष्णायां च चतुर्दश्यां तृतीयार्च्चावसानतः।।६०।।
देवाग्रे रचयेद् वृक्षं तण्डुलेनृपसत्तम[२५]।
तन्मध्ये गोधृतेः पूर्ण्णानष्टविंशतिसंख्यकान्।।६१।।
त्रिपंक्तिकतया दीमान् स्थापयेदतिभक्तितः।
न०[२६] चात्र कलस्यार्थ शुभद्रार्थ तथा नव।।६२।।
दश चात्र कलस्यार्थ सुभद्रार्थ तथा नव।।६२।।
दश चाम्बुजनेत्रार्थमन्तः कर्पूरवर्तिकाम्।
स्थापयित्वा सदादिं च कृत्वा दीपांस्तु भूपते।।६३।।
संस्कुर्याद प्रार्थयेद् देवान् प्रगृहयं कुसुमांजलिम्।
नमस्ते देव देवेश जगतापं पतये नमः।।६४।।
समर्पयामि दीपास्त्वं गृहाण परमेश्वर।

बलभद्र नमस्तेऽस्तु फणाविकटमस्तक।।६५।।
तापत्रयहर श्रीमान् रेपतीपतये नमः।
मया दत्ताः प्रमो दीपाः दीप्यमानाः प्रगृहयताम्।।६६।।
देवि भद्रे नमस्तुम्यं नमस्ते जगदम्कि।
अंगकुरु कुरंगाक्षि[२६] दत्तान् दीपान् मयाऽधुना।।६७।
इति सम्प्राथर्य राजेन्द्र तद्दीपार्पणमाचरेत्।
अग्निशर्मार्चको ब्रह्मा क्रमात् वन्दापयेच्च तान्।।६८।।
एकादशी वदाचायर्यः कुर्यर्युर्नीराजनं मुदा।
प्रासादं भ्रामर्यित्वा तु दर्शयेयुश्च चक्रिणम्[२७]।।६९।।
प्रासादमूलतसतदावदाशित्रं दीपमण्डलम्।
कुय्र्याद्दशदिने कुय्र्याद्दिवं च प्रतिपत्तिथौ।।७०।।
तस्यां प्रतिपद श्रीमान् तिथौ चैवातिथि प्रिय।
प्रत्यर्चा चरमां पृथ्वींमाज्ञामालामभिनयसेत्।।७१।।
जगन्नाथ नमस्तुऽस्तु नीलरत्नाकर प्रभो।
जगद्विताय देवाय नमस्तुभ्यं नरेश्वर।।७२।।
आज्ञापय महाबाहो प्रतिमाः शुभदर्शनः।
दीपोतसवाय जगतां हिताय कमलापते।।७३।।
इति स्तुत्वा जगन्नाथं दद्यादाज्ञास्रजं पुनः।
प्रतिमास्ताः समानीय देवाग्रे कुत्रचिद् न्यसेत्।।७४।।
दीपोत्सर्ग ततः कुयर्यादाचाय्र्याः पृथिवीपते।
आशीर्वादं परे कृर्यर्यात्तदा वेदिकमन्त्रतः।।७५।।
गीतनृत्यमहाबाद्याद्युत्सवेस्ताः समानयेत्।
मरीचान्तिकमत्यांत्र यजेत्पंचोपचारतः।।७६।।
दीपार्पणं ततः कृत्वा भक्त्याः वन्दापनां चरेत्।
स्वस्थाने स्थापयेत्तस्मात् प्रतिमास्ताः परन्तप।।७७।।
शुक्लायामध पंचम्यां चतुर्थर्य चावसानतः।
चतुर्विशतिभिर्देवमुपचारेस्तु पूजयेत्।।७८।।
महास्नानं ततः कुय्र्याद् विधिना गनधलेपनम्।
रचयेद्देवदेवेश परिधानोत्तीयके।।७९।।
देवागे पूर्ववत् कुय्र्यादष्ठपूर्णाम्बुजखयम्।
तेषु वंशानि पात्राणि वस्त्रैराच्छादितानि च।।८०।।
तेषु शुक्लं च रक्तं च कृष्णं च वसनं नृप।
शिरसे जगदीशस्य कर्तव्यमतियत्नतः।।८१।।

देवांगावरणार्थ वै शुक्लं चीनं चित्रितम्।
एवंरूपेण राजेन्द्र सप्त सप्त चरे पृथक्।।८२।।
एकविंशतिसंख्यानि वसानानि नवानि च।
तुषु पात्रेषु संरक्षेतसुदर्शनकृते पुनः।।८३।।
चित्रं वस्त्रं च संरक्ष्य माधवार्थ तथैव च।
लक्ष्मीकृर्तेऽक चित्रं विश्वधात्र्यै तथा भाजने।
वितानस्त्वेति मन्त्रेण वस्त्राण्याच्छादेयत्पुनः।।८५।।
तद्रक्षणाय मनया वस्त्राण्याच्छादेयत्पुनः।।८५।।
बलभद्रस्य भद्रायां स्वमन्त्रजपकृद् भवेत्।
सर्वासु दिक्षु वस्त्रानां दिक्पालान् पूजयेत्ततः।।८७।।
वतुर्दिक्षु पुनर्भूप गणेशं क्षेत्रपालकम्
महादेवं च दुर्गा च पूजयेदर्चकसतदा।।८८।।
एवं कुर्यात् सुवस्त्राणामधिवासविधिं द्विजः।
अन्यथा न हि वस्त्राणां शुद्धिः स्यान्नृपतीश्वर।।८९।।
ततः षष्ठीदिने प्रातः पूजानन्तरतो हरेः।
नव्यांशुकार्पणं कुर्यादभिभाव समन्वितः।।९०।।
अधिवासितं द्रव्याणि[२९] नवानि विविधानि च।
अग्निशर्माच्र्चको ब्रह्मा घण्टाद्युत्सवयसंयुताः।।९१।।
प्रासादं भ्रामयेयुस्ते त्रिवारं तां सुरानपि।
तथैव भ्रामयित्वाऽत्र देवाग्रे स्थापयेन्नृप।।९२।।
आच्छादितांशुकं तावद्कहिश्कृत्य सुसंयतः।
वीक्षणादिकसंस्कारं कुर्यात्तत्र यथाविधि।।९३।।
ततो वस्त्रं करे धृत्वा प्रार्थयेद्देवसत्तमान्।
बलदेव नमस्तेऽस्तु रोहिणीनन्दन प्रभो।।९४।।
आच्छादयामि वस्त्रेस्त्वामपराधं क्षमस्व मे।
देव देव हृषीकेश जगदीश नमोऽस्तु ते।।९५।।
क्षीरसागरमध्येऽपि नित्यं शेते च यः पुमान्।
निर्गुणो व्यापकः रीमान् परोप निरंजनः।।९६।।
तं देवं नीलशिखरे लोकानुग्रहकम्म्या।
स्त्रीपुंनपुसकतया व्यक्तं त्वां सप्तधा विभो[३०]।।९७।।
स्थितमाच्छाद्याम्यद्य वस्त्रेविष्णोर्नमोऽस्तु ते।
भद्रे देवि सुरेशानि सर्वभद्रप्रदायिनी ।।९८।।
वस्त्रेराच्छादयामि त्वां मंगलं देहि मे सदा।

इति सम्प्रार्थ्र्य राजेन्द्र नवीनाम्बरसंचयैः।।९९।।
सप्तधा मूर्तिमानन्दात् पृथगाच्छादयेत्तदा।
मुखं[31] विना हरेः सर्वावययावृतिमाचरेत्[32]।।१००।।
अलंकारेश्च माल्येश्च भूषयेतदनन्तरम्[33]।
पूर्ववत्तं हरिं भूप भक्तया वन्दापयेन्नरः।१०१।।
तथान्यदेवताभ्यश्च विप्रेभ्यो गुरवे तदा[34]।।
दीनेभ्योऽभिश्वं वस्त्रं दद्याद्यावरणाय वै।।१०२।।
रवौ धनुस्थिते भूप सामान्ये प्रातरर्चने।
नाना पूँपानि रम्याणि दद्यादिष्टानि[35] विष्णवे।।१०३।।
एतत्प्रावरणोत्सवं च कुरुते यो वा मुदा पश्यति।
क्षिप्रं सर्वमनोरथं च लभते पुत्रप्रपोत्रैः समम्।
अन्ते विष्णुपरं ब्रजेत्स तु पुनस्ततत्रैव लब्ध्वा परम्।
ज्ञानं मोक्षमनन्यभ्यममरेस्द् वांछनीय ब्रजेत्।।१०४।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये प्रावाणोत्सवकथनं नाम
एकत्रिंशोंत्तमोऽध्यायः।

FOOTNOTES

१ K, R र्निमज्जमि। २ K, R मोच। ३ L द्विजाः। ४ R नाशका। ५ U जीविन। ६ K, R, U नाशकः। ७ L इति स्तत्वा नामस्तुत्वा। Ms. L Omits sl. 15a. ८ l द्विजोत्तमा। ९ m हाज्ञापय। १० K, L, M, R, U इइदानीं। Ms. L Omits sl. 20a and 23a. ११ L नरः। After sl.29, ओं नमो जगन्नाथाय is present in U. Ms. L Omits sls. 24, 25a, 26, 28a and 30a. After sl. 30a. After sl. 25, Ms. L adds -

इति श्रीक्षेत्रमाहात्म्ये त्रिंशोऽध्याय; सूत उवाच

१२ K, R, U सत्तमम्। १३ M सरस्तुम्यं नमोऽस्त्वमतदायक, R सरस्तुम्यं नमस्त्वमेकदायक, K सरस्तुम्यं नमोत्यम्वनिदायक। sl. 34b is absent in k, r, sl. 36b is absent in K, M, R, U. १४ K, U मृत्युंजय । १५ U यम। Ms. L omits sls. 33, 34a, 35a, 36b, 37, 38a and 39. १६ M नमस्तापं क्षेत्रस्याधिपते प्रभो, R नमस्तुम्यं क्षेत्रेस्याधिपते प्रभो, U नमस्तुभ्यं पापं मे हर संहर। After sl. 40a, the following Verse is present in K, M, R, -

लिंग रूपि शिव त्वं हि पापं मे हर संहर।

१७ K, M, R,U महापत्तिविनाशिनि। १८ K, M, R, U विनाशक। १९ L ब्रतादिक। Ms. L omits sls. 40, 41, 41b and 48-49. After sl. 48, Ms. L adds -

इति श्रीक्षेत्रमाहात्म्ये एकत्रिंश अध्यायः।

२० K, M, R, U मूलक। २१ U ज्यादिक। २२ R हरे परं। २३ K, R, U ता २४ M वद्दन्मूरत्तिदेवता। Ms. L omits sl. 49-59. 49-59. २५ K, R नृपतिश्वर। २६ R नच चात्र। बलस्यार्थ। २७ U कुरङ्गाक्षि। २८ K, M, R चक्रकं, चक्रजं। Ms. L omits sls. 60-70. Ms. L omits sls. 71-81 Folio No. 126 is present after folio no. 115 in Ms. U. २६ M लक्षेद्। ३० K, R, U कुर्य्यार्यादभक्तिभाव। ३१ K, R, U वस्त्राणि। Ms. L omits sls. 82-93. ३२ K, R प्रभो। ३३ M, U सुवं। ३४ R सर्वावयकाकृमिाचरत्। ३५ R भूषयेत्तदनन्तरे। Ms. L omits sls. 94-102 ३६ U गुरवे तथा, K, R गुरुवे तथा ३७ K, R, U दद्याघ्घ्रस्वनि।

द्वात्रिंशोऽध्यायः

ब्रह्मोवाच

पौषे मासि महीनाथ अमावस्या दिने पुनः।
प्रातः कालार्चनस्यापि संगे भक्त्यांचतोऽर्चकः।।१।।
लांगलीफलखण्डेश्च चूण्णेस्तण्डुसम्भवेः।
वर्तु लानि सुरम्माणि तानि पूपानि दापयेत्।।२।।
पूजान्ते विष्णवे दद्याद्दिव्यांश्चूतांगुरानपि।
वन्दापनां प्रकुर्वीत पूर्ववद्धरणीमते।।३।।
अथ पुष्पामिषकेश्च कथयामि विधिं नृप।
प्रासाउस्येशानकोणे कण्डपं रचयेच्दुभाम्।।४।।
चतुरस्रं चतुर्क्षर वित्तानोतममण्डितम्[1]।
पताकाबलिर्मिव्यीप्तमंकुरारोपणाय वै।।५।।
एकादश्यां च शुक्लायां तृतीर्यावसानतः[2]।
आचाय्र्याः प्रथमं तत्र मण्डपे वरुणार्च्चनम् ।६।।
कृत्वा ततोऽग्निशर्मा च कुय्र्यात् संकल्पमादरात्।
आचाय्र्यवरणं कुर्याद् ब्रह्मावरणमेव च।।७।।
आचार्यस्तु करे सूत्रं धृत्वा तन्मध्यो न्यसेत्।
चतुरस्रतया कुय्र्यात्पूर्व देशिकसत्तमः।।८।।
तीय्र्यगूर्ध्वक्रमेणेव सप्त सप्त तु पातयेत्।
चतुःकोण्यानुमानेन मध्येऽपि चतुरस्रकम्।।६।।
तद्बाह्ये पृपतिश्रेष्ठ कृय्र्याद् द्वादशकोष्ठिकाः।
चतुरस्रतया तासु परिधिं रचयेत् कृता[3]।।१०।।
चतुर्दिक्ष्वष्ठकोष्ठीषु[4] शालां कुर्यर्यान्मनोरमाम्।
चतुश्चतुर्षु कोष्ठेषु चतुःकोणे परन्तप।।११।।
चतुरस्रे लिखेत् पद्मं पूर्वोक्तलक्षणान्वितम्।।१२।।
तद्बाह्ये परिधिं शुक्लां कुययादाचाय्र्यसत्तमः।
शालायां पूर्वदेशस्य पीतवर्ण्ण परिन्यसेत्।।१३।।
दक्षिणे कृष्णवर्ण्ण च पश्चिमे शुक्लकं तथा।
उत्तरे रक्तवर्ण च बह्निकोणे तथां बुधः[5]।।१४।।
चतुरस्रं परं कुय्यरर्द्रक्तवर्ण्ण मंहीपते
नैऋतस्य च कोणस्य श्यामवर्ण्णे विधीयते।।१५।।
कृष्णसरक्त्कसंयोगाध्धूमवर्ण मरुद्दिशि।

कुर्य्यादेशानकोणेऽपि शुक्लवर्ण महोदयम्।।१६।
तासु-सर्वासु कोष्ठीषु धान्येश्च परिपूरयेत्।
त्रिविधं भाजनं कुर्य्यादंकुरार्पणकर्मणि।।१७।।
पालिका घटिका तद्वद्धरावश्च त्रिधा भवेत्।
करांगुलष्ठोन्नतियुग[6] पालिका सुरदुर्लभाम्।।१८।।
अष्टांगुलप्रमाणेन कण्ठः स्याच्च तंदंध्रिक।
उन्मत्तपुष्पवद्वक्त्रं कुर्य्याद विस्तृतमादरात्।।१६।।
विंशत्यंगुलमानेन स्यादादामः परन्तप।
घटिका पंच वक्त्रास्यार्ध्वभागे घटाकृतिः।।२०।।
अधोभागे पालिकावत् क्षदशांगुलतो मुखम्।
चतुर्दिक्षु चुर्वक्त्रं चतुरं गुलमानकम्।।२१।।
विंशत्यंगुलमायामशोभिकां घटिका भवेत्।
द्वादशांमुखविस्तीर्ण्ण शशवस्य मुखं भवेत्।।२२।।
षड्गूलप्रमाणोंऽध्रिः पुण्याकारं च रूपतः।।२३।।
उन्नतिः स्यात्पालिकावत्पालिका वेष्णवी मता।
ब्राह्मीयं घटिका शेया शराबः शेच एव हि।२४।।
त्रिभाजनमिदं तावद्देवतात्रयरूपभाक्।।२५।।
चतुरस्रे च मध्येऽस्मिन् पूर्वशालापदे नृप।
दक्षिणस्यां७ न्यसेत्कोणे वह्नो वै नेऋतस्य च।
पालिकाद्वमारक्षेद् वायुकोणे[8] तदुत्तरे।।२७।।
शालायां च तथा रक्षेदीशानस्य च कोणतः।[9]
शराबं[10] परिसंख्यस्य तेषु पात्रेषु विष्टरम्।।२८।।
एकेकं परि संयोज्य करीषं वालुकां मृदम्।
क्रमेण तेषु[11] पात्रेषु पूरयेत्पूजकोत्तमः।।२६।।
पृथ्वीवीजं समुच्चार्य डुगधेर्वीजानि धोतयेत्।
श्यालिश्यामितिभिड़ी[12] च मुद्गाशिम्बास्तथा तिलाः।।३०।।
सर्षपश्च कुलथिश्च कंगुमाषास्तथैव च।
एतानि दश बीजानि वपेत्पात्रेषु भूपते।।३१।।
हरिद्रोदकमासिचय वस्त्रेराच्छदयेत्पुनः।
ततोऽग्रे[13] समिधो दिव्य यतिन्मान्गो हुनेत् क्रमात्।।३२।
सोममन्त्रेण राजेन्द्र हुनेदष्टोत्तरं बुधः।
त्रिविधानां च पात्राणां दश दिक्षु बलिं तथा[14]।।३३।।
दिक्कालेभ्यो भूतगणान् स्वपितृगणान् तथा।

नागानां च शिवं विष्णुं रजनीशं द्विजोत्तमः।।३४।।
लाजामिश्च तिलेसतद् दद्याद्दरिद्राभिंश्च संछुभिः[१५]।
अन्नं दद्यात्तदा शीध्रं भूतेभ्यो लोकपालक।।३५।।
पितृन्यो भक्तितो दद्यात्तिलांश्च तण्डुलान्यपि।
अधिसक्थु तथा लाजान् बलित्वेन प्रकल्पितान्१७।।३६।।
एतद्[१८] द्रव्येश्च पत्रैश्च[१९] नारिकेलोदकेः सम्।
क्षेत्राभ्योऽपि[२०] बलिं दद्यान्नागेभ्यः सवधुपिष्टकम्।।३७।।
पद्माक्षतानि मे दद्यात् ब्रह्मणे नृपसत्तम।
दद्याच्छिवाय सा पापमन्नं[२१] च विष्णवे ततः।।३८।।
ऐष्वान्नं परमं दद्याद् भक्तिश्रद्धासमन्वितः।
एवं बलिक्रिया कार्या गीतनृत्यदिकं निशि।।३९।।
कुय्र्यात्मंचदिनान्येवं त्रीणि वा परमादरात्[२२]।
नैत्रोत्सवे गुण्डिचायां बलबद्रस्य जन्मनि।।४०।।
अभिषेकोत्सवे राजन् देवप्रासादयोस्तथा।
प्रतिष्ठायां च तत्कुय्र्यादंकुरार्पणमुत्तमम्।।४१।।
न कुर्याच्चेदिदं कर्म सर्व तन्निष्फलं भवेत्।
न प्रसन्नो भवेद्देनं स्तेषु कर्मसु केशवः।।४२।।
चतुर्दश्यां ततो विष्णोः चतुर्थार्चावसानतः।
देवागग्रेऽपि चतुः पक्तिर्लिखेतण्डुलचुर्ण्णकेः।।४३।।
सोवर्ण्णरोप्यकान् कुम्भानधवा ताम्रसम्भवान्[२३]।
निर्मलोदकसम्पूर्णानष्टोत्तरशतांश्च तान्।।४४।।
चन्दनागरुकर्पूरैर्युतान् पंक्तिष योजयेत्।
पंचत्रिंशतिसंख्यातान् त्रिषु पंक्तिषु योजयेत्।।४५।।
सुदर्शनस्य पंक्त्या च द्वादश प्रमितान्न्यसेत्।
पंक्त्या पंक्त्या[२४] वै धृतैः पूर्ण्णान् ऋतुसंख्यान्न्यसेत्तथ[२५]।।४६।।
सुदर्शनस्य पंक्त्या वै धृतं पूर्ण्ण पटत्रयम्।
कृत्वा चेण्धिं घटनां वा अष्टोत्तरशतं न्येसत्[२६]।।४७।।
द्वितानस्त्वेति मन्त्रेण वाससा सादयेत्पुनः[२७]।।
गन्धद्वारेति मनुना गन्धं क्षिप्त्वा ततः परम्।।४८।।
श्रीश्चत इति पुष्पाणि क्षिपेदन्तः परन्तप।
कुम्भाधिवासनं कुय्र्याद्दिवं देवाग्रतः पुनः।।४९।।
सर्वतो सर्वतो भद्रनामानं मण्डलं विलिखेत् सुधीः।
तत्र भद्रासेन रक्षेन्कुरं चारु निर्मलं।।५०।।

गन्धपुष्पेर्भूषयित्वा वाससा सादयसेत्पुनः।
रात्रौ जागरणं कुर्याद् गीतनृत्यादिभि परैः।।५१।।
वीणामृदंगपटहैर्महोत्सवतया नृप।
दण्ड त्रया विशिष्टयां[29] रजन्यां पूजकोत्तमेः।।५२।।
नित्य सननं तदा कार्य हरेस्तस्य परांत्मनः।
प्रातः पूजाद्वयं काय्र्यमेकदंव नृपेश्वर।।५३।।
अरुणोदये चाग्निकाय्र्य कुर्यात्तां विधिना द्विजः।
आचाय्र्यः प्रथमं कुर्याद् वरुणस्यार्चनं मुदा।।५४।।
अग्निशर्मामेवासौ संकल्पयेत् तत्तवतः।
आचायर्यो विधिवत् कुर्यात् स्वस्तिवाचनकं पुनः।।५५।।
आचार्यर्यवरणं चैव ब्रह्मावरणमेच च।
अग्निशर्मा तथा कुर्यादाचाय्र्यस्त्वग्निपूजनम्।।५६।।
पंचोपचारविधिना कृत्वा होममथा चरेत्।
प्रथमं संहुनेद् भेप चाघारस्य वचतुष्टयम्।।५७।।
पण्याहवाचनं कृत्वा भूरादिकनबाहुतिम्।
कुर्याद्धोमं मीपाल भूरादिकनबाहुतिम्।।५८।।
ब्रह्मविष्णुमहेशानां स्वस्वमन्त्रैश्च वेदिकेः।
अष्टोत्तरशतं तावज्जुहुयाच्च पृथक् पृथक्।।५९।।
तदन्ते मन्त्रराजेन त्रिशतं जुहुयाद् द्विजः।
ततः पूर्ण्णहुतिं कुर्याद् ब्राह्मणश्च विसर्जनम्।।६०।।
अग्नेर्विजंसर्जनं कृतवा दद्यादाचार्यदक्षिणाम्।
स्वर्णेनेकेन राजेन्द्र भक्त्या परमया तदा।।६१।।
तदर्द्धेन ततो दद्यादी[30] ब्राह्मणे दक्षिणां पराम्।
सहस्रभोजनान्येव द्विजेभ्यो वितरेन्मुदा।।६२।।
परिधानोत्तरीयेऽथ दद्यात्तस्मे मुरारये।
ततः काहालचछत्रोद्यदण्ठाद्युत्सवसंयुतः[31]।।६३।।
कलशांस्तान् हरेरग्रे आनीय पंक्तितो नयसत्।
ततोऽर्चकः सुरेशं त षण्मूर्त्या चेकमूर्तिकम्।।६४।।
भावयित्वा नृपश्रेष्ठ तदग्रे कमलां न्यसेत्।
गन्धादिना येजत्तावत् श्रीतलद्रवयतो हरिम्।।६५।।
ताम्बूलं[32] मन्त्रराजेन संस्कुर्यात् प्रार्थयेत्ततः।
जगन्नाथ नमस्तेऽस्तु नमस्ते रावणान्तक।।६६।।
नानावतारलीलाभूनीलिशेलपते प्रभो।

दिव्येऽस्मिन् प्रतिबिम्बे त्वां तत्कुम्पजलतोऽधुना।।६७।।
सनापयामि सुराधीश अपराधं क्षमस्व मे।
इत्युक्त्वा तज्जलेर्देवं पुरुषसूक्तेन सेचयेत्।।६८।।
श्रीसूक्तेन महीनाथ पवमानीति सूक्तः।
देवी सूक्तेन च पुनः स्नापयेतं शनैः शनैः ।।६९।।
गायत्रीं च सहस्राक्षं पठन्नाचार्य्यसत्तमः।
धृतेन स्नापयेद्धीरो मन्दं मन्दं मुदान्वितः[33]।।७०
सोवर्ण्णराजतं वापि ताम्रसम्बन्धि वा पनुः।
सहस्र रन्ध्रसंयुक्तं पलेर्द्धादशमिः कृतम[34]।।७१।।
धृत्वा तद्भाजनं ब्रह्मा प्रतिबिम्बोपरि स्वयम्।
सुवासितजलैः स्तात्त[35] तस्नापयेत् भक्तिभावतः।।७२।।
तत स्तत्प्रोच्छनं कृत्वा देवांगश्च ततो नृप।
वस्त्रमाल्याहदकं तावद्बहिष्कुर्यात् शनैः शनैः।।७३।।
सर्वागलेपनं कृत्वा ततो नव्याम्बरार्पणम्।
अलंकारेश्च माल्येश्च भूषयेद् भक्तवत्सलः।।७४।।
काहालचछत्रघण्टादि स्फुरदग्रतया शनैः।
आनयेच्चारु नैवेद्यं पाकशालान्तराद् बहु।।७५।।
पंचपक्तितया रक्षेत् देवाग्रे तन्महीपते।
अग्निशर्मा चन्दनं च पीतवस्त्रद्वयं तथा।। ७६।।
दाम दामनकं दिव्यं देवदेवाय दापयेत्।
श्वेतच्छत्रं च संस्कृत्य समर्पयति सादरम्।।७७।।
कुर्यान्मध्याह्नपूजां[36] स आचार्य्यः पूर्ववद् बलिम्।
दत्वा बाह्यार्चको ब्रह्मा अग्निशर्मा च ते नराः।।७८।।
वन्दापयेयुः क्रमतो भक्तिभावसमन्विताः।
इन्द्रद्युम्न महाराज त्वं तदा जगदीश्वरम्।।७९।।
पुष्पांजलिं समर्प्याथ चामरैर्व्यंजनैस्तथा[37]।।
संबीज्य दण्डवत् कुर्य्याः प्रथमं[38] च हरेः पुरः।।८०।।
एवं च परया भक्त्या तोषयेत् परमेश्वरम्।
अभिषेकोत्सवं ये वे पश्यन्ति मुवि मानवाः।।८१।।
सर्वपापविनिर्मुक्ता भुक्त्वा शर्माखिलं परम्।
सर्वान् कामन् परं लब्ध्वा विष्णुलोकं ब्रजनित ते।।८२।।

ऋषयु ऊचुः।

इन्द्रद्युम्नेन महता पृष्टेन विधिना मुने।

कथितं यत्पुगं[३९] विष्णो दीपदानादि तत् श्रुतम्।।८३।।
अभिषेकोत्सवश्चायं श्रुतः सूतमुखात्तव।
मकरं भास्करे प्राप्ते को विधिः स्याज्जगत्पतेः।।८४।।
कथयस्व मने तावत्सर्वज्ञो हि भवान् यतः।।८५।।

सूत उवाच

घन्याः पुण्यार्जनपे सक्ताः सत्कथारवणावृताः।
ब्रह्मणा भाणितं[४०] यत्तु कथयिष्यामि वो द्विजाः।।८६।।
ये मावनाः कृष्णकथातिसक्ता–
स्तच्चित्रलीलाश्रवणादृताये।
तत्पूजने दत्तहृदश्च विप्रा–
स्तेषां न जानाति यमस्तु वार्ताम्।।८७।।
इति[४१] श्रीसूतसंहितायां नीलाद्रिमहोदये द्वात्रिंशतमोऽध्यायः।।

FOOTNOTES

१ M.R.U मण्डितं। २ P तृतीया गा। ३ U कृति। ४ M नाशका। ५ U चतुर्दल्वष्ट। ६ M, R च कप्रूरं। ७ M कलांगुष्ठोनतयुतया, K, R, U कलांगुष्ठोन्नति युता। ८ K दक्षिणायां। ९ K तथोत्तरे। Ms. K reads sl. 27a as -

पटयंश्च पंचमिन्र्यस्येत् कोणे वृन्दो च नैऋते।

१० K वामो चेशानयकोणके, sl. 28a is absent in K.। ११ K शरावंद्वयसंन्यस्य, U शरावं परिसंन्यस्य। १२ P तेषु पात्रेण। १३ U शालि। १४ K, M, R तदग्रे, U तदग्रे समिधो। १५ K, R तदा। १६ R सक्तुभि; U संकुमिः। १७ M, U दधिसक्थु। १८ R पकल्पन्। १९ M, U एतद्रव्येश्च, K एतद् द्रव्येश्च। २० K नृपते, U पेत्रेश्च। २१ M. U यज्ञे, R पक्षे। २१ K. R, U पूपमन्नं। २२ M परमादरेत्। २३ M सम्भवा। २४ M पंक्त्या। २५ K, M, R. U ततः। २६ M न्यतेतं। २७ K. M, R, U सादयेत् द्विजः। २८ U वशिष्टायां। २९ U निशायां। sl. 58b is absent in K, M, R, U. ३० M दद्या ब्राह्मणे, R दद्याद् ब्रह्मणे, U दद्याद् ब्रह्माणो। ३१ K, M, R, U संयुतं। ३२ K. R. U तज्जलं। ३३ K. R. U प्रणमं। ३४ R कृतः। ३५ U स्तावत्। ३६ U कुर्यान्मध्याह्न। ३७ U जनेस्तथा। ३८ K, R प्रणामं। ३९ K, R, M, U यत् पुरा। ४० K, R कथि। ४१ R इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमात्म्ये पुष्पभिषेकाविधिकथनं द्वात्रिंशत्तमोध्यायः।

त्रयत्रिंशोऽध्यायः।

इन्द्रद्युम्न उवाच

उत्तरायणे च तद्विष्णोः कीदृशं पूजनं भवेत्।
यात्रा वा कीदृशी ब्रह्मन् तत्सर्व वक्तुमर्हसि।।१।।

ब्रह्मोवाच

नीलाचलपतेर्विष्णो नानलीलायस्य[1] च।
सम्यक्[2] वक्तुं च कः शक्तस्तलीलाकोतुकं नृप।।२।।
तस्मातसमासतो वच्मि सावधानतया श्रृणु।
नारायणप्रीतिकरे सम्प्राप्ते चौत्तरायणे।।३।।
मकरस्य च संक्रान्तयाः पूर्वेद्युः केशवस्य च।
सायं पूजावसानेऽथ नानापूण्येर्मनोरेः।।४।।
भूषयेत्परमेशं तं प्रत्यर्चा तत्समापकम्[3]।
नीत्वा चतुर्थयजनं कृतवा सम्प्रार्थयेद्धिरिम्।।५।।
देवे देवे जगन्नाथ प्रसीद परमेश्वर।
प्रासादभ्रमणार्थ वै भ्रमणाय तव प्रभो।।६।।
आज्ञापय महाबाहो प्रत्यर्चा चारुशोभनाम्।
इत्युक्तपंगाद्धरेर्माल्यं प्रत्यर्चाय समर्पयेत्।।७।।
प्रत्यर्चा भ्रामयेद् तावत् विष्णुमव्यरुपिणम्।
वारत्रयं ततो दिव्यं विमाने चारुमण्डले।।८।।
वासयित्वा मनोरम्यां प्रत्यर्चा परिभूषिताम्।
छत्रचामरधण्टादकिाहलामर्दलादिभिः।।६।।
वाद्येर्नानाविधेः शंत्रेः महोत्सवतया नृप।
गीतनृत्यादिभित्तावच्चतुर्वारं शनैः शनैः।।१०।।
प्रासादं भ्रामयेद् भूयः सर्वोपद्रवशान्तये।
एतन्नवांकभ्रमणं प्रथम भ्रमण च यः।।११।।
पश्येत्पंच महापापात् प्रमुक्तः स्यान्न संशयः।
तथोपपातकेर्मुक्तो द्वितीयभ्रमणे क्षणात्।।१२।।
तृतीये सर्वयज्ञानां फलं प्राप्नोति मानवः।
विष्णुप्रीततरश्च[4] स्याच्चतुर्थ भ्रमणेक्षणात्।।१३।।
कुर्वतां भ्रमणे विष्णोर्मुक्त्त स्यात् शाश्वती शुभा।
तत्प्रदक्षिणप्रत्यार्हः[5] प्रत्याचर्चसंगतो नृप।।१४।।
कुर्वन्ति भक्तया ये मर्त्याः पश्यन्ति च मुहुर्मदा[6]।
ते सर्वे सुखमेश्वयं मुक्त्या भूमितलेऽखिलम्[7]।।१५।।

पितृध्युत्य नकरता् प्रापयन्ति हरेः पदम्।
गच्छन्ति पुनरावृत्तिरहितं सुरदुर्लभम्।।१६।।
सत्पुत्रकोऽपि वंशे स्यात् क्षेत्रे श्रीपुरुषोत्तमे।
एतत् प्रदक्षिणं कुर्यात् पश्येदा सुसमातिः।।१७।।
तत् प्रसादादग्गमिष्यमो विष्णोस्तत्पदमव्ययम्।
वांछन्ति पितरो नूनीत्येवं ते परस्परम्।।१८।।
एतद् भ्रमणमानन्दान्नो पश्यनित जनाश्च ये।
क्षेत्रे स्थित्वापि तेषां वै सुखलेशो न विद्यते।।१९।।
सन्ततिश्च क्षयं याति पश्यन्ति पितरश्च तान्।
पश्यतां भ्रमणं वापि शरीरेषु हरेर्यतः।।२०।।
अष्टादशनि चिह्नानि विनसन्ति नवं नवम्।
तस्मान्नंकनाम्नीयं यात्रा तद्गदिता नृप।।२१।।
एतद्भ्रमणकाले तु कल्पदुमवरान्नरः।
पत्रमनीय वध्नीयात्करे भक्त्या समन्वितः।।२२।।
सर्वान् कामानवाप्नोति पुत्रपोत्रेश्च मोदते।
एतत् सप्त भ्रमान्ते तां प्रत्यर्चा स्वपदे न्यसेत्।।२३।।
देवता पूर्वदिग्भागे चतुदद्वारं मनोहरम्[८]।
नानावितानशोभाढ्यं चारुचामरयंयुत्[९]।।२४।।
तादृशं मण्डपं कुर्यात्तत्र चाष्टदलाम्बुजम्।
विलिखेत् स्वर्णरोप्यादिनिर्मितं भाजनं न्यसेत्।।२५।।
तादृशेषु च पात्रेषु दिव्यतण्डुलका न्यसेत्।
नवीनवासमाच्छाद्य गन्धपुष्पाणि पातयेत्।।२६।।
एवं कुर्यात्तण्डुलानामधिवासं परंतप।
संक्रान्तिदिनतः प्रातः पूजाननतरतो नृप।।२७।।
महास्नानं हरेः काय्र्य लेपयेच्चन्दनादिना।
नवांशकेरलंकारे भूषयेत् परमेश्वरम्।।२८।।
मध्यसह्नकालयजनं कुर्यात् कार्यकलापवित्।
मुखनीराजनं तद्वै ततः स चरुचापकः।।२९।।
किंचिन्नैवेद्यमाहृयं जगन्नाथस्य पंक्तितः।
पात्रहोता समं मन्त्रयं ब्रह्मणा संहितस्तदा।।३०।।
पूर्ववद् वाह्यकमलं[10] दद्याद् भक्त्या यथाविधि।
बलिं दत्त्वाऽर्चकः श्रीमान् ततश्च परमेश्वरम।।३१।।
गण्डूशान जगदारांश्च ताम्बूलं च समर्पयेत्।।
नीराजनं ततः कुर्यात्पश्यतां सुखवर्द्धनम्।।३२।।
मध्याहन्पूजा कर्मान्ते तण्डुलानधिवासितान्।

सम्यग् धौत्वा ततस्तत्र दुग्धं च शर्करा पराम्।।३३।।
नारिकेलस्य शकलानार्द्रकान् क्षुद्रकान् बहून्।
घृतं च दुग्धसारं च दिव्यामुतसंशकम्।।३४।।
बहुरम्भाफलं तत्र कर्पूरक्षादसंचयान्।
पातयित्वा तण्डुलांस्तानालोड्य च पुनः पुनः।।३५।।
सोवर्णेषु च पात्रेषु स्थापेयत्तत् प्रयत्नतः।
सूक्ष्मांशुकेस्तदाच्दाद्य चरुहोतार एव ते।।३६।।
आच्छांद्य[11] वासनावस्त्रं धृतवा पात्राणि तानि च।
प्रासादं भ्रामयेयुश्च वारत्रयमन्दिरम्।।३७।।
दत्रचामरघण्टादिकाहालादिध्वनो सति।
महोत्सवे जायमाने भ्रामयेत्त् शनैः शनैः।।३८।।
ततोदधि भ्रामयेयुः शर्करां तदननतरम्।
ताम्बूलं भामयेदेकवारं[12] परमभक्तितः।।३९।।
ताम्बूलव्यातिरेकेण तत्सर्व द्रव्यमुत्तमम्।
व्यंजनान्यानि द्रव्याणि नानापूपानि यत्नतः।।४०।।
चतुः संख्याधिक श्रुति प्राकारं विविधं बहुम्।
तादृङ् नैवेदयसंधातं पंक्त्या पड्कत्या नियोजयेत्।।४१।।
अग्निशर्मा तः पीतवस्त्रयुग्मं मनोरमम्।
दाम दामनकं कान्तं चन्दनं च समर्पयेत्।।४२।।
यजेयुस्तेऽर्चकास्तावद् विधिना चन्दनादिना।
तदन्ते विधिना[13] दद्यात्ताम्बूलं सुखवर्द्धनम्।।४३।।
आचाय्र्यश्चाग्निशर्मा च ब्रह्मा वन्दापनां चरेत्।
कुशलोबलोभद्रासीन[14] सर्वलोकमहेश्वरान्।।४४।।
एतदुत्सवमाननदं ये पश्यन्ति जगत्पतेः।
सर्वयज्ञफलं लब्ध्वां विष्णुलोकं ब्रजन्ति ते।।४५।।
माघमास्य शुक्लायां पंचम्यां नृपसत्तम[15]।
मध्याह्नपूजनस्यान्ते कौसुम्भेरब्रोत्तमेः।।४६।।
सर्वागे मण्डयेद् विष्णोः भक्तिभावसमन्वितः।
नानालंकारनिकरेः मलाकेलिलालसः[16]।।४७।।
भूषयेतं विशां नाथ चतुवर्गफलाप्तये।
चतुर्विधानि दिव्यानि बहुन्यन्यानि भक्तितः।।४८।।
नानापूपसमेतानि व्यंजनानि नृपोत्तम।
नैवेद्यानि च संस्थाप्य यजेद् गन्धादिना द्विजः।।४९।।
पूजान्ते सोऽर्चकः श्रीमान् अग्निशर्मा ततः परम्।

ब्रह्मा च ते श्वेतवर्ण पीतरक्तं मनोरमम्।।५०।।
फुल्लपुंजं[१७] च संस्कृत्य बलदेवादिदेवताः।
आपादशीर्ण्णपर्यन्तं पातयेयुश्च सयंताः।।५१।
वन्दापनां प्रकृय्यासुः क्रमादानन्दमानसाः।
त्वमेव नृपशार्दूलं देवानां पुरतः स्थितंः।।५२।।
फाल्गुतत्रिविधं[१८] द्रव्यं[१९] कर्पूरेण सुवासितम्।
पातयेः परया भक्तयाः चतुवर्गफलाप्तये।।५३।।
जगन्नाथं सुराधीशमाचार्यः प्रार्थयेत्ततः।
आज्ञापय महाबाहो लीलारसलसोन्मनाः।।५४।।
नारायणप्रतिकृतिं जगदाह्लादकारिणम्।
इति सम्प्राथ्र्य चानीय तदाज्ञामाल्यमादरात्।।५५।।
प्रत्यच्चार्य ददो सार्द्ध धराभ्यां[२०] तदार्चकः।
प्रतिमास्तारथारेजे देवयाने सुशोभने।।५६।।
वासयित्वा नयेद्यज्ञवेद्यान्तिकमरिन्दम।
तत्र गन्थादिना भक्त्या यजेद् वन्दापयेत्ततः।।५७।।
आनीय प्रतिमास्तस्मात्सपदे विनिवेशयेत्।
ये पश्यन्ति नरा भक्त्या ह्येतदुत्सवमुत्तमम्।।५८।।
तेषां च दुष्कृतं नश्येत्सर्वाम् कामान् भजन्ति ते।
वसन्तगुण्डिचेत्येव[२१] पश्यन् जन्म च यो बसेत्।।५९।।
घोषयात्राफलं सोऽपि प्राप्नुयान्नात्र संशयः।
नीलशेलपते विष्णोस्तावदंगावृतिर्भवेत्।।६०।।
यावद् वसन्तसंज्ञा स्यादत्पचंमी न च तत्परम्।
आदोलोत्सवमेतस्य विष्णोरव्यक्तरुपिणः।।६१।।
पृष्ठभागाकृतिं[२२] कुय्र्यादवनीशस जनोत्तम्।
एकादशीदिने प्रातः पूजाननतरतो हरेः।।६२।।
महास्नानविधिः कायृर्यो चतुः सम विलेपनम्।
नवीनवस्त्रमाल्यादि भूषणेस्तें विभूषयेत्।।६३।।
ततो मध्याह्नयजनं विधेयं विधिनार्चकेः।
वन्दापयेत्तदन्ते च गरुएध्वजमादरात्।।६४।।
एतस्मिन् समये भूप ये पश्यन्ति जनार्दनम्।
सर्वपापविनिर्मुक्ताः सुखसोभाग्यभोगिनः।।६५।।
न तेषां च पुनर्जनम मुक्तिस्तेषां न दुर्लभा।।६६।।

ब्रह्मोवाच

इदानीं फाल्गुने मासि यो विधिः स्यान्नृपोत्तम।

तं वदामि समासेन समाकर्णय सादरम्।।६७।।
दण्डद्वयावशिष्टायां क्षपायां रक्षणेस्तदा।
निद्राभंगो हरेः कायर्य प्रार्थयेज्जगदीश्वरम्।।६८।।
आज्ञापय रमकान्त नमस्ते भक्तवत्सल।
त्रैलोक्यलोकसुखद प्रत्यर्च्चा भ्रमणाय वे।।६६।।
इतज्ज्ञप्य ततो मालां प्रत्यर्चाये ददौ मुदा।
छत्रचामरघण्टादि स्फुरदग्रतया नृप।।७०।।
प्रत्यर्चा तां विमानस्थां मार्कण्डेयानितकं नयेत्।
स्नापयित्वा तु तत्रैव पूजयेच्चन्दनादिना।।७१।।
वन्दापयेत्तथा धीमान् भक्तिभावं वहन् हृदि।
एवंविधं प्रकृर्वीत सप्तवासरतो नृप।।७२।।
अथवा पंचदिवसं त्रिदिनं वा महोत्सवम्।।७३।।

सूत उवाच

वसन्तभ्रमणस्यास्य चतुर्मुखमुखादगतम्।
विधिंश्रृत्वा महानाथो विनन्द्य च मुहुर्महुः।।७४।।
क्षीरार्णवस्योत्तरतीरदेशे मले च कल्पदुमपादपस्य।
व्यक्तस्य विष्णोः परमात्मनश्च चकार राजा स च सर्वलीलाः[२३]।।७५।।
इति श्रीसूतसंहितायाम् नीलादि महोदये त्रयस्त्रिंशोत्तमोऽध्यायः।

FOOTNOTES

१ K, R र्नानालीलायतस्य। २ K, U संम्यग्। ३ U तत्समीपकं। ४ R प्रीतिकरेश्चा। ५ K, ट प्रदक्षिणानिह प्रत्यचा, U प्रदक्षिणानित्व प्रत्यार्च्चा। ६ K, R मुहुर्मुहुः। ७ M अखिले। ८ M तत्र। ६ K, M, R, U मनोरमं। १० M, R शोभितं। ११ K, R कुय्र्यात् कर्म। १२ K पूर्ववद् द्वाक बलिं, R पूर्ववद् ब्राह्य बलिं। १३ M. R, U आच्दाद्य। १४ K, R, U चक्रमोदकवारं। १५ K, R तृशं। १६ K, R विष्णवे। १७ K, R, U क्रमतो। १८ M नृपसत्तमा। १६ U लानसं। २० K, U फलगुपुंजं। २१ M फलगुतं। २२ K, R दिव्यं। After sl. 54, the following Verse is present in K, M, R, U

वसनतोत्समाकर्तु जगतः सुखवर्द्धनम्।

२३ K, U श्रीध राम्यां । २४ M, R गुण्डिचायं च नत्यं यन्मानसे वसेत्, K, U गुण्डिचा चेयं नित्यं यनमानसे वसेत्। २५ K अष्ठभागाकृतिं, U पृष्ठभागाकृतिं। २६ K, M, R सर्वलीला।

चतुस्त्रिंशोऽध्यायः

इन्द्रद्युम्न उवाच

दोलाकेलिविधिं ब्रह्मन् क़थयस्व यथा भवेत्।
यद् विष्णोः प्रीतिदं[१] गात्रं गोविनदस्य परात्मनः।।१।।
यत्र श्री भगवान् देवो दोलायिततरः स्वयम्।
पश्यतां सर्वलोकानां चतुवर्गफलप्रदः।।२।।

ब्रह्मोवाच

साधु पृष्ट। महाभाग[२] गोपनयीतररं तु यत्।
गोविन्दप्रीतिजनक चतुर्वर्गप्रदायकम्।।३।।
तच्छोतुं भवतिश्चं साभिलाषि यतः परम्।
तस्माद् भूपतिशार्दूल धन्योऽसि त्वं महामते।।४।।
फाल्गुनस्य च मासस्य शुक्लपो शुभोदये।
फल्गुत्सवं प्रकृर्वीत पंच वा त्रिदिनानि वा।।५।।
तिथो दशम्यो राजेन्द्र नीलाचलपतेः प्रभोः।
मध्याह्नपूजनान्तेऽपि भगवनं जनार्दनम्।।६।।
कोसुम्भवस्त्रालंकारेर्भूशयेत्परमेश्वरम्।
गोविन्दनाम पर्त्यर्चा जगदीशान्तिकं न्यसेत्।७।।
संन्यस्य त्वथ देवांश्च नानामागेर्मनोहरेः।
पंचोपचारविधिना पूजयेद्देशिकोत्तमः।।८।।
पूजानन्तरतो राजन्नथ नैवेद्यमन्दिरम्।
क्षालयित्वा यथा न्यायं भूयो देवांश्च भूपते।।९।।
कर्पूरक्षोदसंयुक्तेश्चन्दनीयेश्च[३] फल्गुभिः।
रंजयेयुः क्रमणेव श्रद्धाभक्तिसमन्विताः।।१०।।
अग्निशर्मा बलं तावद् ब्रह्मा भद्रां शुभद्रदाम्।
पूजकोऽपि जगन्नाथं चक्रं च माधवं तथा।।११।।
प्रत्यर्चा कमलादेवी विश्वधात्रीमतः परम्।
अथ त्वं नृपशार्दूल सिंहासनतले स्थितः।।१२।।
श्वेतं रक्तं तथा पीतं फल्गुचन्दनिर्मितम्।
शिरसः पादपर्य्यन्तं प्रक्षिपेद्देवसत्तमान्।।१३।।
त्वदभावेऽप्यग्निशर्मा तस्याभावेऽर्चकः क्षिपेत्।
फल्गुदानावसानेऽथा माल्यं मदामनकं शुभम्।।१४।।
अग्निशर्मा च राजेन्द्र दद्यान्मुषलपाणये।
पीतवस्त्रद्वशं तावत् फल्गुपुष्पं जनार्दने।।१५।।

समर्प्याथ तथा भद्रां दद्याच्चन्दनपिण्डकम्।
कर्पूरवर्तिभिस्तावद्दूर्वाक्षतचयेः पुनः ।।१६।।
तथैव सप्तवर्त्या च पिष्टकावर्तिभिर्नृप।
अग्निशर्मा जगन्नाथं बलभद्रं च पूजकः।।१७।।
ब्रह्मा भद्रप्रदां भद्रां भक्त्या वन्दापयेत् क्रमात्।
ततोऽग्निशर्मा माल्यादीन् समुचार्व्य प्रयत्नतः।।१८।।
ददयातुभ्यं च ताल सर्व संप्राप्य हृष्ठमानसः।
कृतकृत्यो भवेद्भूयो भवान् वे भूपसत्तम।।१९।।
आज्ञापय जगन्नाथ प्रत्यर्चा चरमां धराम्।
बहिः फल्गुत्सवार्थ च क्रीड़ालालसमानसाः[४]।।२०।।
इति सम्प्रार्थ्य देवेशं पजकः शुद्धमानसः।
दक्षिणांगाद्धरेर्मालयमुत्सार्यधरणीपतेः।।२१।।
प्रत्यर्चोपरि तद् दत्वा वामांकाच्च पुनः प्रभोः।
माल्यमानीय बेशेन श्रीधराम्यां समर्पयेत्।।२२।।
अतस्ताः प्रमिमा दिव्याः रत्नसिंहासनात्पुनः।
द्वारपालपुरोदेशे स्थापयत्विा तु फल्गुभिः।
त्रिविधं रंचयित्वाशु ततो वन्दापनां चरेत्।
दन्ति दन्त समुदभूते नानारत्नापशोभिते।।२४।।
छत्रचामरघण्टादि स्फुरदग्रतलेऽमले।
तादृशे देवयाने च स्थापयित्वा च ताः शुभाः।।२५।।
लोकेश्वराख्य शम्भोश्च तथा यमेश्वरस्य च।
नीलकण्ठेश्वरस्यापि मार्कण्डेयेश्वरस्य वै।।२६।।
कलालमोचनस्यापि प्रत्यर्चाश्च पृथक् पृथक्।
विमानस्था नृपश्रेष्ठ प्रासादं भ्रामयेत् सकृत्।।२७।।
शनैः शनैः नयेद्दिव्येर्विमानेः कृतमण्डनेः।
महोत्सवतया राजन् मरीचान्तिकमुत्तमम्।।२८।।
नयेत्ततश्च ताः सर्वाः प्रतिमाः शुभदर्शनाः।
चंचत्[५] फल्गुणुलिभिर्मिथः क्षेपोत्सवे परम्।।२९।।
समानीय निजस्थाने स्थपयेत् प्रतिमाश्च ताः।
एवंविवं प्रकुर्वीत दशमीदिनतो नृप।।३०।।
त्रयोदशीदिनमभिस्फुरदत्सवयोगतः।
चतुर्दशीतिथौ भूप पूर्ववनमाधवार्चनम्।।३१।।
समाप्य जगदीशस्य फल्गुदानादि कर्म तत्।
पूर्ववन्नृपते भक्त्यो चरेत् पूजकसत्तमः।।३२।।

प्रासदभ्रमणं कृत्वा दोलामण्डपूर्वतः।
नीत्वा वह्न्युत्सवं कृत्वा विघ्ननाशनेतबे।।३३।।

इन्द्रद्युम्न उवाच

कीदृशो भक्तिा ब्रह्मन्. बह्न्युत्सवविधिर्हरेः।
विघ्ननाशार्थमत्यनत कथयाम्बुजसम्भव।।३४।।
दोलार्चामण्डपं[६] कीदृक् कायर्य वा सुरसत्तम।
एतद् विवरणं बूहि मां च शुश्रुषुमादरात्।।३५।।

ब्रह्मोवाच

श्रृणु भूप समासेन बह्न्युत्सवविधिं हरेः[७]।
दोलामण्डपनिर्माणं तथैव च यथाविधि।।३६।।
दोलामण्डपपूर्व हि सामान्यगृहनिर्मितम्।
कृत्वा द्वारद्वयं तत्र पूर्वपश्चिमदेशतः।।३७।।
तद्गुहाम्यनतरे बह्नेर्दाहकं मेषपुंगवम्।
बध्वा तत्पश्चिमद्वारि स्थाण्डिलं वालुकामयम[८]।।३८।।
चतुरस्रं हस्तमात्रं वेदांगुलसमुच्छ्रितम्।
प्राङ्.मुखोदढ्.मुखो वोऽपि शुचिर्भूत्वा समाहितः।३६।।
विधाय पूजकः कुम्भे वरुणार्चनमुत्तमम्।
ततोऽग्निशर्मा संकल्पं कृत्वोऽचार्यवृतिं तथा।
ब्रावरणमाकुर्यर्यातपुण्याहवाचनं ततः।
आचायृर्यः स्तण्डिले राजन् कुशत्रयमनिनिदतम्।।४०।।
गोमयं स्थापयित्वा तु जलपात्रं तथैव चौ
पुनः कुशखयं चैव न्यसेत्कर्मकलापक्ति्।।४१।।
पुरा कुशत्रयेणेव परिमार्जनमाचरेत्
गनधोदकेर्विविप्याशु व्रजेणोल्लेखनं चरेत्।।४२।।
वारिणाम्युक्षणं कुय्र्याच्त्रिवारं पूजकोत्तमः।
मृतिकोद्धरणं कुय्र्यानमध्यमांगुष्ठयोगतः।।४३।।
पंचैव संस्कृतिं भूमेः कृत्वास्मिन् स्थण्डिले क्रमात्।
मध्ये त्रिकोणं संलिख्य षट्कोणं तद्बहिर्लिखेत्।।४४।।
ततो हृदादिमन्त्रेण[८] बीक्षणादिकमाचरेत्।
यद् यथास्यान्नृपतेद्य[९] गदतो मे निशामय।।४५।।
ओमा चक्राय स्वाहेति हृदयाय नामे वदेत्।
वीक्षणं च चरेन्मन्त्री सर्वमन्त्रविदो नरः[१०]।।४६।।
अतः परं विचक्राय स्वाहास्तं शिरस[११] इति।
भक्त्या प्रोक्षणमाकुय्र्यात्ततो दर्भसतुद्य[१२] ताडनम्।।४७।।

ओं सुचक्राय स्वाहेति शिखये वषडित्यापि[१३]।।४८।।
त्रैलोक्यरक्षणपदं पुरतश्च कृत्वा चक्राययेतति नृपतिः शिखिनः प्रियानतम्।
चक्राय[१४] हुमिति निगद्य तदैव मन्त्रं ह्यभ्युक्षणं रचयतु स्फुटमत्र भूयः।।४६।।
असुरान्तकचक्राय स्वहेत्यास्त्राय फट् पुनः।
इत्युक्त्वा तत्र कोणे वे मध्ये विष्टरमान्यसेत्।।५०।।
कुशमूले ऋतुमतीं लक्ष्मीं च मनुना तुराम्[१५]।
विष्णुं च ग्रामयधर्मेण चिन्तयित्वा प्रपूजयेत्।।५१।।
ततोऽग्निपूजनं ध्यात्वा बह्निं तर्दबीजरुपकम्।
विचिन्त्य देवाय तदा देव्ये चाचामीयकम्।।५२।।
दत्वा यज्ञेन्घनैस्तावद् वहिन् प्रक्षालयेत्ततः।
आसनादीध्र्यसंस्कारपय्र्यनतं कर्म संचरेत्।।५३।।
पद्ममुद्रां प्रदश्यार्थ नक्शक्तिं प्रपूजयेत्।
श्वेतापीतारुणाकृष्ण धू म्रातीव्रस्फुलिंगिनी।।५४।।
रुचिरा ज्वालिनी चेति नवशक्तिदारुह्ता।
गन्धादिभिः समर्म्यर्च्चे ताश्च भूपतिसत्तम्।।५५।।
चतुर्थर्यन्तं नमस्कुय्र्याद्दिवतानां च नाम धृक्।
ततो बह्निस्वरूपं हि घ्यायेदाचाय्र्यसत्तमः।।५६।।
राजद्दिव्यास्य युग्मं ऋजुनयनधरं[१७] पिंगलसपतहस्तं
चंचत्पादत्रयाढ्यं त्रिगुणकृतिमहामेखलं सपतजिह्वम्। (५७)
वालादित्यप्रकल्पं रुचिरतरचतुःश्रृंगमत्युग्रमेषा –
रूढं यज्ञोपवीतस्फुरितनिअतनुं सज्ज्टाजूटजुष्टम्।।५८।।
अक्षमालां च शक्तिं च्रसुक् सुवो दक्षबाहुषु।
तोमरं व्यजनें चैव घृतपात्रं महोयम्[१८]।।५६।।
वामबाहुषुदक्षेषु दधानं मुकुटीज्जवलम्।
पावकं तादृशं श्रीमान् चिन्तयेद्देशिकोत्तमः।।६०।।
वामभागे स्वधा तस्य स्वाहादेवी च दक्षिणे।
सर्वकर्मसु तं बर्ह[१९] तादृशं चिन्तसेननरः।।६१।।
दक्षिणे ब्रह्मणः स्थानं प्रणीतामुत्तरे तंथा।
उत्तराग्रं ततः पूर्व पूर्वाग दक्षिणे तथा।।६२।।
पश्चिमे चोत्तराग्रं च पूर्वाग्रमुत्तरे पुनः।
इथिं वह्नेः प्रकुर्वीत परिसतरणकर्म तत्।।६३।।
कुशेरशेषफलदेः पात्रासादनमेव च।
कुय्र्यादुत्तरसंस्थं तत्पवित्रच्देदनं ततः।।६४।।
कुशखयेण नृपतेर्द्रह्मग्रन्थिं समाचरेत्।

कुशस्य द्विदलेनैव पवित्रे सूत्रवेष्टिते।।६५।।
कुर्यार्दवै पोक्षणो पात्र विधानं देशिकोत्तमः।
आज्यस्थाली तैजसी वा मृण्मयी योग्यतावशात्।।६६।।
त्रयः कुशामार्जने स्युः ततश्च धरणीधव।
कुर्यात्तथोपयमनकुशांश्च सप्तभिः कुशै।।६७।।
तिस्रच समिधः कार्य्या[२०] प्रादेशपरिनिर्मिताः।
आसादये छुवं तावद्गव्यमाज्यं च देशिकः।।६८।।
अष्टमुष्टिर्भवेत् कुंज कुजरष्टो च पुष्करम्।
चतुः पुष्कलतो राजन् पूर्ण्णपात्रं विदुर्बुधा[२१]।
आसादयेत्पूर्णपात्रं तादृशमृषिभाषितम्।।६९।।
दत्वा पवित्रं च ततः वित्रच्छेदनोपरि।
दक्षिणावर्तिभावेन वेष्टयुतदनन्तरम्।।७०।।
अग्रं प्रादेशमात्रं तत्पवित्रछेदनं चरेत्।
प्रोक्षिण्यूपरि संस्थाप्य गृहीत्वा प्रणितोदकम्।।७१।।
प्रोक्षणीं पूरयित्वा त प्रोक्षणीपात्रतः पुनः।
पवित्रेण चरेद् विद्वान तज्जलोत्पवनं नृप[२२]।।७२।।
प्रोक्षणी सव्यहस्ते च कृत्वा नामिकया पुनः।
अंगुष्ठया च दक्षस्य करस्यो दिंगनं[२३] जले।।७३।।
प्रणीतोदकतो भूयः प्रोक्षयेत् प्रोक्षिणीजलम्।
ततश्च प्राक्षिणीपाखनिधानं च चरेद् भुवि।।७४।।
यथासादितपात्राणि प्रोक्षयेत्प्रोक्षिणीजलेः।
ताभ्यामेव पवित्राम्यामर्चको यतमानसः।।७५।।
अग्निप्रणितयोर्मध्ये[२४] तत्रासंचरते स्थले।
प्रोक्षणीस्थापनं कुर्यर्यादाज्यस्थाल्यां ततः परम्।।७६।।
आज्यनिर्वाप एव स्यादाज्याधिश्रयणं ततः।
पर्य्यग्निकरणं कुर्य्यादुदकस्पर्शनं तथा[२५]।।७७।।
श्रंवं प्रतपनं कार्य्य संभार्जनकुशेः श्रुवम्।
प्रमार्जयेनमूलतोऽग्र पश्यनतं पूजकोत्तमः।।७८।।
प्रणीतोदकतस्तस्य श्रुवस्याभ्युक्षणं चरेत्।
पुनः श्रुवप्रतपनं भूमो तस्य[२६] निवेशनम्।।७९।।
आजयोद्वासनमाकुर्य्यादग्नेरुत्तरतः पुनः।
आनीय स्थापनं तस्य त्रिवारमिति योगतः।।८०।।
ततः पवित्रमादाय तदाज्योत्वपनं चरेत्।
त्रिवारतस्तदा कार्य्यामाज्यवेक्षणमुत्तमम्।।८१।।

नियोजनं श्रुवस्यापि प्रोक्षिण्युत्वपनं ततः।
पवित्रिस्थापनं[27] तत्र सव्यहस्ते कुशान्नयसेत्।।८२।।
धुत्वाऽथ हस्ते वामेऽपि चोतिष्ठन् समिधः क्षिपेत्।
आचाय्र्यो ब्रह्माणा स्पृष्टो होमं कुय्र्यादृदारधीः।।८३।।
धृत्वा पवित्रसंयुक्तं प्रोक्षिणीजलमादरात्।
ईशानकोणादारम्य तदन्तं पावकस्य च।।८४।।
पयर्युक्षणं चरेद्धीमान् प्रणीायां पवित्रकम्।
स्थ्यापयेन्नृपतिरेष्ठ होमकर्मविचक्षणः।।८५।।
एषोहदेवमित्येवमन्त्रमुच्चार्य मन्त्रवित्।
ओं[28] श्रुवमूले स्थितिर्मे च श्रूवमध्ये हरेस्तधा।।८६।।
नीलकण्ठोऽसत कण्ठेस्य तत् स्थानं तन्न धारयेत्।
चतुरंगुलमुत्सृज्य धारयेत् शंखमुद्रया।।८७।।
होममुद्रात्रयं कुर्ययान्मृगी हंसी च शूकरी।
प्रजापतिं च मामिन्द्रमग्निसोमं क्रमादधुनेत्।।८८।।
पुण्याहवाचनं कृत्वा नवाहुतिमतः परम्।
भुरादिकां हुनेनमनत्री राष्ट्रहोमं चरेत्ततः।।८९।।
अष्टाक्षरेण मन्त्रेण शतमष्टोत्तरं हुनेत्
अभावेऽपि तदर्ध स्यात्तस्याभावे तदर्थकम्।।९०।।
तैन्नैव मनुना राजने समिद्धिश्च शतं हुनेत्।
पूर्णाहुतिं कृते तावत्पात्रासादनमादरात्[29]।।९१।।
आज्यस्थाली त्रयो दर्भास्तथा दर्भा पुनर्नृप।
श्रुवं श्रुंच च संन्यस्य तथैकां समिथं न्यसेत्।९२।।
आज्यं तदाज्यस्थाल्यां वै त्वाज्यनिर्वापणं चरेत्।
आज्याधिश्रयणं कुय्र्यातपर्य्यग्निकरणं ततः।।९३।।
आदितस्त्रितयेणेव श्रुवस्य[30] मार्जनं चरेत्।
अपरेश्च त्रिमिर्दर्मैः तदाज्योत्पवनं चरेत्।।९४।।
आज्यावेक्षणमेवं च श्रुवेण श्रुचि भूपते।
चतुराहुतिमापूर्य्य नारिकेलफलं पुनः।।९५।।
दत्त्वा तत्रैव समिधधानं कुय्याद्विचक्षणः।
मूर्द्धानमितमन्त्रेण ब्रह्मो पूर्णाहुति हुनेत्।।९६।।
अग्नेर्विसर्जन कृत्वा प्रणीता ब्रह्मणस्तथा।
अच्छिद्राववृतिं कुय्र्यात् देवतानामतः३२ परम्।।९७।।
सर्वासां पजनें काय्र्यमग्निशर्मा च पूर्ववत्।
कुर्याद तन्दापनां राजान्न शशुशान् मन्त्रतः[33]।।९८।।

बृद्धमेषे गृहे तत्र वह्निक्षेपं समाचरेत्।
ज्वलितेऽग्नौ ततः शीघ्रं बहिर्मेषं समानयेत्।।६६।।
सप्तवारं तदा वह्निं प्रत्यर्चा भ्रामयेन्नृप।
समानीय निजस्थाने स्थापयेत् प्रतिमाश्च ताः।।१००।।
एवं वह्नुत्सवं कुर्याद्द्याादाचार्यदक्षिणाम्।
दौलामण्डपनिर्माणं कथयाम्यवधारय।।१०१।।
एतत् प्रासादपूर्वे हि मण्डपः शोभनोदयः।
विमासत् षोडश स्तम्भो विस्तीर्ण्णेश्चूर्ण्णलेपितः।।१०२।।
पाषाणरचितो दिव्या राजदाकांशमण्डनः।
चामराम्बरशोमाढ्यौ वितानोत्करसन्दरः।।१०३।।
शुककोकिलहंसा लिप्रमुखैः कृत्रिमैः खगेः।
राजमानः सभन्ताद्वै पश्यज्जनमनोहरः।।१०४।।
नारिकेलफलेः पुण्यैः पनसैः कदलीफलैः।
नागरंगेश्च अम्भीरेर्वन्देरन्दैः[1] फलैस्तथा।।१०५।।
जम्घुपलवजालैश्च रसालफलसंचयैः।
सर्वत्र तत्र शोघां च कुय्र्यात्कार्यविचक्षणः।।१०६।।
एतादृशं नृपश्रेष्ठ कुर्यादुच्चैश्च मण्डपम्।
समन्तात्परमां शोभां मण्डपस्य चरेन्नृप।।१०७।।
विस्तीर्णे मण्डपे तत्र दिव्यसोपानभूषिते।
वेदीद्वयं महीपाल कुय्र्याच्चारुतरं परम्।।१०८।।
तत्रोपरि परिभ्राजन्नानारत्नसमाकुला।
तोरणा रुचिरा कार्या गोविन्दप्रीतिकारिणी[2]।।१०६।।
तत्र दौलागत्तुलां नानारत्नसमुज्ज्वलाम्।
दिव्यनव्याम्बरवृतां योजयेन्नृपसत्तम।।११०।।
तत्र भद्रासनं रम्यं श्रीपर्ण्णिकाष्ठनिर्मितम्।
स्थापयेत्तुलिका युक्तमुपघानी समन्वितम्।।१११।।
चतुर्दशीदिनस्यापि रात्रेः पंचमयाभतः।
गोविन्दनाम प्रत्यर्चा नीत्वा विघ्नवनितके न्यसेत्।।११२।।
लाजाविकारजं दिव्यं नारिकेलविकारजम्।
पयोविकारजं तावत् शर्कराणां विकारजम्।।११३।।
एतादृशं च नैवेद्यं काले तस्मिन्निवेदयेत्।
पूजावसाने राजेन्द्र क्षालयेद्देवतापुरः।।११४।।
पूजकः प्रांजलिभूत्वा प्रार्थयेत् शुद्धमानसः।
देव देव नमस्तेऽस्तु जगन्नाथ नमोऽस्तुते।।११५।।

नानावतारलीलाभू नीलाचलपते नमः।
आज्ञां देहि जगन्नाथ प्रत्यर्चा प्रति सम्प्रति।।११६।।
कमलां विश्वधात्रीं च दोलाक्रीडनहेतवे।
इति सम्प्राथृर्यदेवांगान्मालां[३९] च द्विजसत्तमः।।११७।।
इति सम्प्रार्थ्य देवेशं तदंगान्माल्यमाहरेत्।
प्रत्यर्चा कमलां पृथवीं पूर्ववद् वितरेद् बुधः।।११८।।
प्रत्यर्चा सा महीनाथ जगन्नाथस्रगार्चिता।
ब्रह्मणा कसला मूर्तिर्जगत्रयसुपाविनी।।११९।।
तस्याः प्रतिकृतेः भूप विष्णोस्तस्य परात्मनः।
नास्ति भेदो जगत्यस्मिन् सत्यं सत्यं न संशयः।।१२०।।
आचार्या विन्यसेनमन्त्रं[४०] परं याति विभावयन्।
ततः सा प्रतिमा स्यात्र जायते जगदीश्वरः।।१२१।
ततो गोविन्दमानन्दाद् विश्वधात्रीं रमां तथा।
सप्तवारं भ्रामयेद्वे देवानभि नृपोत्तम्।।१२२।।
द्वितीयावरणस्येवाम्यनतरे यत्र कुत्रचित्।
शालायां च निवेश्याथ तां तु भद्रासनोपरि।।१२३।।
पंचामृतेन तैनेव स्नापयेच्च पृथक् पृथक्।
तस्येवान्यतमेनापि स्नापनं रचयेत् प्रभोः।।१२४।।
श्रीसूक्तं च समुच्चार्य गन्धतोयेन तां पुनः।
स्नापयेदतियत्नेन प्रोछयेन्नव वाससा।।१२५।।
वस्त्रलंकारमाल्येछयै भूषयेद्देवतास्ततः[४१]।
पंचोपचारतः पूजां कुर्यादायर्य़जनोत्तमः।।१२६।।
वन्दापनं प्रकुर्वीत यथाविधि तया तदा।
दिव्ये विमाने संस्थाप्य महात्सवतया नृप।।१२७।।
भ्रामयेत्सप्तशो भक्त्या प्रसादपरितस्तदा।
घण्टाभृदंगढक्कादिवाद्यजालध्वनिर्भ्वेत् ।१२८।।
शंखानां मधुरीणां च कहालानां च निःश्वनम्।
करतालवलिस्तात्पताकावलिजृम्भणम्[४२]।।१२९।।
चारुचामनवृन्दस्य पतनं च समन्नतः।
अजशब्दः स्तवाठस्तथैप पुष्पवर्षणम्।।१३०।।
चन्द्रदीपोर्मनोरम्येरन्येर्दीपसहस्रकेः।
निवारततमः कुय्र्याद्दोलाकेकजमहोत्सवं।।१३१।।
श्वेतच्छत्रं तथा कृष्णं धारयेद्धरणीधव।
मेघडम्बरविख्यातमातपत्रं च धारेयत्।।१३२।।

परीक्षकस्तु पुरतः स्वर्णवेत्रधरस्तदा।
वारांगनाश्च नृत्यनतो भविष्यन्ति च भूषिताः।।१३३।।
एवं महोत्सवं कृत्वा दोलामण्डपसन्निधिम्।
नीत्वा तनमण्डलस्याधो भ्रामयेच्च सप्तशः।।१३४।।
ऊर्ध्ववेदीं समालम्ब्य सप्तशो भ्रामयेत् पूनः।
तदूर्ध्ववेधां तां दोलां भ्रामयित्वा च सप्त वे।।१३५।।
तत्र दोलान्तरे दिव्ये वासयेत् दक्षिणामुखम्।
केतकीच्छत्रयुगलमुमयोः पार्श्वतो न्यसेत्।।१३६।।
ऊर्ध्वदेशे वितानं तु केतकीचयनिर्मितम्।
मल्लिकाशोकबकुलपुन्नागचम्पके बृंतम्[४३]।।१३७।।
मत्तल्भ्रपफंकार स्वानतोल्लासिकरं न्यसेत्।
अतः परं महाराज पूजकः शुद्धमत्तरः[४४]।१३८।।
प्रातस्तेषां च देशानामंगतो[४५] माल्यमम्बरम४६।।१३६।।
नानालंकारसंयुक्तं कुर्यादाचार्य्यसत्तमः।
ततो देवाग्रतः शीध्रं मध्यवेद्यां नृपोत्तम।।१४०।।
क्षालयित्वा च तत्रैव मेखलात्रयमालिखेत्।
तत्र धौताम्बरं शीध्रं निपात्य तत्पुरः पुनः।।१४१।।
अंशुकावरणं कुर्यात्पुनश्च परितो नृप।
स्मम्मानावृत्ययत्कुर्याद् यत्नादाच्छादनं[४७] तदा।।१४२।।
लाजानां नारिकेलानां शर्कराणां विकारजम्
पयसां शर्कराणां[४८] च तिलानां सुखदायिनीम[४९]।।१४३।।
विकारजं च नैवैद्यं कर्तव्यं नृपसत्तम।
दिव्यरस्माफलैश्चेव पयःपेटीसमुद्भवे[५०]।।१४४।।
इक्षुखण्डसमूहैश्च नवीनाम्रफलेस्तथां।
तादृशं वरनैवेद्यं प्रतिहारेः समन्ततः।।१४५।।
रक्षभाणं महीनाथ चरुहोता समानयेत्।
वस्त्राच्दादितवक्रश्च नैवेद्याहरणे नृप।।१४६।।
ततो यत्यादयः केऽपि न विशेयुश्च तत्र वै।
तत्र नीत्वा मेखलान्ते नैवेद्यं स्थामिते सति।
प्रमादाच्चेद्विशेत्कोऽपि तन्नैवेद्यं बहिः क्षिपेत्।।१४८।।
तथाग्निशर्मा[५१] राजेन्द्र गन्धदामनकं स्रजम्।
पीतवस्त्रद्वयं तावत् फल्गुपुंजं मनोरमम्।।१४६।।
केतकीवकुलाशोकमल्लीपुन्नागच्पकेः।
रचितं चारुमाल्यं च गोविन्दाय समर्पयेत्।।१५०।।

पात्रहोतुरितः पीठे श्रीपर्णिकाष्ठनिर्मिते।
पूजार्थ पुजकस्तत्र बंसेत्संयतमानसः।।१५१।।
चतुर्विंशतिसंख्यातेरुपचारेर्मनोहरेः।
पूर्ववद् पूजयेद्विष्णु नीराजनसमन्वितेः[५२]।।१५२।।
त्रयोदशाक्षेणाष्टदश हस्त एव वा।
मन्मथस्य लक्ष्म्याश्च मायया बजकत्रयम्।।१५३।।
दशाक्षरेण संयोज्य प्रथमं पूजयेत्ततः।
बीजं श्रीकाममायानां समुच्चार्य प्रयत्नतः।।१५४।।
तेनैव मनुना मध्ये पूजयेद् देशिकोत्तमः।
तृतीयपूजने बीजं मायाया मन्मथस्य च।।१५५।।
रमायाश्च दशार्णेन युक्त्वा सम्पूजयेत्सुधीः।
एतमन्त्रवरस्यास्य ऋषिर्ब्रह्मत्वहं नृप।।१५६।।
गायत्रीछन्द एवं स्याद्देवी नारायणः स्कृतः।
स्मरो बीजं प्रिया बह्ने शक्तिः क्षितिभृतां[५३] वर।।१५७।।
चतुवर्गफलप्राप्तये विनियोगो निगद्यते।
आचक्रादिश्च पंचांगमस्या मन्त्रवरस्य च।।१५८।।
दशाक्षरस्य यन्न्यांसं कुर्याव्यानं विना द्विजः।
तन्मन्त्रावरणं कुर्याद् देवतानां च पूजनम्।।१५९।।
पूजासमयमारम्य स्वर्णवेत्रवरश्शुचिः।
तव प्रतिनिधिस्तिष्ठेद्घश्टादीनां ध्वनिर्भवेत्।।१६०।।
तौर्य्यत्रिकं तदा कुय्याच्छत्रचामरधारिणम्।
महोत्सवं प्रकुर्वीत विष्णोः पूजनेकर्मणि।।१६१।।

इन्द्रद्युम्न उवाच

ध्यानं विना कथं पूजा कर्तव्याऽसो त्वया प्रभो।
कथमुक्तिमिति क्षिप्रं कथयाम्बुअसम्भव।।१६२।।

ब्रह्मोवाच

ध्यानं यथा स्यान्नृपते दोलाकेलिसमर्च्चने[५४]।
निशामय रहस्यं तद् गोविन्दप्रतिदायकम्।।१६३।
ध्यायेत्केलिकदम्बमूलनिलयं वृन्दावने शोभने।
नानापुष्पलतावितानमधुरे चुचल्पिकालिसवरे। (१६४)
कालिनदीजलशीतकरांवचतिमरुत्संसेव्यमाने धने।
क्रीडन्तं नवमंजुगरेपरमएीजुष्ट सुहृश्टानतकम्।।१६५।।
नीलेन्दीवरसुन्दरं सुनयनं चन्द्राननं पावनम्।
बन्धूकाधरसंजितं परिलसत्भूषावीवेष्टितम्।

चंचच्चक्रगदाब्जशंखविलसद्धस्तारविन्दं लसत्
वेणुं पीततरांशुकं सुमधुरं डोलायमानं परम्।।१६६।।
पद्माल्लास्यहतं सुवर्ण्णमुकुटं प्रद्योतमानं सुरैः
गन्धर्वैमुनिपुंगवेः[५५] सरभसं प्रस्तूयमानं तदा५६।
राजंगोरजसंचितं दिनमणिब्युहप्रभा भास्वरम्
कन्दर्पार्बुदसुन्दरं सुचतुरं गोविन्दमानन्दजम्।।१६७।।
एवं ध्यात्वा नृपश्रेष्ठ गोविंद मोक्षदायकम्।
पूजेयत परया भक्त्या दोलाकेलिदिनेऽर्चकः।।१६८।।
पूजावसाने नृपते तन्नीराजनतः पुनः।
कर्पूरवर्ति राजेन्द्र संप्रदर्श्य ततः पुनः।।१६६।।
फल्गु त्रिविधिमाक्षिप्य चामरं चालयेत्स्वयम्।
व्यजनं तथा कुय्र्याद धृत्वा पुष्पांजलिं नुप[५७]।।१७०।।
प्रार्थयेत्स्वं तदा भक्तया गोविन्दं सर्वकामदम्
नमस्तुभ्यं ुरश्रेष्ठ जगदानन्दकारक।।१७१।।
नानावतारलालाभिर्लोकानां च हितं चरन्।
दुष्टानां नाशनार्थाय पालनार्थ सतां प्रभो।।१७२।।
प्रकाशय नमस्तुम्यं गोविन्दाय नमो नमः।
इदानीं त्वां जगन्नाथ चारु दोलान्तरे स्थितम्।।१७३।।
दोलयामि महाबाहो अपराध्णं क्षमस्व मे।
इति सम्प्रार्थ्र्य देवेशं दद्यात्पुष्पांजलित्रयम्।।१७४।।
ततः शनैः शनैर्देवान् सप्तकृत्वस्तु दोलयेत्।
दालयामाने गोविन्दे जगत्रयजनास्तदा।।१७५।।
जयशब्द प्रकुर्ययासुः स्तुतिपाठपुरःसरम्।
पूर्ववन्मध्यदोलां हि कुय्याध्वनि पालक।।१७६।।
एवं तृतीयदोलान्ते सोऽग्निशर्मा च पूर्ववत्।
वन्दापनां तदा कुय्र्यात्तसदन्ते नृपसत्तम्।।१७७।।
नीराजनान्ते तत्रेव प्रविशेत् भक्तितो भवान्।
नवस्त्रद्धयं धृत्वा भक्त्या भगपतः पुरः।
ततोऽग्निशर्मा सहसा सम्प्रार्थ्र्य परमेश्वरम्।।१७६।।
पूर्ववद् दोलयेन्मन्दगोविन्दं सुरसेवितम्।
ततः परं प्रमोरंगान्मालादिं च समर्पयेत्।।१८०।।
तत्प्राप्य कृतकृत्योऽहमितृयुक्त्वा द्दृष्टमानसः।
ततः पुष्पांजलिं दत्त्वा नीराजनमथाचरेत्।।१८१।।
कर्पूरवर्त्या कुर्यातु चारुचामरचालनम्।

व्यजनेस्तालवृन्तेश्च बीजयेतद् भक्तितो भवान्।।१८२।।
मण्डपस्य समन्ताद्वे मर्दयेच्चन्दनाम्मसा।
सेचयेत्तद्रजो भूयः क्षिपेन्मण्डपसर्वतः।।१८३।।
ततः स्तुतिं समाकुर्य्यात्प्रणिपातपुरःसरम्।
नंमस्ते देवदेवेश हृषीकेश नमोऽस्तु ते।।१८४।।
गोविन्द परमानन्द मुकुन्द परमेश्वर।
लोकानुग्रहणार्थाय नानालीलात्स्वत्या धृताम्[५७]।।१८५।।
कंसादयो हतः सर्वे राक्षसालोकहिंसकाः।
येन त्वया जगन्नाथ गोविन्दाय नमोऽस्तु ते।।१८६।।
पूतना[५८] निहता येन हिंसितः शकटश्च वे।
येन वृन्दावने ीडऋः कृतास्तस्मे नमो नमः।१८७।।
एवं बहुविधैः स्तोत्रैः पवित्रे परमेश्वरम्।
स्तुत्वा तं प्रणमेत् भक्त्या भवान् वे भकतवत्सलम्।।१८८।।
अथाग्निशर्मा सहसा देवांगादवतार्य्य तत्।
वस्त्रमाल्यादिकं तुभ्यं दास्यसि क्षितसत्तम।।१८९।।
अथ[५९] देवान् भ्रामयेतां सप्तवारं च दोलिकम्।
मध्यवर्दी संप्तवारं भ्रामयित्वा तु मण्डपे।।१९०।।
दक्षिणस्यां स्थापयित्वा कुय्र्याद्वन्दापनां द्विजः।
पूर्ववदग्निशर्मा च भक्तिमानसमन्वितः।।१९१।।
अधौभागे समानीय चक्रपाणिं सुरेश्वरम्।
पुनस्तं भ्रामयेत् दोलामण्डपं नृपसपतशः।।१९२।।
दिव्ये विमाने संस्थाप्य महोत्सवतया ततः।
आनीय सप्तवारं तं प्रासादं भ्रामयेद् पूनः।।१९३।।
भ्रमणान्ते पुनस्थस्य प्रासादस्य त पश्चिमे।
गीत द्रव्यैश्च नैवेद्यं दतवा वन्दापनां चरेत्।।१९४।।
ततो दवोत्तमपुरः सापयेत् प्रतिमाश्च ताः।
पूर्ववच्च प्रकुर्वीत तद् वन्दापनाकर्म वै।।१९५।।
प्रतयुच्र्चा शतमत्युग्रं ततेजः परमेश्वरे।
स्थापयित्वा प्रतिकृतिं स्थापेयन्निजवेश्मनि।।१९६।।

सूत उवाच

शोनकादया महीदेवा ब्रह्मणा कथितं यथा।
इन्द्रद्युम्नस्तु राजर्षिस्तत्तथेव समाचरेत्[६०]।।१९७।।
ये मर्त्या भक्तिभावेन क्षेत्रे श्रीपुरुषोत्तमे।
तादृशां कमलाभतुर्दोकेलिमहादयाम्।

पश्यन्ति तेषां नो जनम जगत्यस्मिन् सुदुखदम्।
सर्वकामप्रदां यात्रां दोलाख्यां धरीणसुराः।।१६८।।
दृष्‌वा लभनृते परमं शर्म गोविन्ददर्शनात्।
दोलार्थ परिगच्छन्तं गोविन्दं ये च मानवाः।।१६६।।
पश्यन्ति तेषां पूर्ण्णाः स्युः सद्यः सर्वमनोरथाः।
दोलायमानं गोविन्दं ये पश्यन्ति मुहुर्मुहुः।।२००।।
सर्वतीर्थाटनफलं लब्ध्वा मुक्ता भवार्ण्णवात्।
प्रथमां ये च पश्यन्ति दोलाकेलिं जगत्पतेः।।२०१।।
तेषा वै जायेते धर्मः सुखहेतुः सनातनः।
दोलाकेलिर्मुराराते द्वितीया नाम धारिणी।।२०२।।
हेलया लोकिता येस्ते लभन्तेऽर्थान्न संशयः।
दोलायमानं गोविन्दं तृतीयाया रमापतिम्।।२०३।।
दृष्ट्वा कामानवाप्नोति नरः सत्यं न संशयः।
एकदेव प्रपश्यन्ति दोलाकेलित्रयं च ये।।२०४।।
भुक्त्वा शर्म परं त्वत्तः शेषे मोक्षमवाप्नुयुः।
दक्षिणाभिमुखस्यास्य गोविन्दस्य जगत्पतेः।।२०५।।
वन्दापनां सकृद् दृष्ट्वा न पुनर्जायते जनिः[६१]।
विमाने वाऽपि दोलायमकसमात्पतनं हरेः।२०६।।
तदा राज्ये भयं घोरं राजा नश्येन्न संशयः।
दुर्भिक्षं मरणं[६२] चैव सज्जनानां न संक्षयः।।२०७।।
अधिकारवतामेव नाशः स्याद्धरणीसुराः।
तस्माद् बहुविधां शन्तिं राजा भक्त्या च कारयेत्।।२०८।।
राज्यस्य कुशलार्थ वे निजस्य च मुनीश्वराः।
दारुब्रह्म प्रसादेषु या मतिर्जायते द्विजाः।।२०६।।
प्रत्यर्च्चानां प्रसादेषु तथा विश्वासमाचरेत्।
आज्ञामाल्यप्रदानेन तासां य ब्रह्मणा द्विजाः।।२१०।।
भेदो नास्ति यथा नूनं तत् प्रसादः सुपावनः।
महाप्रसादे विष्णो च तथ नामसु भूसुराः।।२११।।
स्वल्पपुण्यवतो जन्तोः विश्वासवो नापि जायते।।२१२।।
भूमिदेववराः सुरोत्करवरो ब्रह्मा पुराऽप्यादरा –
दिन्द्रद्युम्नमहीपतिं प्रति विभोमाह यात्रोत्तममा्।
दोलाकेलिममुं च तां भगवतः पश्यन्ति ये श्रद्धया
तेषा नास्ति महीतले विपदशुर्मुक्तिश्च नो दुर्लभा।।२१३।।
इति सूतसंहितायां नीलाद्रिमहोदये शोनिकादिमुनिसूतसम्वादे
दालायात्रा – वर्णनं नाम चतुस्त्रिरांशोऽध्यायः

FOOTNOTES

१ K, R परमं। २ K, R महाप्राज्ञ। ३ K, R श्चानीयेश्च। ४ K, R, M मानसः। ५ K, R पंच। ६ K. M, R दोलाया मण्डप; U दोलायां मण्डपं; U दालोयां मण्डपं। ७ K, M, R. U प्रभो। ८ M वालुकाख्यं। ६ U मन्त्रेश्च। १० M तथशावन्नरपते, K, R तद् यथा वन्नरपते। ११ K, M, R विदांवरः।. १२ K, M, U शिरेसे त्विति। १३ M मन्त्रेस्तु, U जनेस्तु। १४ M वषट् इति, R वषट् इति, U वषाडिति, K वषट् त्विति। १५ K,M,R,U कवाचाय। १६ R मदनातुरं, K मदनातुरा। १७ K,R,U ऋतुनयनधरं। १८ K, M, R, U महोदयम्। १६ K वह्नि। २० U पूजकोत्तमः। २१ K, R, U कुशेः। २२ K, R कार्य्र्याः। २३ K, R विदुर्बुथः। २४ U यतः। २५ U मलनं। २६ K, R कुर्य्र्या। २७ K, R यथाविधिः। २८ K, U पवित्रं। sl. 83b is absent in K, M, R,. After sl. 86a, the following verse os present in K, M< R -

आचार्य्र्यो ब्रह्मणा स्पृष्टमोहं कुर्यादुदारधीः।

२६ ओं. sis absent in K, M<R, U. ३० माचरेत in K, M, R, U। ३१ M श्चर्द्यतंत्रयेणेव श्रृवश्च, U आदियदार्तत्रयेणेव श्रुवश्रुं, K, R आद्यदतत्रयेणेव श्रुव श्रुतं। ३२ M चरेत्। ३३ U ततः। ३४ M शुशिषान! मन्त्रितः, K, R शुषनं च मन्त्रत; U शुणिषान् मन्त्रतंः। ३४ M पाषाणरेचितो। ३५ U वेन्यरम्यो। ३६ K, R, U दायिनी। ३७ M रात्रोः पश्चिमयामत; K, R, U यात्रेः पश्चिमयामतः। After sl. 112, the following Verse is present in K, M, R, U -

ततः परं महाविष्णु सामान्यविधिनार्चयेत्।

३८ M, U देवांगान्मालां च द्विजसत्तम्, K, R देवांगान्मालां नृपतिसत्तम। M, R, K, U Omit sls. 118-120 . ३६ K विन्यसेनमालां। ४० U पुन; K, R श्चताः। ४१ K, R करतालध्वनि। ४२ K, M, R र्युतं। ४३ K, R शुद्धमानसः;U शुद्धिमत्तरः। ४४ K, R, U देवानामंगतो। ४५ K, U भूषयेत् परमेश्वरम्। ४६ K, M, R, U वस्त्रेण कुर्या। ४७ K, R चणकानां। ४८ K, R सुखदायिकां। ४६ K,M, R समूहकेः। sls. 141-142a are absent in U. After sl. 148, the following Verses are paresent in K, M, R

प्रतिहारिश्च तो ब्रह्मन जगन्नाथस्त्त्रूपधृक्।
निराथने जायमाने मुक्ते विष्णुः स्वयं हरिः।
(The Varaint in K, R is प्रतिहारिततो राजन्।)

५० K, M, R, U अथ। ५१ M समन्वितः। ५२ K मेवं मृताम्बर। ५३ U समर्च्चनं। ५४ R सहृष्यमितकं, K, U सहृष्टामकं। ५५ M र्गन्दर्वेः। ५६ M स्तदा। ५७ R ततः। sls. 185-186 are absent in M. ५८ M धृताः। ५६ U पूजना। ६० U अपि। ६१ U च। ६२ K, M, R, U शीतद्रव्येश्च। ६३ M समाचारे। ६४ K, M, R, U जनः। ६५ U मरकं।

पंचत्रिंशोऽध्यायः

ब्रह्मोवाच

चैत्रे मासि महाविष्णोः नानालीलायस्य[1] या।
यात्राः स्युस्ताश्च वक्तव्याः श्रूयतामेकचेतसा।।१।।
चैत्रे शुक्लाष्ठमी यावतिथिः स्याददतिथिप्रिय।
तद्दिनेऽपि मुरारतेः सायःपूजावसानतः।।२।।
कोसल्यायाश्च शान्त्यर्थ क्षालितान्नं च पायसम्।
नानाव्यंजनसंयुक्तं नानापूपसमाकुलम्।।३।।
तन्नैवेद्यं समर्प्याशु यजेतं चन्दनादिना।
वन्दापयेत्तदा भक्त्या पूर्ववतं परन्तप।।४।।
नवम्यां तु तिथो प्रातःपूजान्ते पूजकोत्तमः।
महास्नानविधो स्नायात्परमेशं चतुःसमैः।।५।।
लेपयेदीतयत्नेन नदीनाम्बरमाल्यकैः।
सुन्दरेस्तैरलकारेर्यथायोग्यं सुभूषयेत्[2]।।६।।
ततो मध्यह्नपूजां च कुयर्यात् विधिवदादरभत्[3]।
ततो रामप्रतिकृतिं जगदीशान्तिके न्यसेत्।।७।।
सर्वरुपधरं श्रीमान् नीलभूथरमन्दिर।
नमस्ते जगतां नाथ जगज्ज्नमहार्तिहन्।।८।।
आज्ञापय महाबाहो रामजन्मोत्सवाय वे।
रामप्रतिकृतिं तावद्रावणादीनि नाशिनीम्।।९।।
इति विज्ञाय देवेशं तदंगादर्चकः पुनः।
माल्यामानीय तद् दद्यात्पत्यर्चा प्रति भूपते।।१०।।
निरोधनग्रहाग्रेऽथ लिखेद्राधवमण्उलम्।
आचार्यः सूत्रहस्तः स्याच्चतूरस्रं लिखेत् पुरः।।११।
ीर्यगूर्ध्व क्रमान्त ध्य अष्टाधिकदशान्विताः।
रेखाश्च तादृशा भूयो विलिख्य च यथाक्रमम्।।१२।।
चतुःकोणानि शुक्लानि कर्तव्यसानि त्रिभिः त्रिभिः।
२न्द्रवन्नपतिश्रेष्ठ कुयर्यादाचार्यसत्तमः।।१३।।
पंच कोष्ठिषु राजन्द्र श्रृंखला कृष्णवर्णभाक्।
एकादशपदेर्वल्लीश्यामवण्णा भवेत् शुभा।।१४।।
भद्रं रक्तं विधातव्यं पदेश्च नवभिस्तदा[4]।
वापी शुक्ला च कर्तव्या चतुर्विशतिभिः पदेः।।१५।।

परिधिः पीतवर्ण्णः स्यात्पदेर्विंशतिसंख्यके:।
कलासंख्यासयु कोष्ठोषु पंकज पूवैवल्लिखेत्।।१६
अर्धाङ्.गुलप्रमाणेन कोष्ठानां[५] ल्पनां चरेत्।
पूर्व हरिं समालिख्य पश्चिमे कलशं पुनः।।१७।।
पताकाचक्रसहितं लिखेत्मण्डलकर्मवित्।
दक्षिणोत्तरदिग्भागे वसुकोणं लिखेतदा।।१८।।
चतु:कोणे नुपश्रेष्ठ कुय्र्यात्फीराकृतिं बुधः।
एवं मण्डलमालिख्य रामस्य प्रतिदायकम्।।१६।।
ख्यातं राधवनामानं पश्यतां विस्मयप्रदम्।
रामजन्मनि भो भूप प्रशस्तं मण्डलं त्विदम्।२०।।
अन्यथा चेत्तदा पूजा निष्फला स्यान्न संशयः।
प्रत्यर्चा मण्डलें तत्र वासयत्विा ततोऽर्चकः।।२१।।
कुय्र्याद् वरुणापूजां सं त्वग्निशर्माणमादरात्।
संकल्पयति राजर्षे सोऽग्निशर्मा पुनस्तदा।।२२।।
आचार्यब्रह्मवरणं कुय्र्याद्वे क्रमतो मुदा।
पुण्याहवाचनं कुय्र्यादाचार्य्यश्च पुनर्नप।२३।।
सुवर्णरचितां राम प्रतिमां सुमनोरमाम्[७]।
पंचामृतेन संस्थाप्य कोसल्यादरसंस्थितम्।।२४।।
अर्चयित्वा तु[८] रामं यजेद् गन्धादिना नृप।
ततत्स्वेजतु मन्त्रेण गर्मोदकमनुत्तमम्।।२५।।
दत्वा पात्रतले रामं जन्मप्राप्तं तु चिन्तयेत्।
पीतवस्त्रद्वयं गन्थ॰ दामदामनकं शुभम्।।२६।।
अग्निशर्मा तदा दद्यात् पूर्ववत् पूजकोत्तमः।
जलदोषोपशान्त्यर्थ वटिकां नवनी तकम्।।२७।।
आचार्याप्यग्निशर्मा च कुय्र्यात् कर्पूरवर्त्तिकाम्।
एतदन्तेऽर्चकः श्रीमान् वसोर्द्धारां समापयेत्।।२८।।
ततो महोत्सवतया प्रत्यर्चा स्वपदे न्यसेत्।
एतदुत्सवमोत्सववान्मानवा ये मुहुर्महुः।।२६।।
कुर्वन्ति विधिवद् भक्त्या कूर्वन्ति[६] सुसमाहिताः।
सर्वपापविनिर्मुक्त लभश्चै ते हरेः पद।।३०।।
द्वादश्यां च तिथो सायं पूजान्त नृपसत्तम।
चतुरस्रा च पट्टस्य निर्मितर्हृस्वयुग्मतः।।३१।।
कतवया विलिखेतत्र शम्बरारिं मनोहरम्।

रक्तवर्ण्ण हस्तयोश्चं धनुर्बाणान् दद्यत्स्मरम्[10]।।३२।।
स्कन्धदेशे तु तुणीरं सरदं विलिखेत्सुधीः।
तादृशं पट्टमाननदात्पंचामृतरसैः शुभैः।।३३।।
स्नापयित्वा ततो वस्त्रेर्माल्येश्च भूशयेततः।
गन्धादिना यजेत्तावदेशं पट्टाधिवसनम्।।३४।।
कुय्र्यात्तस्त्रयोदश्यां दिवाभागे नृपोत्तम।
पंचदण्डस्थिते काले निद्राभंगाश्रियः पतेः।।३५।।
निद्राभंग विधायाशु रामकृष्णो नयेत् पुनः।
बलस्य जगदीशस्य समीपे त्वधिवासितम्।।३६।।
पट्टं च स्थापयत्त्विा त प्रार्थयेत्पूजकोत्तमः।
बलदेव नमस्तेऽस्तु नमस्ते मुषलायुध।३७।।
नमस्ते रेवतीकझन्त रोहिणीनन्दन प्रभो।
वस्न्तभ्रमणार्थाया हर्तु दमनकोत्करम्।।३८।।
राममाज्ञापय क्षिप्रं हिताय जगतां परम्।
इन्दीवर दलश्याम जगदीश रमापते।३६।।
नानालीलाकर श्रीमान् नमस्तुभ्यं नमो नमः।
नमस्ते पद्मनेत्राय पद्मनामाय ते नमः।।४०।।
पद्मापते नमस्तुभ्यं पद्ममालिन् नमोऽसतु ते।
हर्व्रु दमनकं वृन्दं गन्थव्याप्तदिगन्तरम्।।४१।।
वसन्तभ्रामलालाये कृष्णमाज्ञापय प्रभो।
कन्दर्पस्तु सुरश्रेष्ठ पूज्यंः स्याद् वे तवाज्ञया।।४२।
एतदर्थ महाबाहो आज्ञापय रमाधव।
इति विज्ञाप्य राजेन्द्र देवांगान्माल्यमाहरेत्।।४३।।
रामं कृष्णं तथा कामं पति दद्यात् पृथक् पृथक्।
शिबिकायां ततस्तो तु रामकृष्णो सुशोभनो११।।४।।
वासयित्वा देवयाने ततस्त्वं पट्टमेव च।
समारोप्य नयेत्पूर्वे दिव्यारामं प्रदक्षिणेः।।४५।।
आच्चाय्र्यः प्रथमं कुर्यात् प्राणिनो यजनं[12] मुदा।
कन्दर्पाग्रे वसन् धीमान् यथाविधि परन्तप।।४६।।
अग्निशर्माणमेवासो संकल्पयति सादरम्।
सप्त वा पंच वा कुर्याद् ब्रह्मणस्तथा।।४७।।
आचाय्र्यवरणं कुर्याद् वरणं ब्रह्मणस्तथा।
अर्चकस्त्वग्नियजनं पात्रासादनमेव च।।४८।।

कृत्वा ततश्च जुहुयादाघारावाज्यभागकौ।
भूरादिकां हुनेद्भ्सूयो नानाहुतिमनिन्दिताम्।।४६।।
गायत्रया कामदेवस्य सहस्रं संहुनेद् द्विजः।
तदभावे तदर्द्धेन तस्याभावे शतत्रयम्[१३]।।५०।।
धृताक्तः समिधस्तत्र शतमष्टोत्तरं हुनेत्।
अशोककुसुमसतद्वत्सहस्र जुहुयाद् बुधः।।५१।।
पूर्णाहुतिं ततो दत्वा कुर्यात् पुण्याहवाचनम्।
एवं यदा महीनाथ होमकर्म समाचरेत्।।५२।।
आययुरारोग्यमेश्वर्य सर्वत्र जय एव च।
यजमानस्य राजेन्द्र कीर्तिर्वशोदयो भवेत्।।५३।।
कामं पंचोपचारेतण पूजयेत् पायसेन च।
संपूज्य त्वग्निशर्माऽसो तद् वन्दापनामचरेत्।।५४।।
चामरव्यजनैस्तवद्दग्निंशर्मा[१४] समर्पयेत्।
आचार्याय ततो दद्यात्स्वर्णनिश्केण दक्षिणा।।५५।।
ततस्तो रामककृष्णो चं पूजयेच्चन्दनादिना।
वन्दापनां दमनकं वृक्षं सम्प्रर्थयेत्पुनः।।५६।।
पूजांये जगदीशस्य समीपं ते समागतः।
नमामि[१५] त्वां दमनक[१६] प्रसन्नो भव साम्प्रतम्।।५७।।
पूजकास्तवतिसम्प्राथ्र्य पुप्पांजलिमथो न्यसेत्।
आं नमः कामाय मन्त्रं वदन् दमनकं शुभम्[१७]।।५८।।
एकेकं मूलसंयुक्तं दुमं दमनकं शुभम्।
न्यसेत्कराम्बुजे भूप तयोश्च रामकृष्णयोः।।५६।।
पट्टदेवं विसृज्याथ पात्रहोता च वाससा।
आच्छादितं मुखं तावदेवभविंशतिसंख्यकान्।।६०।
सपंत सप्त द्रुमान दिव्यान् वाससाऽच्छादितान् तदा।
महोत्सवतया[१८] चाग्रे रामकृष्णो च पृष्टत५।।६१।।
प्रासादं प्रति भूपाल नयेत्तान् दमनोत्करान्।
स्वपदे रामकृष्णो तो न्यसेत्तत्र मनोरमे।।६२।।
प्रासादपूर्वतो[१९] रम्ये चतुर्द्धारविभूषिते।
चतुरस्रे वितानादि स्फुरिते मण्डपोत्तमे।।६३।।
तत्र दमनकान् वृक्षान् समूलान् परि संन्यसेत्।
सायं पूजापसानेऽथ मण्डपे तत्र शोभने।।६४।।
वालुकाग्रहनिर्माणं चतुरस्रं मनोरमम्[२०]।

पूर्वतो द्वारसंयुक्तं तन्मध्ये चाष्टपूर्णकम् ।।६५।।
एतान् द्रुमान दमनकानेविंशतिसंख्यकान् ।
संरक्ष्य धरणीनाथ वालुकायां च गोपयेत् ।।६६।।
पद्मे दमनकचयं स्थापयित्वा तु यत्नतः
गन्धपुष्पार्पणं तत्र वस्त्रेराच्छदयेत् पूनः ।।६७।।
कृष्णं रामं[२१] विश्वधात्री पूजयेच्चन्दनादिना ।
रामकृष्णकरस्थौ या दुमो दमनको नृप ।।६८।
तदाचार्य्यः करे धृत्वा प्रार्थयेत्परमेश्वरम् ।
नमस्तुभ्यं जगद्बन्धो नमस्त्रैलोक्यनायक ।६६।
नमस्तुभ्यं सुरश्रेष्ठ स्निधुजापतये नमः ।
त्रैलोक्यकण्टको भूत्वा योऽभूद्दमनवोऽसुरः ।।७०।।
पूर्व सोनीहतः शीघ्रं तदा देत्यो महाबलः ।
स च देत्यो हरेः पश्चान्नम्रयित्वा जनार्दनः ।।७१।।
प्रीतस्त्वं च पुनस्तस्मे सम्पत्तिमददः प्रभो ।
अधुना वृक्षरुपेण जातः सोऽयं महीतले ।।७२।।
सुप्रीतो भव देवेश अत्र दमनकद्रुमे ।
इत्युक्त्वासौ दमनकं कृष्णहस्ताम्बुजेऽर्पयेत् ।।७३।।
गीतनृत्यादिभिर्भूप क्षपा तावन्नयेत्पुनः ।
अरुणोदयचतुर्दश्यां प्रातर्यनमाचरेत् ।।७४।।
ततः कुर्य्यान्महास्नानं देवानामतिभक्तितः ।
चतु५ समविलेपं च वस्त्रालंकारमण्डत्तम् ।।७५।।
ततोऽर्चकः सोऽग्निशर्मा ब्रह्मा च ते सुसंयताः ।
अधिवासगृहं गत द्रुमान दमनकान् पुनः ।।७६।।
वस्त्रैराच्छादितान् धृत्वा च्द्त्रघण्टादिचामरैः ।
काहालशंखमधुरी मरी सनमर्दलादिभिः ।।७७।।
महोत्सवं विधायाथ भ्रामयित्वा त्रिवरतः ।
प्रासादं सुरश्रेष्ठान् तथा कृत्वा महीपते ।।७८।।
देवाग्रे स्थापयेयुस्ते तान् दमनकान् द्रुमान् ।
देवानां यजनं कार्य्य चतुर्विंशतिसंख्यकैः ।।७६।।
उपचारेः पंचभिर्वा ततः संस्कृत्य प्रार्थयेत् ।
हिरण्यकशिपोर्वक्षो विदार्य्य नखरैः निजैः ।।८०।।
तद्वसाभि यथादेवं कृतं कुसुमान्वतम् ।।८१।।
मया दत्तं गृहाणेदं वृक्षं ते प्रीतिहेतवे ।

जगन्नाथ नमस्तेऽस्तु नमस्ते करुणानिधे।।८२।।
अपराधी मदीयोऽसौ क्षन्त्त्यो भक्तवत्सल।
इति[22] सम्प्रार्थ्य देवेशं तद्गुमान् शिरसि प्रभोः।।८३।।
दत्वा परमया भक्त्या नमः कुर्यात् पुनः पुनः।
बलदेव बलाधार बलोत्पादितभूतले[23]।।८४।।
बलघ्वसत प्रलम्ब तवां नमामि बलिनां वर।
गन्धतृणामिदं रम्यं गृहाण परमेश्वर।८५।।
इत्युक्त्वा सोऽग्निशर्मा च दो दमनकं मुदा।
भद्रे देवि नमस्तुम्यं भक्तानां भद्रदायिनी।।८६।।
इदं दमनकं देवि स्वीकुरु स्वेरसुन्दरे[24]।।
ब्रह्मा तदा निगद्येवं दद्याद्दमनकं तृणम्।।८७।।
ततो मध्याह्नयजनं[25] कृत्वा प्रक्षालयेत्पुरः।
वन्दापयेयुस्ते सर्वे पुनर्दमनकं शुभम्।।८८।।
शिरसस्तु बहिस्कृत्य दद्युस्तुभ्यं नृपोत्तम।
एतस्मिन् समये ये च भक्त्या पश्यन्ति केशवम्।।८६।।
इह भोगान् मनोरम्याम् भुक्त्वा चान्ते परं पदम[26]।
गच्छन्ति नृपशार्दूल संशयोऽत्र न विद्यते।।६०।।
एतद्दमनकं ये वै सादनित च बहनित च।
सर्वपापविनिमुक्तास्तथा रोगैः प्रमुच्यते।।६१।।
वहतां सद्दिशां नाथ बलं[27] हस्तेन[28] मस्तके।
डाकिन्यः[29] प्रेतकूष्माण्उभूतवेतारकादयः।।६२।।
शक्नुवन्ति न कर्तु ते हिसांलेशं च. हिंसकाः।
गेहास्तिवाजिनां तावन्मरोगस्तु निषेवणे।।६३।
ये च भक्त्या[30] करे धृत्वा भक्तिभावसमन्विताः।
रणं गच्छन्ति ते सर्वे जायकामा भंवन्ति ते[31]।।६४।।
एतद्दमनमं महद् मृशतरं जप्त्वा पुनः सोऽज्जजो
विप्रास्तं नृपतिं प्रति क्षितितले नीलाचलेशं[32] तु यत्। (६५)
प्राह प्रेमभरेण तत्र विमले वैशाखमासि स्फुटम्।
चान्यद् यद् गदतां[33] नृणां कल्मलिप्रध्वंसि[34] च श्रृण्वताम्।।६६।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये शोनकादिमुनिसुतसम्वादे
दमनकयाश्राकथनं नाम पंचत्रिंशत्तमोऽध्यायः।

FOOTNOTES

१ K, R लीलामयस्य या। २ K च भूषयेत्। ३ M चरेत्। ४ K, U स्तथा। ५ K, R, U गुणानां। ६ K, U, M लिखेत् षट्कोणमुत्तमम्, R लिखेत् पश्ये कृष्णमुत्तमम्। ७ M मनोहरा। ८ K, M, R चिन्तयित्वा। ९ U चैव। १० K, R, U पश्यन्ति। ११ K धनुवामि दक्षे पाणी दधद्धरं, U हस्तयोश्च वामपाणो धनुर्वाणान् दक्षपाणो दधत् स्मरम्। १२ M शोभनं। १३ M कुय्र्याद् वरणं ब्राह्मणस्तथा। sl. 46 is absent in M. sls. 47-48a are absent in R. १४ M तुदर्द्धकम्। १५ M तामर। १६ K, M, R नमामि त्वां। १७ K, M, R, U हरेत्। १८ K, R तदा। १९ K तो मनोरम्ये। २० K, M, R, U मनोहरम्। २१ U रमां । २२ M इत्थुं, U इति। sls. 83b and 84 are absent in R. २३ M, U भूतल। २४ M सुन्दर, K, R सुन्दरि। २५ M ध्याह्नन। २६ K हरेः पद। २७ M प्रले, K, R, U गले। २८ M डाकिन्य। २९ K, M, R, U मत्याः शिरे। ३० K, M, R भवन्ति ते, U भवन्ति हि। ३१ K, U नीलाचलेशस्य यत्। Before sl. 95, सूत उवाच is present in K, M, R, U। ३२ M चूचन्यत्तद्वदतां, K, R चान्यत्तद्गदतां, U चान्वतद्वदतां। ३३ M कलिनप्रघ्वसिं।

षष्ठत्रिंशोऽध्यायः

ब्रह्मोवाच

वैखाखे मासि यन्नीति नीलाचलपतेर्हरेः।
तं वदामि नृपश्रेष्ठ सर्वकामफलप्रदम[1]।।१।।
मेषमासरू संक्रान्त्यां प्रातर्यजनातः परम्।
महास्नानं हरें कृत्वा सर्वागस्य विलेपनम्।।२।।
नवीनवस्त्रालंकारैभूषयेत्कमलेक्षणम्[2]।
तण्डुलानामेकभागे माषाणां च द्विभगतः।।३।।
एकीकृत्य च तत्रैव रामणं लवणं पुनः।
यत्रं पकोन वै कुर्यादपूपं तादृशं बहु।।४।।
प्रपानकेन दिव्येन समं कृत्वा नराधिप।
बहूनि तान्यपूपानि कृत्वा तन्मध्यमार्च्चनम्।५।।
समाप्य विधिवद् भक्त्या वन्दापनकमाचरेत्[4]।
अथौ वैशाखमासस्य शुक्लपक्षे शुभेदिये।।६।।
तृतीययां[5] तिथे सायं पूजानन्तराते नृप।
प्रसाद पूर्वदेशे हि चतुरस्रं सुशोभनम्।।७।
चतुर्द्धारसमायुक्तं पताकावलिराजितम्।
वितानजलसन्नद्धं मण्डपं रचयेत्ततः।।८।।
पद्मपत्रत्रयं[6] कृत्वा तत्र भद्रासने न्यसेत्।
सौवर्ण्णे वाथवा रौप्ये रम्ये पात्रत्रये पुनः।।९।।
सहस्रफलसख्यातं चन्दनं चारु पेषितम्।
पातयेच्चन्दने तत्र सिल्लिकाफलपंचकम्[7]।।१०।।
चन्दनौद्गततसम्पक्व तैलस्य च पलत्रयम्।
कस्तूरिकापलं तत्र कर्पूरं च पलाध्रिकम्।।११।।
एतत्सर्व विनिक्षिप्य पेषयैत्पाणिना मुहुः।
जगदीशकृते तत्तु सहस्रर्द्धपलं न्यसेत्।।१२।।
बलाय त्रिंहतपलं सुभद्रायाः कृते नृप।
सपादं स्थापयेतत्र न बाधिकशतद्धयम्।।१३।।
एवंरूपेण मातिमान् भजनेषु न्यसेच्च ता[8]।
चीन[9] पट्टाशकैर्नव्यैर्यन्ता दासादयेद् बुधः।।१४।।
त्रैलोक्यरक्षणप्रद प्रनाक् चक्रं च स्वाहिनकिम्।
इत्युक्त्वा वासाऽच्छाद्य त्वसुरान्तकपदं पुनः।।१५।।

पूर्व दघ्त्वा चतुर्ध्र्यन्तं स्वाहान्तं चक्रमुच्चरन्।
पातयेत्केतकी पत्रं[१०] तत्र चन्दन भाजनै।।१६।।
गन्धद्वारेऽति गन्धं च स्थापयेत्सोममन्त्रतः।
ततो गारुडिकीं मुद्रां दर्शयेद् भाजनोपरि।।१७।।
नृसिंहमन्त्रराजेन दृष्ट्वा चैवाष्टध जपेत्।
एवं गन्धाधिवासश्च कर्तव्यो धरणीपते।।१८।।
अरुणोदयकाले च तद् द्रव्यैश्च प्रपूजयेत्[११]।
पूजान्ते नृपशार्दूल सिंहासनगताश्च ते।।१९।।
प्रातः पूजा महास्नानं नववस्त्राणाप्रणं तथा
आचाय्र्यौऽप्यग्नियशर्मा च ब्रह्मा च भक्तितततपरः।।२०।।
छत्रघण्टासिंराजदुत्सवैश्च मनौहरेः।
प्रासादं भ्रामयित्वा च चन्दनं तत्रिवारतः।।२१।।
देवान्[१२] तथा भ्रामयित्वा देवाग्रे तद्भुतं[१३] न्यसेत्।
ततौ पंचौपचारेण शीतद्रव्यैश्च पूजयेत्।।२२।।
पूजान्ते नृपशार्दूल सिहासनगताश्च तै।
आसनं व चरं कृत्वा तथैव बन्धनं दिशाम्।।२३।।
भूतशुद्धिं[१४] च कुर्यर्यासुस्तऽर्चक प्रमुखा द्विजाः[१५]।
इतो[१६] वस्त्राणि राजेन्द्र कैत्क्याश्च दलानि च[१७]।।२४।।
बहिष्कुय्र्यात्ततस्तत्रं संस्कुयार्युर्वीक्षणादिभिः[१८]।
प्रार्थयेदग्निश्र्माऽसौ बलयदेवं[१९] महोदम्[२०]।।२५।।
बलदेव नमस्तुभ्यं नीलाम्बर नमोऽस्तु ते।
तापत्रयाग्निशांन्त्यर्थ जगत्यां मुषलायुध।।२६।।
चन्दनैश्चारु गन्धाझयैस्तव देहं महत्तरम्।
लेपयामि सुरश्रेष्ठ अपराधं क्षमस्व मे।।२७।।
इत्युक्त्वा सोऽग्निशर्माऽपि लेपेयच्चन्दनैर्बलम्।
जगन्नाथ समस्तेऽस्तु नमः संसारतारक।।२८।।
जनार्दन जगद् बन्धौ जग़दाधर ते नमः
जापत्रययोपशान्तयर्थ ददाकि चारु चन्दनम्।२९।।
अंगकुरु महाबाहो पाहि मां शरणागतम्।
इत्युक्त्वा लेपयेद् गन्धं सर्वागे पूजकोत्तमः।।३०।।
जगद्धात्री नतसतुम्यं नमस्ते भद्रदायिनी।
दिव्यचंदनमंगे ते दादा परमेश्वारि[२१]।।३१।।
हिताय जगतां मातस्तथा तापोशान्तये।

अंगीकुरु कुंरगाक्षि अपराधं क्षमस्व मे।।३२।।
बलं पुरुषसूक्तेन श्रीसेतेन रमापतिम्।
देवसूतेन तां भद्रां सुदर्शनमारिन्दम।।३३।।
लक्ष्मीं च माधवं विश्वाधात्रीं च स्व–स्ममन्त्रतः।
लेपयेच्चन्दनैर्दिव्येर्गन्धव्यापदिगम्बरैः।।३४।।
परिधास्येति मन्त्रेण गन्धं[२२] संस्कृत्य दापयेत्।
यशसामेति मनुना चौत्तरीयं समर्पयेत्।।३५।।
श्रीश्चत इदति मन्त्रो पुष्पं दयानमनारेमम्।
अनेनैव तु मन्त्रैण प्रकुर्य्याद्दलकार्पणम्।।३६।।
अलंकरणकं मन्त्रमुक्त्वालंकारमर्पयेत्।
यद्यशेति शिरे चूलं च हरेति गले स्रजम्।।३७।।
एतत्सर्व महीनाथ संस्कृत्य वीक्षणादिभिः।
दद्यात्परमया मक्त्या परमेशं परात्परम्।।३८।।
संस्कारव्यतिरेकेण किंचितद् गृहणाति नौ हरिम्।
अतः परं हरेः पार्श्वे गोपालं मदनाभिधम्।।३६।।
कृष्णं च न्यस्य राम तु बलपार्श्वेननिवेशयेत्।
ततौ मध्याह्नयजनं कृत्वा वन्दापयेत् क्रमात्।।४०।।
रौहिण्येय नमस्तुभ्यं रेवतीरमणे प्रभे।
राक्षसानां परं जेता रामं तुम्यं नमो नमः।।४१।।
जलक्रीडार्थमवैनं रामपमाज्ञापय क्षणेः।
इत्युक्त्वा बलदेवंकानमाल्सयमानीनय साहरद्।।४२।।
दद्याद्रामायस चं पुनः प्रार्थयेज्जगदीश्वरम्
क्रीडानन्दसाम्भोधि चारु चन्द्रनिभानन।४३।
जगत्पते नमस्तुभ्यं लगदाह्लादकारक।
कृष्णं[२३] मदनगोपालं लक्ष्मीं पृथ्वीं तथा प्रभे।।४४।।
आज्ञापय सुराधीश जलक्रीडाकृते हरे।
इत्येतां प्रार्थनामुक्त्वा माल्यमादाय चादरात्।।४५।।
प्रत्यर्च्चानां गले दद्यदाारुपं पृथक् पृथक्।
पुनश्च प्रार्थयेद्देवानर्चकः[२४] क्षितिपोत्तम।।४६।
बलभद्र नमस्तुभ्यं नमस्ते लांगलायुध।
आज्ञापय प्रलम्बारे रथनिर्माणहेतवे।।४७।।
नन्दीघोष रथारुढ चक्रायुध नमोऽस्तु ते।
नीलाचलपतेदेव नित्वं तुम्यं नमो नमः।।४८।।

आज्ञापय जगन्नाथ[२५] जगदानन्दवर्द्ध न।
रथस्य निर्मितं कर्तु जगत्पावनहेतवे।।४९।।
भद्रे देवि जगद्धात्रि सृष्टिस्थितिलयाश्रयै।
आज्ञापय सुरेशानि निमाणाथ रथस्य वै।।५०।।
इति विज्ञाप्य नृपते देवेभ्यो माल्यकत्रयम्।
क्रमादानीय सहसा ततः प्रासादमुत्तमम्।।५१।।
प्रत्यच्चार्स्ता शमयित्वा विमानस्थाः परन्तप।
पंचेशानां च पार्श्वस्य प्रतिमास्ता विमानगाः[२६]।।५२।।
सहोतवतया सर्वा आनेयश्च जलोत्सवे।
वनयागविधानेन वनादानीय यानि वै।।५३।।
स्थितानि तानि काष्ठानि पूर्वजरप्रदेशत५।
काष्ठैस्त्स्च विंशानाथ रथनिर्माणहेतवे।।५४।।
शिल्पिभ्यः प्रददौ माल्यं[२७] काष्ठान् दातु[२८] यथक्रमम्।
ततो गच्छेत्सुरश्रेष्ठ मोत्सवतया पुनः।।५५।।
ततौ सरोपरस्सास्य मध्ये कुर्ययानमहाशयम्।
नानामण्डालसंयुक्तं मण्डपं चारु शोभनम्।।५६।।
ततो नौकायुग्मे लम्षे दारवं मण्डपं चरत्।।
सम्पादयेत्परं पीठं यथायोग्यं च दारुभिः।।५७।।
कृत्रिमामिश्च रम्याभिः पुत्रिकाभिर्मनोहरम्।
वितानैत्तमसंयुक्तं चामरैः समलंकृत[२९]।।५८।।
रमणीयतरं कुय्र्यानैकायानं महीपते।
तादृशे दिव्यानेऽसिमनफ नौकारुपे महोदये।।५९।।
प्रत्यच्चार्स्ताः समस्ताश्च वासयेत्सु महोत्सवे[३०]।
गीते नृत्ये च पुरतो जायमाने मुहुर्मुहुः।।६०।।
भ्रामयेदेकवारं च तत्रस्था जलमण्डपे।
तत्र नीतवा च प्रत्यचर्चाः कुण्डेषु विविधेषु च।।६१।।
गन्धपुष्पादकैः पुर्ण्णेष्वुषु ता वासयेत् पृथक्।
रामकृष्णौ नयसेत्तावेदकत्र कुत्रचितत्पद।।६२।।
लक्ष्मीं मदनगोपालं धरामेकत्र वासयेत्।
महोशानां तु प्रत्यर्च्चाः पृथगेकत्र वासयेत्।।६३।।
गीतं नृत्यं विधयाथ नानान[३१]यैर्मनोहरम्।
महोत्सवं समाचय्र्य प्रहरं गनधवारिषु।।६४।।
तत्सताः प्रतिमाः दिव्याः संप्रौच्छ्य नववासया।

वस्त्रमालाप्रणं कृत्वा पूजयेच्चनन्दनादिना।।६५।।
अग्निशर्मा ततौ भूप वन्दापयति सादरम्।
चतुर्दण्डावषिष्टेऽस्मिन् दिने तावन्नराधिप।।६६।।
दिव्यामब्राणि माल्यानि दियालंकारणानि च।
गन्धपुष्पाणि दत्वाऽथ भूषयेतः पृथक् पृथक्।।६७।
गाधूमचूर्णनिचयमामिक्षासंगतः पुनः।
तत्र गन्धरसं[32] क्षिप्त्वा धुतेन पाचयेद् द्विजः।।६८।।
नानाविधानि पूपानि कारयेत् भक्तिभावतः।
शर्करामिधयक्तानि धुतेन जर्जराणि च।।६६।।
पक्वाम्रफलसंधा तं सुपक्वदलीफलम्।
नरीकेलफलानां च लाजानां च विकारजम्।।७०।।
तादृशं वरनैयेद्यं सम्पाद्य चन्दनादिना।
पूजयेत्परया मक्त्या तत्र ताः प्रतिमाः शुभाः।।७१।।
विष्णुप्रतिकृतिस्तावद्गोत्रायाश्च शिरस्तथा।
स्पृष्ट स्मृष्ट दोषेऽपि प्रसादेषु[33] न विद्यते।।७२।।
विज्ञानं तत्र मा कार्य्य कुय्याच्चैन्नारकी भवेत्।
तस्मात्तदे् लक्षणं[34] कार्य्य प्राप्तमात्रेण भूपते।।७३।।
भक्षणात्सर्वपापेभ्यो मुच्यते नात्र संशयः।
पूजान्ते नृपशादूल ताम्बूलानि समर्पयेत्।।७४।।
पूजान्ते नृपशादूल ताम्बूलानि समर्पयेत्।।७४।।
गीतं नृत्यं पुरः कुय्र्यातौकापीठसत्तमे।
वासयित्वा पुनस्ताः ताः प्रतिमाः शुभदर्शनाः।।७५।।
जलेऽस्मिन् भ्रामयंद् भूव त्रिवारं च शनैः शनैः।
स्वे स्वे विमाने ताः सर्वाः समारौऽप्य ततः परम्।।७६।।
मागे महोत्सवतया स्वपदेषु निवेशयेत्।
देवानां गन्धलेपं च यज्जलभ्रमणं तथा।।७७।।
जलमण्डपपूजां च मार्गे वैद्यां गातपते।
पश्यन्ति भ्रमतौ भक्त्या तेषां स्यात्पापसंक्षयः।।७८।।
सन्ततिः वर्द्धते तेषां शेषे वैकुण्ठवासिता।
ततस्तस्य महाविष्णोः सायं पुजावसानतः।।७६।।
देवानांगतौ माल्यं वस्त्रालंकारसंचयम्।
समुर्च्चाय्र्यार्पयेद्दिव्यं[35] पंचवर्ण्ण विचित्रतम्।।८०।।
सूक्षमवसनसंधातं परिधाप्य[36] ततो नृप।

सूक्ष्मो वस्त्रौत्तरीयं च जातीकुसुममाल्यकम्।।८१।।
दीपात्सादनकं कृत्वा वीजयेद्दण्डयुग्मतः।
व्यजनं तत्पट्टैर्दृढीकृत्य विनिर्मितम्।८३।।
पारितः पीतवस्त्रेण दृढीभूतं च तद्भावेत्।८४।।
एतादृग्भिश्च व्यजनैर्वीजयेद्देवसत्तमम्।
गीतं तावत् भवेद्रम्यां काले तस्मिन्नकौ व्रजेत्।।८५।।
द्वितीयावरणं भूप निःशबदं भविता तदा।
एतत्तृतीयाद्दिनतौ ज्येष्ठशुक्लचतुर्दशीम्[३८]।।८६।।
व्याप्य नीतिरियं राजन् कर्तव्यानुदिनं महेः।
जलभ्रमणयात्रां[३९] तामेकविंशतिमिर्दिनेः।।८७।।
कृय्यात्तद् विंशतिदिने सायंकाले परन्तप।
पुष्पकरिण्यां च परितः प्रतिकोणं च मध्यतः।
सप्त सप्त भ्रमिः काय्र्या जायमाने महोत्सवे।।८८।।
एकविंशतिसंस्थाते दिन ताः प्रतिमाः पुनः।
भ्रामचित्वेकमारस्तु ततस्तन्मण्डपोत्तमो।।८९।।
वन्दापययान्नं कृत्वा तु हरिद्रादेकतः पुनः।
यन्त्रेण वेणुजातेन पातयेत् भक्तितो हरिम्।।९०।।
वात्रयं तथा कृत्वा मागे चानीय पूर्व वतं।
महोत्सवैस्ततः तास्ताः स्वपदे विनिवेशयेत्।।९१।।
प्रातः पूजनकर्मान्ते व्यजनैः परिवीजनम्।
तथा चन्दनलेपं च वस्त्रमाल्यार्पणं तथा।।९२।।
कृत्वा ततश्च प्रत्यजर्ज्चाः समीपै स्थापयेत्तदा[४०]।
क्षालितान्नं च नैवेद्यंप्रपानकचसैः समम्।।९३।।
कृत्वा पूपभरैः सार्द्ध शकाम्लसहितं तथा।
पंचोपचारविधिना पूजयेत्वरमेश्वरम[४१]।।९४।।
पूर्वाक्तविधिना भूप प्रत्यर्च्चोक्ताः मनोरमाः।
जलक्रीडार्थमानन्दान्नश्येतत्र महोत्सवैः।।९५।।
सायं पूजकर्मान्ते कुय्याद् व्यंजनवीजनम्।
अष्टभागे जले भेप शर्करा ऋतुभागतः।।९६।।
द्रुग्धसारं द्विभागं च तैः कुर्य्यात्सुप्रपानकम्।
सोऽपि विष्णुः प्रसन्नात्म सर्वान् कामान् प्रपूरयेत्।।९७।।
आसनादिं विद्यायाथ पूजां कृत्वा समर्पयेत्।।९८।।

इन्द्रद्युम्न उवाच

ब्रह्मन देव विज्ञानेन वनयागविधिर्भवेत्।
विष्णेर्दारुमये देहे कथं तिष्ठेच्च चन्दनम्।।९९।।
एतत् पक्षद्वयं बूहि यउि ते मय्यनुग्रहः।।१००।।

ब्रह्मोवाच

साधु साधु महीपाल कर्मज्ञोऽसि[४२] महीतले[४३]।।
अतस्त्वां वच्मि तद्गुह्यं शृणु मतः समाहितः।।१०१।।
चैत्रकृष्णतृतीयायां वनयोगविधिं चरेत्
आचार्य्यः प्रथमं तावद् वयणस्य च पूजनम्।।१०२।।
कृत्वा तमग्निशर्माणं स कल्पयति मन्त्रवित्।
अग्निशर्मा ततः कुय्यादाचार्य्यस्य वृतिं ।तथा।।१०३।।
ब्रह्मणस्य वृतिं कुर्यात् स्वस्तिवाचपपूर्विकाम्[४४]।
ब्रह्माचार्यो ततः शिल्पित्यूहं च शस्त्रपाणिनम्[४५]।।१०४।।
प्रेषयेतां च ते सर्वे वनमध्यगतां दृण्म्[४६]।
वैष्णवाग्निविधानेन होमयेदर्चकः पुनः।।१०५।।
धृतैः सभिदिमश्चरुभिः शतमष्टोत्तरं हुनेत्।
प्रत्येकं मन्त्रराजेन ततः पूर्ण्णहुतं चरेत्।।१०६।।
ततो गणेशं सम्पूज्य बलिं दद्याद् विचक्षणः।
दिक्पालेमयस्तथा दद्याद् लिं वनस्पतिं तथा।।१०७।।
क्षेत्रपालं पशुंपतिं[४७] प्रति दद्यात् बलिं क्रमात्।
शस्त्राभिः संस्कृतिंकृत्वा वृक्षच्छेदनमाचरेत् ।१०८।।
तत्कंर्मणि नियोज्याशु बर्द्धकि व्रजमुत्तमम्।
आगच्छेदर्चकः सोऽयं ब्रह्मा च सदनं प्रति।।१०९।।
तादृशैः काष्ठजालैश्च रथत्रयविनिर्मितम्[४८]।
कारयेत्सवं नृपश्रेष्ठ भक्त्या परमया तदा।।११०।।
असम्भवे तु वैशाखे शुक्लपक्षे शुभे दिने।
तृतीयायामयं तावत्कर्तव्यो विधिरेव च।।१११।।
प्रासदपूर्वे काष्ठानि बनादानीय यत्नतः।
ततः शालां विधायाध बलायागविधिं तथा।।११२।।
कृत्वा रथत्रयस्यापि निर्मितौ नृपसत्तमम्।
नियोजयेनमहानन्दाद् वर्द्धक्युत्कटमुत्तमम्।।११३।।
एतद्विधिं विना भूप रथानां धटने कृते।
विघ्नो भवेद्रद्यानां च मंगः कृत्र[४९] च कुत्रचित्।।११४।।

इदानीं नृपशार्दूल विष्णे रथ्यानि[५०] यानि वे।
पुष्टानिस्युः यथा दिव्यैश्चन्दनैस्तच्छणुष्व मे।।११५।।
विद्यापतिकुले जातास्तथा विश्वावसौः कुले।
ते सर्वे पट्टवस्त्रैश्च विष्णेरंगानि सर्वशः।।११६।।
शिरोगण्डप्रदेशं च दृढं चित्रतरं नृप।
कलयेयुस्तथ वृक्षः पृष्ठभागं मनौरमम्।।११७।।
कर्पूरवाविरणा चाथ त्रीमुखब्जं प्रमाजयेत्।
पंचामृतेन स्नपनं हरेः कार्य्य प्रयत्नतः।।११८।।
श्वेतपट्टगुणैरेवं युग्मं युग्मं च मासतः।
कुर्य्यादविननाथेश ह्यष्टम्यां च तिथौ पुनः।।११६।।
कुर्य्यादुत्सवमेतस्या नीलशैलस्य भूपते[५१]।।
तत्पूर्वदिनतः कुम्भोत्करस्य जलपूरणम्।१२०।।
कर्पूरचन्छने क्षिप्य वस्त्राच्छादनमाचरेत्।
ततो गन्धं च पुष्पं च पातयित्वा घटोत्कारान्।।१२१।।
अष्टोत्तरशतानेव अधिवासतया न्यसेत्।
प्रातः पूजानसाने वै देवागे स्थापयेद् घटान्।।१२२।।
महास्नानस्य वस्तूनि चासनार्ध चामचरेत्।
संस्कृत्य स्नापयेयुस्ते पूर्ववदर्च्चकाः प्रभून।।१२३।।
नवांशुकेन संप्रोच्छ्य चतुःसमविलेपनम।
नवीनवस्त्रालंकारनिचयार्पणमाचरेत्।।१२४।।
मध्याह्नपूजां कृत्वाध बलिं दद्याच्च बह्यतः।
वन्दापनां ततः कुर्य्यान्महामक्त्या महीपते।।१२५।।
प्रातःपूजां समाचर्य्य द्वादश्यां च हरेः पुनः।
महास्नानं विद्यातव्यं चतुःसमविलेपनम्।।१२६।।
नवीनवस्त्रालंकारैभूषयित्वा ततः परम्।
मध्याह्नपूजां विधिवत् कृत्वा वन्दापयेततः।।१२७।।
चतुर्दश्यां महास्नानं कृत्वा चन्दनलेपनम्।
नवीनवस्त्रालंकारोत्तम माल्यभरैः हरिम्।।१२८।।
भूषयित्वा ततः सायं पूजा कार्यया प्रयत्नतः।
तदन्ते नृसिंहाक्ष्यां प्रत्यर्च्चा निकटे न्यसेत्।।१२६।।
जगदीशस्य तस्यापि प्रार्धयेच्च ततौ हरिम्।
विष्णौ निरंजन श्रीमान् दैत्यानतक सुरोत्तम।।१३०।।
नमस्ते करुणासिन्धौ जगद्बन्धे नमौ नमः।

आज्ञापय तु प्रत्यर्च्चा नृसिंहजनमने प्रभोः।।१३१।।
इत्याज्ञापय जगन्नाथं माल्यमानीय तद्गले।
दत्वा महोत्सवतया नृसिंहाग्रे निवेशयेत्।।१३२।।
महास्नानं च पूजां च वन्दापममध्चरेत्।
स्वपदे तां नृसिंहाचयां प्रत्यंर्च्चा स्थापयेत्ततः।१३३।।
ज्येष्ठस्य कृष्णैकादश्यां दर्शे षष्ठीदिने श्थिते।
चन्दनांगार्चनत्पूर्दृ प्रत्यर्च्चा न्यस्य पूजयेत्।।१३४।।
आज्ञापय जगन्नाथ नानाकौतुककारक।
जलक्रीडारसं भेक्तुं सश्रीक कृष्णमंजसा।।१३५।।
लक्ष्मीं च सहितं कृष्णमाज्ञामाल्यां चितां नृप।
महोत्सवैः समानीय जलमध्यं निवेशयेत्।।१३६।।
अग्निशर्माऽथ तेनैव यन्त्रेण वंशजेन तु।
कर्पूरोदकमनन्दान्निक्षिपेच्च शेनैः शनैः।।१३७।।
गीतनृत्यैः पुरः कृत्वा पूजयेच्चन्दनादिना।
वन्दापयेततो नीत्वा स्पदउे विनिवेशयेत्।।१३८।।

सूत उवाच

ऋषयो ब्रह्मवादिन्यौ भवतां पुरतोऽधुना।
भक्तिचितं[५२] पुरा विप्रा विधिना वर्णितं यत्।।१३९।।
नीलाचलेऽत्राखिल[५३] लोकसारे
मुक्तिप्रद केशवमिनदवस्त्रम्[५४]।
पश्यन्ति ये वै विधिवच्च भक्त्या।
ते यान्ति विप्राः पदमव्ययं ततो।।१४०।।

इति श्रीसूतसंहितायां नीलाद्रिमहोदये सूतशौनकादिमुनिसम्वादे[५५]
षटत्रिंशत्तमौऽध्यायः।

FOOTNOTES

१ R सर्वकामफलप्रदां। २ K, R परमेश्वरम।
After sl. 4a, the following verse is present in K, M, R. U -

यथायोग्यं विनिक्षिप्य चन्द्राकृति च भूपते।

३ U यन्त्र। ४ K वन्दापनमथाचरेत्, U वन्दापनं समाचरेत्। ५ K, M द्वितीयां, U द्वितीयायां। ६ K, M, R पद्मत्रयं कृत्वा। ७ K, R मालिका। ८ K, M, R, U तत्। ९ M चीलपटयु। १० K, U पर्ण्ण। ११ R, U तीयायां विधीयत। sl. 19b is absent in

M, R, U. १२ U देवां स्तथा। १३ K, U तत्तु संनयसेत। १४ K, R दलान्यापि। १५ K संसकुर्याद् वीक्षणादिना। १६K, U बलदेवं। १७ K, M, R, U महोदयं। Sl. 30 and 31 are absent in R. १८ M, U जगदीश्वरि। Sl. 32a is absent in R. १९ K, U वस्त्रं। २० M तृष्णं। २१ U नर्च्चकाः। २२ K, U रमाकान्त। २३ K, R विमानतः। २४ in K माल्य is absent। २५ K वस्त्रादिश्च। २६ K. M. R, U कृतं। २७ R महोत्सवैः। २८ U वादे २९ K, U दुग्धरसं। ३० R प्रतिमाण्ड। ३१ K. R. U मक्षणं। ३२ U सुत्तर्या। ३३ R परिधान। ३४ K, R, U तद्वीजनं पट्ट पट्टै। ३५ U चतुर्दशी। ३६ K, M, R यात्रां।

After Sl. 91A, the following verse is present in K -

मोदकैः पूजयेद्देवान् नौकायां भ्रामयेच्च तान्।

३७ K, U स्थापयेत्तदा। ३८ K, M, R, U पुरुषोत्तमं।

After Sl. 97A, the following verse is present in K, M, R, U -

तत्र कर्पूरधूलीभिः सेचनं रचयन्नरः।
काले तस्मिनृन्पश्रेष्ठ प्रपानकमनुमुत्तमम्।
तादृशं प्रचुरं दिव्यं दयात्तद्विष्णवे मुदा।
अस्मिन् काले यदा विष्णुं प्रति दद्यात् प्रपानकम्।

३९ U कार्य। ४० U धरातले। ४१ K, R पूर्णकम्। ४२ M पाणिकं। ४३ K, M, R, U दुतं। ४४ K गणपतिं। ४५ K, R विनिर्मितं। Sl. 113b is absent in M. ४६ U स्यात् कुत्र। ४७ K, R, U रंगानि। ४८ K. U भूतले। ४९ U तत्कीर्तित, K, M तत् कीर्तनं। ५० M नीलाचलेऽत्राखिल। ५१ K, M, U मिन्दुवक्त्रं। ५२ K मुनिसम्वादे चन्दनयात्राविधिकथनं नाम षट्त्रिंशतमोऽध्यायः।

सप्तत्रिंशोऽध्यायः

ब्रह्मोवाच

तिथै दशम्यां शुक्लायां सायं पूजा समापने।
जगदीशान्तिकं नीत्वा प्रतयर्चा कृष्णसंज्ञकम्।।१।।
नमस्ते देव देवेश निर्गुणस्त्वं परं पुमान्।
सगुणं त्वां परं ब्रह्म भविष्यामि कृपानिधे।।२।।
राजराजेन्द्र संख्याताभिषेकाय महाप्रभो।
कृध्माज्ञापय क्षिप्रमपराधान् क्षमस्व मे।।३।।
इत्युक्त्वा देव देवांगानमाल्यं कृष्णगले न्यसेत्।
छत्रचामरघण्टादि स्फुरदुत्सवसंयुतम्।४।।
कृष्णं पुनः समानीय कुत्रचित् वासयेत्पदे।
दक्षिणाशां जवतया ततो दूतः समागतः।।५।।
विदर्भदेशे देवो नानानृप गणांचिते।
रुविमण्या रूपवत्याश्च जायते तु स्वयम्बरः।।६।।
दूतोऽसावदश्चिते चिन्तयेदतिभक्तितः।
ततः सोऽप्यर्चको भूप तं दूतामिति संवदेत्।।७।।
दूताकर्ण्णय कृष्णस्य यथाज्ञाजनि साम्प्रतम्।
एषा च मत्प्रिया लक्ष्मीः सर्वदा भद्धतिः स्थिता।।८।।
अहं देवो यथा जातस्तधा देवीति सा भवेत।
मानुषे मानुषीस्यास्या द्रामे सीता वभूव सा।।९।।
इदानीं कृष्णरूपस्य प्रति द्वारा क्षितौ मम।
जाता स्त्री रूक्मिणी नाम्नी सा सम्प्रति निबोधते।।१०।।
तस्याश्च केन वा कार्यः स्वयम्बरमहोत्सवः।
अज्ञः स भीष्मभूपालो मां न जानाति चाव्ययम्।।११।।
ततः सर्वाश्च भूपालनाभिभूय पराक्रमैः।
आनीयरुक्मिणी तां तु गृह्योक्तविधिना रमाम्।।१२।।
ग्रहिष्यामि पूनर्दूतं कृष्णाज्ञामिति तं वदेत्।
इत्युक्त्वा पूजाको भप नन्दिघोषरथं परम्।।१३।।
सुचारु सैब्य सुगीव मेघपुष्पवालहकैः।
हेयर्युतं शस्त्रयुतं वीरबाह्यनिनादितम्।।१४।।
आनयत् क्षिप्रमिति तं दारुकं प्रति संवदेत्।
तादृग्रथे वासयित्वा प्रासादं भ्रामयेतः।।१५।।

विजिताः सर्वभूपालाः विक्रमैरिति चिनतयेत्।
राज राजेन्द्रभावेन त्वभिषेकं समाचरेत्।।१६।।
पंचामृतेन संस्नाप्य पजयेच्चन्दनादिना।
ततो वन्दापनां कृत्वा स्वपदे विनिवेशयेत्।।१७।।
एकादश्यां तिथै प्रातः पूजायानतो हरिः।
पार्श्व कृष्णं समानीय प्रार्थयेदर्चकः प्रभुम्।।१८।।
नमो नीलनृसिंहाय विष्णो ब्रह्मन् रमपापते।
इदानीं रुक्मिणीष्णिेहृत्वा परिणयिष्यति।।१९।।
विक्रमैर्दैवदेवेश कृष्धमाज्ञापय प्रभो।
आज्ञामालां समानीय श्रीकृष्णाय समर्पयेत्।।२०।।
वैनतेय पुरो देशे महोत्सवतया पुनः।
पल्यकोपरि संन्यस्य द्वारपालान्तिके नृप।।२१।।
सभास्थितया किंचित् वासयित्वार्च्चकः पुनः।
रुक्मिणीप्रेषितां दूतहस्तादानीय पत्रिकम्।।२२।।
पठित्वावासयेत्कृष्णं वासयित्वा रथे पुनः।
विमलान्तिकमासाद्य स्थापयेदुत्सवं बिना।।२३।।
अभ्यर्च्य मिलां देवीमागतां रुक्मिणीं प्रभुः।
हसतमुद्धत्य सहसा रथे स्वांके निवेशयेत्।।२४।।
अर्चकस्थितिसंचिन्त्य माहेत्सवतया रथे।
कन्यां नयन्तं श्रीकृष्णं प्रासादं भ्रमयेततः।।२५।।
प्रासादपूर्वभागो तु मण्डपे चारुमझिडते।
तत्र मध्ये सुपय्र्यकेरुविमण्या सहितं हरिम्।।२६।।
वासयेतत्र वैकुय्र्यानमहोत्सवमनुत्तमम्।
ततः कुर्यात् प्रभोरगे मुदा चन्दनलेपनम्।
गोविन्दप्रतिमा तावत्समीपे न्यस्य भक्तितः।
चन्दनांगार्चनं कृत्वा प्रार्थदर्चकः पुनः।।२८।।
जगदीश नमस्तेस्तु नानाक्रीडारतः स्वयम।
भक्तानां रक्षणार्थय नाशय च दुरात्मनाम्।।२९।।
जललीलाकृते श्रीमान् गोविन्दं परमेश्वरम्।
आज्ञापय महाबाहो रमाकान्त नमोस्तु ते।।३०।।
ततः[1] सम्प्राथ्र्य भूपाल दद्यादाज्ञास्रजं गले।
उत्सवेस्तं समानीय पूर्ववज्ज्लमण्डपे ।।३१।।
जलमध्येपि संस्थाप्य पूजयेच्चन्दनादिना।

वन्दापनां समाप्येन स्वपदे स्थापयेत्ततः।।३२।।
तिक्त[2] प्रपानकाय्र्यन्ते महास्नानविधिं हरेः।
सर्वांगे लेपनं कुय्र्यान्नवीनांशुकधारणम्।।३३।।
कारयित्वा तथा माल्यै भूणाभिः परिभूषयेत्।
सायंकालसमर्चान्ते रुक्मिणीकृष्णयोः पुरः।।३४।।
कलशं स्थापयित्वाऽसोः पपूजको वरुणं यजेत्।
परीक्षकः पुरस्तिष्ठेत्सावधानतया मुदा।।३५।।
महोत्वेषु जातेषु गीतनृत्यादिषु स्फुटम्।
अग्निशर्मा च संकल्पं ततः कुय्र्यात् प्रयत्नतः।।३६।
आदो कृत्वा देशकालवाक्यं रुक्मिणीकृष्णयोः३।
करिष्येऽहं द्विजद्वारा कर्म वैवाहिकं शुभम्।।३७।।
इति संकलपमाचय्र्यआचाय्र्या ब्राह्मणार्द्धतम्४।
कुय्र्याद्धदयमात्रेण कांस्यपात्रजलेन वै।।३८।।
धावयेत्[5] कृष्णचन्द्रस्य पादो कमलकोमलौ।
प्रीतये वासुदेवस्य श्रीमद्भागवतो हरेः।।३६।।
इत्युक्त्वा वितरेस्मे चासनाय कुशखय्६।
पादासनं तथैवार्ध्यमागमं गन्थपुष्पके।।४०।।
वन्दापनेन[7] मन्त्रेण वैवाहे कर्मणि प्रभो।
दशकेशरसंयुक्तं शुद्धसूक्ष्मांशुकद्वयम्।।४१।।
यज्ञापवीतसंयुक्तं मुद्रिकाकुण्डलान्वितम्।
गन्धपुष्पयुतं तत्तु नारिकेलफलान्वितम्८।।४२।
धृत्वा काय्र्ये देशकालवाक्यां कृत्वा सुसयंः।
यथाविधितया[9] क्षिप्रो[10] गोत्रमुच्चार्य तत्त्वतं[11]।।४३।।
तदस्त्रयुगलं दिव्यं कृरूणहस्ते समर्पयेत्।
कृतोऽस्मीति वदन् कृष्ण आचार्य इति भावयेत्।।४४।।
तन्न्यस्य कृष्धपार्श्वेऽपि किंचितद् गन्धं ततः करे।
घर्षयित्वा तदाऽचाय्र्यः प्राणापानादिकं पठन्।।४५।।
कृष्णस्येन्द्रिनिकरं संस्पुच्छेच्च यथाविधि।
सुरक्षेतित[12] मन्त्रेण ललाटे च्नदनं न्सनेत्।।४६।।
परिधास्येति मन्त्रेण वस्त्रं दद्यान्मधु द्विपे।
यज्ञापवीतमनुना यज्ञसूत्रं समर्पयेत्।।४७।।
यशसामेति सबदयदुत्तरीयं मनोरमम्।
याहार[13] हति मन्त्रेण मालां दद्याद् द्विजोत्तमः।।४८।।

यदयसोऽप्सरसां मन्त्रमुक्त्वा माल्यं शिरे न्यसेत्।
अलंकरणमिमं मन्त्रमुक्तालंकारमर्पयेत्।।४६।।
ततः शंखजलेः पूर्ण्ण[१४] कृत्वातत्क्रमुकद्वयम्।
सुदुर्बाबदरीपत्रयुक्तं[१५] गन्धं च पुष्पकम्।।५०।।
पातयित्वा ततः सत्यवाक्यमुक्त्वा जलैः समम्।
क्रमकद्वयमानन्दाद्धस्ते कृष्णस्य दापयेत्।।५१।।
दत्वाचार्य्यस्तत कुय्र्यात्पुण्याहवाचमं शुभम्।
अग्निशर्मा ततो गन्थं दिव्यां दामनकस्रजम्।।५२।।
पीतवस्त्रद्वयं तावत् श्रीकृष्णार्पदेयथ।
वन्दापनां च विधिवद् गन्धादि वासनाय तु।।५३।।
कुय्याद् वरुणपूजां च पुण्याहं वाचयेत्ततः।।५४।।
गन्धानुलेपनं कुय्र्याद् कृत्णांगे तन्महोत्सवं।
एभिर्मन्त्रेश्च रुक्मिण्या अंगे तल्लेपनं चरेत्।।५५।।
वेदाश्च पूर्वदिग्भागे गर्भेऽष्टनागपूजनम्।
कृत्वा तत्रेव दण्डं वै नकं[१६] गन्धवारिणा।।५६।।
धौत कृत्वा स्थपयेच्च स्थिरीभव वदन्निति[१७]।
पृथभिर्वेति मनुना तत्रैव मृत्तिकां क्षिपेत्।।५७।।
क्षिपेत्पंच द्रीहिश्चैव दण्डमूले द्विजोत्तम।
मूलकगन्ध[१८] मनुना हरिद्रां लेपयेत्ततः।।५८।।
रुक्मिणीकृष्णसंयोरंगे विवाहोतसक्कर्मणि।
ततो मातृणार्चाच वसोद्धारं[१९] ततः परम्[२०]।।५६।।
वेद्याश्चतुष्कोणं कादेराचार्य्यस्तत्र[२१] संस्थिताः।
आशीशिवशानो[२२] वृषभमिति मन्त्रं जपन्द्य पुनः।।६०।।
सूत्रवेष्टनमकृय्र्यात्सप्तवरमतः[२४] परम्।
तत्सूत्रं त्रिगुणं कृत्वा हरिद्राक्त ततश्चरत्।।६१।।
बदरीपत्रसंयुक्ताः सप्तदूर्वा मनोरमाः।
एवं सप्तविधां ग्रन्थिं कुर्यात्तत्र गुणे द्विजः।।६२.।।
यर्थेन्दस्येन्द्राणि मनुमुक्त्वा तत्सूत्रमुत्तमम्।
कृष्णचन्द्रकराम्भोजमणिवन्धे तु बध्नीयात्।।६३।।
एवं कोतुकसूत्रं तदुविमण्याश्च करेऽर्पयेत्।
नारिकेलजंलैश्चाथ कृष्णपादो प्रधोसतयेत्।।६४।।
ततः साधु भवानास्तमित्युक्त्वाचार्य्यसत्तमः।
दद्यात्पुष्पांजलिं कृष्णं वदन्तमिति भावयेत्।

षडर्ध्ययजनायेव कुर्यात् पुण्यांहवाचनम्।।६६।
कुशत्रयं कृतं पूतं विष्टरं स्थाषयेत्पुरः।
पाद्य गन्धजलं रक्षेतपुनर्विष्टरमेव च।।६७।।
समगर्ध्य[27] तथैवात्र रक्षेच्चाचमनीयकम्।
मधुपर्कं तथा न्यस्य मूलमन्त्रेण ताः स्पृशेत्।।६८।।
वर्ष्मोऽसीति समुच्चार्य दद्याद् विष्टरमुत्तमम्।
विराजोदोह मनुना पाद्यं दद्यान्मुरारये।।६९।।
पुनर्विष्टरमाचार्य्यः पूववद्दापयेन्मुदा।
समुद्रं वः प्रहिण्योमीत्यक्त्वार्ध्य वितरेतद् बुधः।।७०।।
आमार्गामिति मन्त्रेण दद्यादाच मनीयकम्।
यन्मधुनो मधुना तन्मधुपर्क सपर्मयेत्[28]।।७१।।
पूर्ववस्त्रयुगं चापि धृत्वा वाक्यं यमुच्चरन्।
कृष्णं समर्पयेद्धीमान् यथाविधि द्विजोत्तमः।।७२।।
जरां गच्छेति मन्त्रेण पीतवस्त्रसमर्पणम्।
याकृन्तमिति मन्त्रेण रुक्मिणये चोत्तरीयकम्।।७३।।
कृष्णांगाश्च बहिष्कृत्य मालां योपवीतकम्[29]।
दत्त्वा गन्धं च सं दद्याद् गन्धद्वारेण मन्त्रतः।।७४।।
पुष्पं च श्रीरश्त इति रुक्म्ण्ये वितरेद् द्विजः[30]।
मूलमन्त्रेण मुकुटै कृष्णस्य शिरसि न्यसेत्।।७५।।
ततस्तां रुक्मिणीं देवमग्रेऽपि वासयेत्तदा।
समंजतु मनुं जप्त्वा रुक्मिणीकृष्णयोर्मिथः।।७६।।
कारयेद्दक्षलोकं[31] तत्पश्यतां सर्वकामदाम्।
दूर्वाक्षतादि दिव्यानि तयोः शिरसि संन्यसेत्७७।।
ततः शंखेऽपि नीराणि दूर्वाश्च बदरीदलमें।
गन्धपूर्व च क्रमुकद्वयं[32] संक्षिप्य संदधत्।।७८।।
दानवाक्यं सं[33] च तदा ततो गोत्राणि कथ्यते।
कात्यायनसगोत्रश्च[34] गोत्रिश्च मुनिभिः स्मृतः।।७९।
पूर्व किलकीर्ण्णशब्द कात्यायनमतः परम्।
विश्वामित्रपदं योज्यं क्रमात्तत्पूर्ववत्[35] स्मृतः।।८०।।
ततो यद्यरथः श्रीमान् सूरसेनो महातपाः।
वासुदेववश्च कृष्धस्य क्रमान्ते प्रवदेत्सुधीः।
श्रीकोण्डिन्यसगोत्राया रुक्मिण्याश्च महीपते।
मैत्रवरुणकोण्डिन्य वशिष्ठप्रवरां द्विजः[37]।

पूर्वपूरुषनामानि श्रृणु तस्याश्च कोतुकात्।।८२।।
कोण्डिन्य देवशर्मा च विदर्भदेवकर्मकः।
भीषमदेवक तेषां च क्रमेणेव वदेतपुनः।।८३।।
प्रपोत्रप्पोत्री पुत्रीत्वं कनयाश्च वदेत्तदा।
त्रिवारमेवं संजय रुक्म्गिणीहस्तमुत्तमम्।।८४।।
कृष्णहस्ते समर्प्याथ शंखोदकसमन्वितम्।
तंगुवाकद्वयं[३९] दिव्यमानीय द्विजसत्तमः।।८५।।
तदुत्तरीयवस्त्रास्ते दृढग्रन्थिं च पातयेत्।
ततः कुशगुणेनैव रुक्मिणीकृष्णयोस्तयोः।।८६।।
बध्नीयाश्च करो तावत्पद्मशोभातितस्करो।
कृष्णस्तु कामगायत्रं पठित्वा च परिग्रहम्।।८७।।
कृ तबनानीति विप्रेन्द्रो भावयेत्सुसमाहितः।
गो भू हिण्यवस्त्राणि कृष्णं प्रति समर्प्य च।।८८।।
आचाय्र्याय परं दद्यात् तत्सर्व गोधनादिकम्।
यदेपीीति परं मन्त्रं पठित्वा सोऽर्चकः[४०] पुनः।।८६।।
रुक्मिण्याश्च तदा नाम लक्ष्मीति कल्पयेद् बुधः।
ततः करगतग्रन्थिं फेटयेत् भक्तितत्परः।।६०।।
त्पं गौरीति मनुं जप्त्वा रुक्मिणीं वामपार्श्वके।
श्रीकृष्णस्य वासयित्वा ततः कृष्णोत्तमांगतः।।६१।।
आनीय मुकुटं दिव्यं रुक्मिणयाः शिरसि न्यसेत्।
ततो गृह्योक्तविधिना होमं कुय्र्यात् प्रयत्नतः।।६२।।
एकविंशतिसंख्यातेः सोवर्ण्णैश्च वराटकैः।
द्युतलीलां परां कुय्र्यात्तयोश्च तत्वतरतः।।६३।।
आचाय्र्याय तदा दद्याद् सुवर्णन तु दक्षिणाम्।
प्रख्याल्यों ततः कुय्र्याच्चतुरसगं सुशोभनम्।।६४।।
हस्तद्वयप्रमाणेन मण्डलं तत्र कारयेत्।
तत्रास्तीर्य्य परं वस्त्रं नैवेद्यं तत्र कारयेत्।।६५।।
आम्राणां पनसानां च तालरम्भाफलानि च।
पयः पेटीचयं तत्र परमं च प्रपानकम्।।६६।।
नारीकेलशितालाजा दुग्धानां च विकारजम।
दिव्यं बहुतरं भक्त्या नैवेद्यं रचयेत्तदा।।६७।।
आचाय्र्यः परमं श्रीकृष्णाय समर्पयेत्।।६८।।
आचाय्र्यः परमं प्रीत्या पूजयेच्चन्दनादिना।

एवं विवाहसमये चैकपंक्तितया द्विजः।
नैवेद्यं परमं दद्यान्न दद्यादन्यवासरे।।१००।।
दद्याच्चेद्भगणेनाऽपि न प्रीतः सो जनार्दनः।
ताम्बुलं च समर्प्याथ कर्पूरोल्लासिवर्तिभिः ।।१०१।।
नीराजयेन्महानन्दात्परमानन्दवर्द्धनम्।
दूर्वाक्षतं पुनर्दत्वा सप्तवर्त्या नृपोत्तम।।१०२।।
पुनर्नीराजनं कुयूर्यात् भक्तिभावसमन्वितः।
ततो लक्ष्मीं पुरस्कृत्य कृत्वा कृष्णं तु पृष्ठतः।।१०३।।
जगदहशस्य पार्श्वेऽपि न्यसेत्तत्र महोत्सवैः।
ततश्चतुर्थकालार्च्चा कुय्र्याद् भूपतिसत्तम।।१०४।।
द्वादश्यां च तिथो प्रासर्निद्राभग जगत्पतेः।
कृत्वा रुक्मिणीं कृष्णं स्थापयेत्कूर्चमत्पदे[४१]।।१०५।।
तद्दिने तु स्थिते दण्डे काले कृष्ण च रुक्मिणीम्।
पुनर्नीत्वा हरेः पार्श्वे वासयित्वा तु पार्थयेत्।।१०६।
जगन्नाथ सुरश्रेष्ठ नमस्ते कमलापते।
आज्ञापय महाबाहो श्रीकृष्णं रुक्मिणीं प्रति।।१०७।।
विवाहोत्सवकाय्र्यान्ते भ्रमणाय सुलीलया।
इत्युक्त्वा च[४२] स्रजं दत्त्वा महोत्सवसमन्वितो।१०८।।
नयेत् यमेशनिकटं तौ तत्रापि समर्पयेत्।
यज्ञोपचारविधिनास[४३] कुर्याद् वन्दापनां ततः।।१०६।।
तौ तु तस्मात्समानीय महोत्सवतया नृप।
प्रासादं प्रति स्वस्थाने स्थापयेदतियत्नतः।।११०।।
ततस्तसयां चतुर्दश्चां रात्रो च घटिकात्ततः[४४]।
तयोश्च[४५] देवविधिना चतुर्थी कर्म संचरेत्।।१११।।
दण्डदूयावसिष्टयां क्षपायां नृपसत्तम।
रुक्मिणीकृष्णयोर्विष्णुर्ग्रन्थिं[४६] च परिफेयेत्।।११२।।
नयेत्कृष्णं जगन्नाथ निकटं स्नानमण्डपे।
स्थापयेज्जगदीशस्य वामपार्श्वस्थितं नृप।।११३।।
लक्ष्मयाश्च जगदीश्स्य परस्परविलोकलनम्।
आषाढमांसय शुक्ला पंचमी च यदा भवेत्।।११४।।
तत्पय्र्यनतं महीनाथ कारयेन्नेव यत्नतः।।११५।।

सूत उवाच

ब्रह्मणा तेन भूपस्य चेन्द्रद्युम्नश्च[४७], धीमतः[४८]।।

अग्रे प्रकीतिता:[४६] सर्वा: चात्रास्ता: जगतां पते:।।११६।।
प्रतिवर्ष प्रकुर्य्याच्च विष्णुप्रीणनवेतवे।
नीलाद्रो जगदीशस्य याखा एता: द्विजोत्तमा:।।११७।।
इन्द्रद्युम्नेन तेनेव विहिता ब्रह्मणेरिता:।
लेनयन्ति नृपा: ये ये ताश्च यात्रा: जगत्पते:।।११८।।
तेषां लक्षयं नूनं भवेद् भूमिसुरोत्तता:।
नरके च ध्रुवं वासो भवेत्तेषां न संशय:।।११६।।
ये कुर्वन्ति जना भूमो पश्यनित दर्शयन्ति वै।
भावयनित च शृण्वन्ति श्रावयन्ति समादरात्।।१२०।।
ते सर्वे मनुजरेष्ठा: पुत्रपोत्रसमन्विता:।
सुखमेश्वर्यमायुज्यं गच्छन्त्यन्ते हरे: पदम्।।१२१।।
विष्णुरुपधरास्ते ते पूज्यास्ते सुरमण्डले:।
ज्ञानमासा? तत्रैव मोक्षमज्ञायमाप्नुयु:[५०]।।१२२।।
तेषा पुण्यं द्विजश्रेष्ठा: सम्यगवक्तुं क्षमश्च क:।
पापिनोऽपि विमुक्ता: स्यु: पापेम्यो यदि लोकनात्।।१२३।
ज्येष्ठ[५१] येषु च कालेषु यो यो विधिरुदीरित:।
ब्रह्मणापि मुखेनैव ततथैव समाचरेत्।।१२४।।
अरुणोदयवेलायां हरे: स्नानं समाचरेत्।
भूषयित्वा यथान्यायं तत: पूजा विधीयते।।१२५।।
प्रथमं याममासाद्य प्रात:पूजा भवेद् विभो:।
द्वितीयप्रहरे तावन्मध्यमार्चा विधीयते।।१२५।।
प्रथमं यामासाद्य प्रात:पूजा भवेद् विभो:।
द्वितीयप्रहरें तावन्मध्यमार्चा विधीयते।।१२६।।
रात्रो च प्रथमे यामे तृतीयार्चा समाचरेत्।
नक्त। द्वितीयप्रहरे चतुर्थयजनं तथा।।१२७।।
हरेर्नीलाद्रिनाथस्य यजनं पावनं महत्।
कुर्वतां पश्यतां लाके चतुर्वर्गफलप्रदम्।।१२८।।
तस्मात्कालेु चोक्तेषु कर्तव्यं यजनं मुदा।
व्यतिक्रमे महान् दोषो हरेस्तुष्टिर्न जायते।।१२६।।
आकले विहिता पूजा निष्फला जायते द्विजा।
रक्षोग्राह्या[५२] च सा पूजा जायते नात्र संशय:।।१३०।।
यजमानस्य मांगल्यं कदाचिन्नहि जायते।
अर्चकस्य विनाश: स्यात्तस्मात्काले दिनं चरेत्।।१३१।।

पाकद्रव्यासम्भवेऽसि न हि कालव्यतिक्रमम्।
कुर्य्याल्लाजाशर्करादो नैवेद्यरर्च्चयेद्धरिम्[५३] ।१३२।।
नीराजनं च पुजा च तथैवोत्सवसंचयाः।
अकाले द्विअशादूर्लला च कर्तव्याः कदाचन।।१३३।।
कर्तव्याश्चेत्तदा तांस्तु न गृहणाति हरिः स्वयम्।
तत्सर्व राराक्षसेर्ग्राह्यं सत्यमेतन्न संशयः।।१३४।।
विष्णवालये मनोरम्ये पवित्रे पाननाशने।
म्लेच्छाश्च यत्र[५४] जनके सारमेयादयः कवचति्।।१३५
गृध्रादयः पक्षिणंश्च यवनाद्यास्तथैव च।
न विशेयुः कदाचिद्वै तत्र यत्नं महर्षयः।।१३६।
कर्तव्यं मानवेः सर्वैः अधिकारयुतेः समदा।
प्रामादाद् यदि तेषां वै प्रवेशात्रेव जायते।
पाकद्रव्यं[५५] च यद् वस्तु तत्रस्थं जलसंयुतम्
पावयेद्[५६] गोमयाम्भोभिः शुधाम्मोमिश्च सेचयेत्।
पुनर्होमश्च कर्तव्यो वेष्णवाग्ने विशेषतः।।१३८।।
महास्नानं विधातव्यं देवानां विधिना ततः।
महोत्सवतया तेषां नैवेद्यं कारयेत्पुनः।।१३६।।
अन्यथा निष्फलं सर्व कुधोद़ेवो भवेद् ध्रुवम्।
सर्वेषां च विनाशः स्त्रात् तस्माद् यत्नं समाचरेत्।।१४०।

ऋष्य ऊचुः

इन्द्रद्युम्न महीपालः तस्मात्तत् रुतवान् मुनेः।
पुनब्राह्ममानन्रात्प्रप्रच्छ त वदस्व तत्।।१४१।।

सूत उवाच।

धन्याश्च कृतपुण्याश्च स्वयं सर्वे महोत्तमाः।
यतो नीलाद्रिनाथस्य गुह्यं तच्छोतुमधंताः।।१४२।।
तेन श्रीजगतां पतेः परमया भक्त्या च तन्निर्मितः५७
स्रष्टा यो विधिरद्भुतश्च गदितः तं भूमिपालं प्रति।(१४३)
तद्धक्तव्यमिदं द्विजां श्रुतियुगानन्दप्रदं पावनम्।
श्रृण्वन्तु क्षितिमण्डलेऽतिविमलं स्पष्टं भवन्तश्च तत्।।१४४।।
इति श्रीसूतसंहितायाम् नीलाद्रिमहोदये शोनकादिमुनिसूतसमवादे
सप्तत्रिंशतिमोऽध्याय।

FOOTNOTES

After sl. 1, the following Verse is present in Mss. K, M -

प्रार्थये दति सत्लीलं दारुब्रह्मरूवरुपिणम्।
(The Variant in K is दुतिभक्यातं)

१ K, R नरः। १ R, U दक्षिणाशानवतया, M दक्षिणशां ततया। ३ K, R साम्प्रति। ४ M जाज। ५ K साम्प्रतं तन्निबोध मां। ६ K, M, R अतः। ७ K, M, R युक्तं शस्त्र समायुक्तं। ८ K, R आनीय, M आनीय। ९ R, U पूजाव्यजनतो हरेः। १० K नीलाद्रिसिंहाय। ११ K, M, R, U माधव। १२ K श्रावयेत्कृष्णं। १३ K, M, P, R, U मण्डितो। १४ U रुक्मिण्या। १५ U ईति, K, M इति। १६ K, M, R, U नक्तं। १७ U कृष्णयोस्ततः। १८ K, M, R, U चाचायूर्यब्रह्मणोद्धतिं। १९ K, M, R, U धोतयेत्। २० K, R कुशद्वयम्। २१ K, M, R, U दद्यादनेन। २२ K, U फलान्वितं। २३ K, M, R तथा। २४ K, M, R, U विप्रो। २५ K, M, R तत्त्वतः। २६ R सुचत्रोत्सव, U सुचक्षेति च। २७ U यहार रेति। २८ U त्रक। २९ M सूदर्वाबदरी। Mss. K, M, R, U reas sl. 54b as follows -

त्वां गन्धर्वादिमनुद्मिश्च श्चतुर्भिश्चालकोत्तमः।
(The Variant in U is तुर्भिश्चार्च्चकोत्तमः)

३० K, R, U वेणवं। ३१ R वदन्नितं। ३२ K, M, U पूर्ववद् गन्ध। After sl. 59, the following Verse is present in K -

नान्दीमुखं प्रकुर्य्याथ ततः कोतुकसूत्रकम्।

३३ U वसोर्र्द्धारां। ३४ K परं। ३५ U पदेत्वाचार्य्यास्तत्चत्र, K गत्वा आचार्य्यस्तत्र। ३६ K, M, U वाशुः शिशानो, R आशु शिवषानो। ३७ K, M, R परं पठन्, U पठन् पुनः। ३८ M तमः। ३९ K, R युतपरं, युतं परां। ४० M तमः। ४१ K, R युतपरं, U युतं पराः। ४२ U तदार्च्चकश्च तं। ४३ U सम्यगर्ध। ४४ K, M, U समर्पयेत्, U पवित्रक। ४५ U द्बुधः। ४६ K, R कारयेदेवलांकं। ४७ K, R द्वन्दं, द्वन्दं। ४८ U समुच्चार्य ततो गोत्राणि कथ्यते, K, R समुच्चार्य ततो गोत्रं संचदत्। ४९ K कृष्णस्तु, U कृष्णस्य। ५० U प्रवर। ५१ M पुरुषस्त्रीयः; R, U पुरुषास्तयः। ५२ K, M, R युजः। ५३ M, R ६मतो बदेत्। ५४ R, U तद्गुवाक। ५५ M, R, U सोऽर्चकोत्तमः। ५६ K, U कुत्रचित् पट्टे। Mss, K reads sl. 107a as follow -

नमस्तेऽस्तु सुरश्रेष्ठ नमस्ते कमलापते।

५७ च is absent in M, R, U ज्ञा। ५८ K, M, R, U पंचोपचार। ५९ K घटिकानतरे। ६० M तयोश्च। ६१ K, U कृध्धयोत्वस्त्रग्रन्थिं। ६२ K इन्द्रद्युम्नस्य। ६३ M धीमतेः। ६४ K प्रतिष्ठिता। ६५ R मोमक्षयमाप्नुयात्। ६६ U येषु। ६७ M रूक्षा ग्राह्या। sl. 131 is absent in K. ६८ U विकारेर्च्चयेद्धरिं। ६९ U जन्तवः केऽपि, K, R जनतवः केचित्। ७० K, R, U पाकजन्यं। ७१ K, M, R, U धोतये। ७२ K, M, R, U चान्निर्मितेः।

अष्टत्रिंशोऽध्यायः

ब्रह्मोवाच

ब्राह्मे मुहूर्ते चोत्थाय शयनाद्देशिकोत्तमः।
शुद्धं वस्त्रान्तरं भूत्वा यतचितो हरिं स्मरेत्।।१।।
नमः कमलनाथाय जगत्कारणकारिणे।
नारायणाय देवाय परमानन्दाययिने।।२।।
देवकीजठराम्मोधेः सम्भवाद्य परात्मने।
कृष्ण दवे नमस्तुभ्यं सत्तमोध्वंसिने नमः।।३।।
जगदाह्लादनपर श्यामसुन्दरतेजसे।
नमस्तेऽस्तु हृषीकेश रामवन्द्रायेत नमः।।४।।
इत्थिं१ स्तोत्र पठेद् भक्तया विष्णुध्यानपरायणः।
प्रार्थयेद्धरणीं देवीं कृंताजलिपुटस्ततः।।५।।
आधारभूता भूतानां क्षमे त्वं नित्य शोऽनधे।
ब्राह्मी[1] क्रियां करिष्यामि मृत्तिकां देहि मे धरे।।६।।
इति समप्राथ्र्य तां प्राज्ञो मृत्तिका खननं चरेत्।
तनमृत्तिका करे धृत्वा दक्षिणे जद्भाजने।।७।।
नेऋताशां ततो गचदेन्निर्जने कुत्रचित्पदे।
यज्ञोपवीतं संन्यस्य दक्षकर्णेऽवसंयतः[3]।।८।।
आच्छाद्य वस्त्रतः शीर्षं मलमूत्रे परित्यजेत्।
दक्षिणामिमुखो रात्रो दिवा भूयादुदन्मुखः।।६।।
शंकाभावे कुन्थनेन कुय्र्याद्देहस्य शुद्धये।
ततः शोचो विद्यातव्यो यथोक्तविधिना नृप।।१०।।
सकृल्लिंगे त्रिवारं चं गुदे सप् करे दश।
उभयोः करयोः सप्त दद्यात्प्रिश्च पादयोः।११।।
पादो पाणिद्वय धोत्वा वस्त्रमन्यद्दषेत् शुचिः।
ततः प्रणवमुच्चार्य गोकर्णाकृतिके करे।।१२।।
धृत्वा जलं भाषदध्नं त्रिः पीत्वा द्वि प्रमार्जयत्।
समस्तांगुलिसंलग्नं गोकर्णाकृतिकं विदुः।।१३।।
तेनाचम्य भवेच्छुदो दोषभागन्यथा भवेत्।
मुखं च नासिकां चक्षुं श्रोतं नाभि च हृचिछर५।।१४।
बाहुमूलं च संस्पृश्य शुचिः स्यात् स्वस्व मुद्रया।
तद् यथा स्यान्नरपते मुद्राणां लक्षणं शृणु।।१५।।

मुखे मध्यमया न्यस्य तर्जन्यांगुष्ठयोगतः।
नासिकायां ततश्चक्षुरनामांगुष्ठकेन च।।१६।।
कनिष्टांगुष्टकाम्यां तु कर्णौ नाभिं च संस्पृशेत्।
अनेन हृदयं न्यस्य सर्वाभिः शिरसि न्यसेत्।।१७।।
अग्रेण बाहु संस्पृश्स शुद्धो भवति देशिकः।
आयुर्गलमिमि प्राज्ञो मन्त्रमुच्चार्य मन्त्रवित्।।१८।।
दन्तकाष्ठं गृहीत्वान्नादवासेति दन्तघर्षणम्।
वटश्च खदिरश्चेव कदम्बश्च करंजकः।।१६।।
तिनित्रडी वेणुपृष्टं च निम्ब्बाभ्रादुम्बरस्ताा।
अपामार्गश्च बिल्वश्व कण्टका क्षीरसंयुता।।२०।।
एते प्रशस्ता नृपते दन्तधावनकर्मणि।
एतत् काष्ठिकया तावद्वादशांगुल मानया।।२१।।
दन्तानां घर्षणं कुय्र्याद् विलम्बेन नृपोत्तम।
जलैर्द्वादशगण्डूषेर्मुखशुद्धिं समाचरेत्।।२२।।
पूर्वोक्तचमनं कृत्वा मृत्तिकाहरणं ततः।
अश्वक्रान्ते रथक्रान्त इति मन्त्रं परं पठैत्[४]।।२३।।
मृत्तिकालेपनं कुर्याचिदरोहृद वाहुकेषु च।
गंगा स्मृत्वा जले विश्व वरुणस्नानमाचरेत्।।२४।।
अनन्तगर्भिणं साग्रं समूलं सकुशद्वयम्।
कृत्वा पवित्रपाणो च दक्षे वामे कुशानथ।।२५।।
घृत्वा मौनं समाचय्र्य यावत् स्नानसमापनम्।
इमं मे वरुण इति[५] मनोश्चाहं प्रजापतिः।।२६।।
ऋषिश्च छन्दो गायत्री देवता वरुणः स्मृत५।
विनियोगस्य च पुरानुवाक्यायामुदाहृतः।।२७।।
इमं मे वरुणश्चैवं मन्त्रमुक्त्वा ततो वदेत्।
गमेऽत्रागच्छ[६] चत्येवामावाह्य जाह्नवी स्मरेत्।।२८।।
तत्पायामिति मन्त्रेण जलाभिमन्त्रणं ततः।
उरुं हि रारजेति मनुं संजप्याचमनं चरेत्।।२६।।
यसोऽर्वनतमिति संमार्ज्यमापो हि मुखमज्जनम्।
तदुत्तममिदं[७] मन्त्रं निगद्य स्नानमाचरेत्।।३०।।
गंगागयाकरुक्षेत्रप्रयागोदधिसंगमान्।
स्मुत्वतान्निर्मले तोये सयायाद् वारत्रयं बुधः।।३१।।
ततो दत्त्वा वामपादं भूमो दत्तपदं जले।

यथोक्तविधिनाचम्य पुनर्गच्छेर्जलान्तरम्।।३२।।
आब्रह्मस्तम्भपर्यन्तमित्युक्त्वा तर्पखेत्रिशः।
आचम्य प्रोच्छेयेदं गात्रं शिरः प्रोंछनपूर्वकम्।।३३।।
अनेन विधिना स्नानं समाप्य विष्णुमन्त्रतः।
पुनस्तत् क्षणमेवायं मन्त्रस्नानं समाचरेत्।।३४।।
देशकालो समुच्चार्य नामगोत्रे यथाविधि।
श्रीमद् भगवतो विष्णोः प्रीत्यर्थ स्नानमुत्तमम्।।३५।।
करिष्येऽहमिति प्राज्ञः कुर्यात् संकल्पमादरात्।
अस्त्रमन्त्रेण विप्रेन्द्रो मृत्तिकाचरणं शुभम्।।३६।।
तत्र भागपरं कृत्वा प्रणवेन करद्वये।
घर्षयेद्रविसंख्यातेर्वारियुतं मुहुः।।३७।।
मुलमन्त्रं समुच्चार्य नाभ्यन्तं मस्तकादि तत्।
लेपनेयनमूलमन्त्रेण पुनः पादादिनाभितः।।३८।।
मध्यभागेन तेनाशु शेषेण सर्वतो लिपेत्।
सूर्यमण्उलमध्यस्य श्रीमननारायणांध्रितः।।३६।।
जाताया जाह्नवीदेव्या जलमंकुशभुद्रया।
आवाह्य धेनुमुद्रान्त स्त्व मृतीकरणनतः।।४०।।
,कवचेनाबगुठ्यास्त्रमन्त्रेण संचरन् पुनः।
मूलेन दशधा जप्त्वा सोमसूर्याग्निमण्डलम्।।४१।।
विचिन्त्य परया भक्त्या तन्मध्ये विष्णुमव्ययम्।
ध्यात्वा जप्त्वा मूलमन्त्रं यथाशक्तिनिजज्जनम्।।४२।।
कृत्वाचम्य षडंगेन न्यायं कृत्वा यथाविधि।
मूलेन मनुना मन्त्य जलं चैव त्रिधा पुनः।।४३।।
संचयेत् दशधात्मानं मुद्रया कलशार्ख्यया।
माहात्म्यं जाह्नीवदेप्यास्तदा बृयात् सुभक्तितः।।४४।।
शुक्लसूक्ष्माम्बरे॰ शुद्धे धृत्वा रक्तेन नीलकम्६।
गंगातीरमृदा गोपीचन्दनेन च भक्तितः।।४५।।
यथोक्तविधिना कुर्ययात्तिलकं पापमोचनम्।
दण्डाकृतितया हृदये तिलकं नयसेत्।
वेणुपत्राकृतिं बह्वोरन्यत् सर्वपद्रीपवत्।।४७।।
मूर्तिप्रजरन्यासस्स मन्त्रेण तत्पदे सुधीः।
तिलकानि प्रकुय्र्यादवै तिलकानि नृपोत्तम।।४८।।
शंखपद्मो तथा चक्रं दक्षबाहो न्यसेत् सुधीः।

चक्रं गदा तथा शंखं धारयेत् वामबाहुके।।४६।।
शंखचक्रगदाम्भोजचिह्नानि विलिखेत्तनौ।
कुर्याद् विष्धवताराणां नृपेन्द्र मूर्तिधारणम्।।५०।।
प्रामुखः कुशस्त्री सन् कुर्य्यात सन्ध्यां महोदयाम्।
विधाय वेदिकीं सन्ध्यां मूलमन्त्रेण मनत्रवित्।।५१।।
कुर्यात् सन्ध्यां पुनः प्राज्ञो यथानत् श्रृणु सत्तम।
गगं च यमुने चेव इति मनत्रमुदीय्र्य सः।।५२।।
तीर्थमावाह्य मूलेन मनुनांकुशमुद्रया।
त्रिवारं निक्षिपेन्नोलो तज्जलैर्ममनत्रमनित्रतेः।।५३।।
ततः षडंगविन्यासं कृत्वा वामकरे पुनः।।
जलग गृहीत्वा दक्षेण पिधनं पाणिना चरेत्।।५४।।
हं क्षं रामिति मन्त्रेण ह्सयमिमन्त परं पठन्।
मूलमन्त्रं ततो वारिगलितं यत्तदम्भसा।।५५।।
अमृताम्भुक्षणं मूर्ध्नि कुर्य्याद्वे तत्तमूद्रया।
अथ शेषजलं दक्षे समादाय करे पुनः।।५६।।
तेजोरूपं परं ध्यात्वा त्विलयाकृष्य पतकम्।
प्रक्षालय कृष्णवर्णा तु जलं पातु सवरुपकम्।।५७।।
ध्यात्वा पिंगलया तावत् तवरेच्य पुरतः पुनः
क्षिपेदफ वज्रशलाकायां कल्पितायां पंडित्यतः।।५८।।
अधमर्षणमेवं[10] च कृत्वा धोतकरद्वयः।
अस्त्रमन्त्रेण चाचम्य गायत्र्यांजलिकत्रयम्।।५६।
क्षिपेदथ नृसिंहादि गायत्रीं शृणु भूपते।
तस्मादादो .समुच्चार्य नृसिंहायेततः परम्।।६०।।
वि़द्महे चति संकल्प्य तीक्ष्णदंष्ट्राय धीमहि।
तन्नो नारसिंहः प्रचोदयादिति प्रयोजयेत्[11]।।६१।।
एषा नृसिंहगायत्री सतां सिद्धिप्रदायिनिनी।
सतारं मान्नथं बीजमादाबुक्त्वा ततः परम्।।६२।।
कृष्णाय विद्महे चेति दामोदरपदं ततः।
चतुर्थर्यनतं विधायाथ धीमहीति पदं न्यसेत्।।६३।।
तन्नो विष्णुः प्रचोदयादिति मन्त्रं पेत्सुधीः।
असो श्रीकृष्णगायत्रीं जपतां सर्वकामदा।।६४।।
पुरः प्रणवमुच्चाय्र्य श्रीगोपालाय[12] विद्मे।
इत्युक्ताथ चतुर्थर्यन्तं वासुदेवपदं ततः।।६५।।

धीमहीति च सेयाज्य तन्नो विष्णुः प्रचोदयात्।
इथिं गोपालगायत्रीं मनोरथविधायिनी।।६६।।
वासुदेव पदमिदं चतुर्थर्यन्तं विधाय चं
विद्महेति च संलप्य तथा नारायणाय च।।६७।।
धीमहीति ततश्चोक्त्वा तन्नो विष्णुः प्रचोदयात्।
वासुदेवस्य गायत्रत्येषाशेषधनाश्सिनी।।६८।।
जपतां स्मरतां वापि शृण्वतां कल्पतां तथा।
सुदर्शनाय विद्महे महाचक्राय धीमहि।।६९।।
तन्नो विष्णुः प्रचोदयान्मन्त्रविदिभश्च बुध्यते।
सोदर्शनीय गायत्रीसमरतां पापनाशिनी।।७०।।
चतुर्ध्यन्तं सतारं च भुवनेश्वरि नामकम्।
विद्महेति च सन्यस्य महालक्ष्मये च धीमहि।।७१।।
ततो बूयाद्देशिकेन्द्रसतन्नो देवी प्रचोदयात्।
इति[13] श्रीभुवनेश्वय्र्या गायत्री मंगलाप्रदा।।७२।।
महाल्क्ष्म्ये विद्!महे तु पदं चाभाष्य भथक्त्तः।
पद्मायै धीमहि चेति तन्नो देवी प्रचोदयात्।।७३।।
महालक्ष्म्यश्च गायत्री सर्वसम्पत्प्रदा सताम्।
सोंकारं पृथिवीबीजं वसुधाये पदं ततः।।७४।।
विामिहे विश्वधात्री च धीमहीति पदं पुनः।
तन्नः पृथिवी प्रचोदयादिति मन्त्रविनिर्ण्णयः।।७५।।
विविधात्य्रास्तु गायत्री सर्वदा सर्वदा सताम्।
वेदमातुश्ंच गायत्र्या ध्यानकर्ण्णयोत्तमम्।।७६।।
रविबिम्बस्थितां देवीं रक्तवर्ण्णा सुभूषणाम्।
अक्षमालां त्रिशूलं च तथैव शंखचक्रके।।७७।।
धारयन्ती कृष्णसारचर्माम्बरधरां शिवाम्।
एवं संचिन्तयेद् देवीं गायत्रीं वेदमातरम्।।७८।।
शुक्लां शुक्लाम्बरधरां वृषासन परिहाम्।
त्रिनेत्रीं वरदां पाशं त्रिशुलं कवकरोटिकाम्।।७९।।
सूय्र्यमण्डलमध्यस्थां ध्यात्वा देवीं समम्यसेत्।
श्यामवर्ण्णा चतुबाहुं शुखचक्रगदाम्बुजम्।।८०।।
धारयन्त्तं करेर्दिव्यं सूर्यर्यासनगतां शुभाम्।
सायाह्ने वरदां देवीं गायत्रीं तां स्मरेद् बुधः।।८१।।
ध्यानं त्रिकालं सन्ण्यायु गायत्रयाः परिकीर्तितम्।

ध्यानान्तरतो मन्त्रं यथाशक्ति जपेद् बुधः।।८२।।
ततोऽपि ह्रीं हंस इति सूर्य्यायार्ध्य प्रदापयेत्।।८३।।
इति सन्ध्याविधिः सम्यवकथितो मे तवाग्रतः।
इदानीं तर्पणविधिं कथयामि महामते।।८४।।
इति श्री सूतसंहितायां नीलाद्रिमहोदयेऽष्ठत्रिंशोऽध्यायः।।

FOOTNOTES

Ms. M being this chapter 38 with -

श्रीशुममस्तु, श्रीजगन्नाथाय नमः।

१ M इयं। २ M ब्रह्म। Ms. begons this chapter 38 with श्रीजगन्नाथाय नमः। ३ U दक्षकर्ण्णेऽपि। ४ M पठन् ४ U ईत्यस्य। ५ M गंगेऽत्रागच्छ। ६ U मिमं। ७ M,U ध्यात्वात्विदमाकृष्य। ८ M अर्धमर्षणमेवं। ६ M,U प्रचोदयात् Mss. M. U read sl. 64 as -

तन्नो विष्णुः प्रचोदयतात्।

१० M गोपालाय। Mss. M, U read sl. 70 as - तन्नो विष्णुः प्रचोदयात्। ११ U देशिकेन्द्र। १२ M एषा।

Ms. M read sl. 75b as - तन्नः पृथीप्रचोदयात्।

Ms. U reads sl. 75b as - तन्नः पृथिच प्रचोदयात्।

ऊनचत्वाररिंशोऽध्यायः

ब्रह्मोवाच

सूय्र्योपस्थानकर्मान्ते कुशेष्ववाहनं[1] चरेत्।
प्रत्येक तर्पणं काय्र्य यथान्यायं महीपते।।१।।
नारदं तर्पयामिति तर्पयेतं त्रिभिर्बुधः।
एवं व पर्वतं विष्णुं तथा त्रिशतमुद्धवम[2]।।२।।
दारुकं विश्वक्सेनं च वेनतेयं गुरुं तथा।
तर्पयेत् क्रमतो धीमान् सुनाम्ना स्वस्वमन्त्रतः।।३।।
श्यामवर्ण्णमिमि ध्यानं ध्यात्वा क्षिप्तिवांजलिं जले।
तर्पयेद् विष्धुमाननदाच्चतुवर्गप्रदायिनम्।।४।।
गुरुं च गरुपत्नीं च तथैवेष्टांन् सुरान् बुधः।
मूलमन्त्रं समुच्चार्य श्रीकृष्धं सर्वकामदम्।।५।।
तर्पयामीत्यनेनैव मनुना तर्पयेद् बुधः।
पंचविंशतिभिर्बारिर्वारिणा भूमृतां वर।।६।।
ओं हंसः सूय्र्याय स्वाहा पठित्वाध्र्य प्रदापयेत्।
शतमष्टोत्तरं तावत् गायत्रीं प्रजपेद् बुधः।।७।।
सूर्यश्च मण्डले देवीं विभाव्य मूलमनत्रतः।
यथांशक्ति परं जप्त्वा संहारमुद्रया ततः।।८।।
देवीं सहृदमानीय तीर्थं च प्रणिपत्य च।
एतत्तर्पणकर्मान्ते मन्त्री मोनी भवेन्नृप।।९।।
देवागारं विशेत्तावद्धोतपादकरः शुचिः।
वेष्णवचमनं कुय्र्यात यथाक्तविधिना ततः।।१०।।
विधिं शृणृष्व राजेन्द्र वेष्णवाचमन्य च।
ओं काराद्दृयं नोंऽन्तं च चतुर्थर्यन्तं च केशवम्।।११।।
नारायणं माधवं च तननाम्नाचामेत्रिशशः।
गोविन्दं च तथा विष्णुं संजल्प्य क्षालयेद् करो।।१२।।
मधुसूनमेवाक्त्वा[3] त्रिविक्रममतः परम्।
एतत द्वाभ्यां प्रभूज्येत चोष्ठो स द्विजसत्तमः।१३।।
माधवश्रीधराभ्यां च तथैव मुखमार्जनम्।
हृषीकेशेन नाम्ना च पुनः प्रक्षालयेत्करो।।१४।।
कुय्र्याच्च पद्मनाझभेन क्षालनं पादयोस्तथा।
दामोदरं परं स्मृत्वा प्रोक्षयूनमस्तकं पुनः।।१५।।

सपृशेत् संकर्षणं ध्यात्वा मध्यमांगुलिभिर्मुखम्।
तर्जन्यंगुष्ठयोगेन नसोर्दक्षपुटे न्यसेत्।।१६।।
वासुदेवं ततो वामे प्रद्युम्नं च महीपते।
अनामिकांगुष्ठयोगेऽनिरुद्धं पुरुषोत्तमम्।।१७।।
चक्षुर्द्वये न्यसेत् प्राज्ञस्ततत्कर्मकालपवित्।
अधोक्षजं नृसिंह च तेनैव कर्ण्णये न्यसेत्।।१८।।
अच्युतेन स्पृशेन्नामिं कनिष्ठांगुष्ठयोगतः।
जनार्दनं परं स्मृत्वा तलेन हृदयं स्पृशेत्।
उपेन्द्राय नम इति सर्वामिर्मस्तकं स्पृशेत्।
हरये नम इत्युक्त्वा तावि विष्णवे नमः।।२०।।
अंगुल्यग्रैः भुजो स्पृष्ट्वा क्षीणपापो भवेद् द्विजः।
अनेन विधिना राजन् कुय्र्यादाचमनं यदि।।२१।।
इन्द्रियर्स्पशनं कृत्वा साक्षान्नारायणो भवेत्।
तेनैवाकुष्ठितं कर्म सफलं जायते धृवम्।।२२।।
ब्रह्मोवाचएतत् कर्म विनाऽधुना मधुभिदः पूजां च होमादिकाम्।
ये कुर्वन्ति नरोधमा न हि सुखं क्वापि श्रयनते परम्।(२३)
तस्माद् भूयमिमं विधिं कुरुत भोः श्रीविष्णुमोदप्रदम्।
नानापुण्यविवर्द्धनं कलिमध्वंसप्रदं भूसुराः।।२४।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकोनचत्वारिंशोध्यायः।।

FOOTNOTES

१ M. U वाहनं। २ M नियं मुद्धवं, U विषठ मुद्धवं। ३ U तथैवोक्त्वा।

चत्वारिंशोऽध्यायः

ब्रह्मोवाच

एतदाचमनं कृत्वा देवाग्रे प्रविशेद् द्विजः।
क्षालयेद्देवताग्रं च ततः पीठे सुमार्जिते।।१।।
उपविश्यासनं कृत्वा भूतशुद्धिं ततः[1] परम्।
प्रणवमातकृका द्वन्दं कुर्यात्स विधिनार्च्चकः।।२।।
जलपाखस्य संसकारं कृत्वा ह्यावाहनादिकम्।
कुय्र्याद् विधिवदाचाय्र्यस्ततः कर्पूवारिणा।।३।।
मनसा देव देवं तं शुद्धेन च समार्जयेत्।
मूलमन्त्रेण भो राजंस्ततः शुद्धजले पुनः।।४।।
दोषडितयेच मनुना गण्डूषान्तविसंश्यकान्।
दद्यद्देवमुखं पश्यन्नाय्र्यो भक्तितत्परः।।५।।
दन्तकाष्ठस्य संस्कारं प्रणवेन विधाय सः।
दन्तकाष्ठं करे धृत्वा कवचनेनैव मन्त्रतः।६।।
पूगचूण्णेस्तु संयोज्य स्माहेति[2] दन्तघर्षणम्।
ततो गण्डूशनिचयं दत्वा च नृपसत्तम।।७।।
हेम्ना वा रजतेनापि जिह्वाल्लेखन कर्म तत्।
कृत्वा चैव गण्डूषश्चं दद्याद्दालसवर्जितः।।८।।
धृतेन मधुना राजन् शितया पयास तथा।
युते दध्नि परिष्कृत्य वीक्षणादिककर्मणा।।९।।
ततस्ते वेदिकर्मन्त्रेर्दधिक्रामणसंज्ञकैः।
प्रतिबिम्बे जगद्भर्तुः स्नानं कुर्याद् विचक्षणः।।१०।।
प्रतिबिम्बे ततो दत्वा किंचितदाचमनं द्रवम्।
कर्पूररजसा सिक्तेः सुपुष्पेश्च सुवासितेः।।११।।
वस्त्रपूतेस्ताा नीरेर्विधिवत्संस्कृतेः पुनः।
समुद्रज्येष्ठामन्त्रेण स्नानं कुय्र्याद् प्रयत्नतः।।१२।।
मूलमन्त्रं समुच्चाय्र्य ध्यात्वा रुपं हरेः पदम्[3]।
शुद्धसूक्ष्माम्बरं धृत्वा मार्जयेतत्र भूपते।।१३।।
वाजपेयाश्वमेधाद् क्रतूनां यत्फलु स्मुतम्।
तत् फलं नृपते ते स्याद् विधिनानेन स्नापनात्।।१४।।
भक्तियुक्ताश्च ये मर्त्या जगन्नाथस्य भूपते[4]।
प्रातःस्नानं च पश्यन्ति गमिष्यनित पदं हरेः।।१५।।

पदे पदे न हि सुश्वमेधानां प्राप्नुवन्ति फलं हि ते।
गच्छन्ति भक्त्या ये मत्त्र्या हरेः स्नानावलोकने।।१६।।
तेषां ऩास्ति महीपाल गर्भवासः कदाचन।
सूंर्य्यादये यदा विष्णोरंगे माल्याम्बरादि यत्।।१७।।
तत् सवंकश्टकप्रायं शल्यप्रायं च भूपते।
महाक्रोधयुतो विष्णुस्तदा भवति नानयथा।।१८।।
क्रोधे विष्णोः समुत्पन्ने राजा दुःखी गतायुषः।
तदा तदीयाः कुलजाः न चैवात्र प्रतिष्ठिताः।।१६।
अत्यन्तभक्तिसंयुक्तः पश्चात् चेत् सेवते नृप।
तदा स भगवान् देवः कदा प्रीतोऽपि भो भवेत्।।२०।
अतः प्रतिदिनं त्वं हि राजन् देवार्चने सदा।
सावधानो भवेत्तावद्धिताय स्वयमात्मनः।।२१।।
स्नापयित्वा देवदेवं पाकार्थ प्रार्थयेद् विभुम्।
आज्ञां देहि महाविष्णो! लक्ष्मीश कमलेक्षण।।
होमार्थ[5] पाकशालायां वेष्णवागनो जगत्पते।
इति सम्प्राथ्र्य देवेशं गच्छेत् पाकगृहं ततः।।२२।।
तत्शालापाकेनास्मे प्रेरितः पूजकस्तदा।
धौतायशं पाकशालायं होमं कुरु महीपते।।२३।।
शालामध्ये प्रविश्याथ कुण्डे वास स्थण्ढिलेऽपि च।
शराबे चुल्लिकामध्ये प्रत्यहं होमयेद् द्विजः।।२४।।
गोध मचूण्णकेर्हस्तप्रमणणं स्थण्डिलं ततः।
अभावे तण्डुलेश्चैव[6] कुय्र्यादाचाय्र्य एव सः।।२५।।
कुशत्रयं गोमयं च वज्राभवे पुनस्त्रयम्।
उदपात्रं च संन्यसय मार्जयेत् प्रणवेन तु।।२६।।
उपलेपनभुल्लिख्य चौद्धत्याम्युक्षणं चरेत्।
एतानि पंच कर्माणि प्रणवेन समाचरेत्।
त्रिकोणमृतुकोणं च वृत्तं व चतुरस्रकम्।
चतुर्द्वारसमायुक्तं मिदं ब्रह्मोस्तु मण्डलम्।।२८।।
स्थण्डिले रचयेद्धीमान् दर्मेण बहिनबीजतः।
वासुदेवस्य मन्त्रेऽस्य हुंमनत्रेण च वीक्षकम्।।२६।।
शिरोमनत्रेण सम्प्रोक्ष्य शिख्व्यामन्त्रेण ताडनम्।
कवचेनाम्युक्षणं च मन्त्रमुक्त्वाऽष्टधा जपेत्।।३०।।
लक्ष्मीबीजेन संन्यस्य कुशं तत्र प्रचिनतयेत्।

कुशमूले ऋतुमतीं नानालंकारसंयुताम्।।३१।।
सर्वलक्षणसम्पन्ना सूक्ष्मचाररुतराम्बराम्।
एवं ध्यात्वा देशिकेन्द्रो विष्णुं चैव स्मरात्मजाम्[७]।।३२।।
कोटिकन्दर्पलावध्यं नवीनाम्बुदसुन्छरम्।
नानालंकारसंयुक्तं चतुर्बाहुं किरीद्धिनम्।।३३।।
श्रीवत्सकोस्तुकमोरस्कं कुण्डलद्वयमण्डितम्।
संस्मेरापांगतः कान्तां लोकयन्तं विचन्तयेत्।।३४।।
स्थण्डिले तत्र विमले लेख्यां संचिन्त्यकोमलाम्।
तयोस्तत्र रतिं चिन्त्य श्रोत्रियस्य गृहाद् द्विजः।।३५।।
अरेणेबो बनाद्वाऽपि पाषाणाद् बान्यकाष्ठतः।
तादृशं पायकं तत्र संचिन्तय च पुनर्हृदि[९]।।३६।।
तं तु ताम्रगतं कृत्वा क्रव्यादांशत्वमात्मनः।
सं निरस्य नपुनस्तं तु भावयेद् विष्णुमव्ययम्।।३७।।
वीय्र्यरुपतया तं तु भावयेन्निजरतसा[१०]।
कुण्डोपरि त्रिवरं तुभ्रामयित्वाथ तु पुनः।।३८।।
देया मौनीति सचिनत्य तस्मिन् कुण्डे च तं न्यसेत्।
चिन्तयेच्च तयोः केलिसम्भूतं तं विभावयेत्।।३६।।
आचामयित्वा तौ भूयः स्वयभाचम्य चेतसा।
ततसताम्बूलनिचयं[११] ताम्यां दद्याच्च देशिकः।।४०।।
सर्वामिर्मखयोग्यामिरग्निं प्रजवाल्य पूजयेत्।
प्रादेशमाखं समधिद्वयं[१२] चोत्थाय निक्षिपेत्।।४१।।
तथाऽग्पिदक्षिणे[१३] देशे ब्रह्माणां बरयेत्ततः।
सुपीटोपरि तिष्ठन्ति मनसा कर्मवीक्षणे।।४२।।
चिन्तयेदर्च येद् भूयो ब्रह्माणममितोजशम्।
ममांशसमीवोऽयं च ब्रह्मा नृपशिरोमणे।।४३।।
सर्वेषु देवतकार्य्येषु वरयेच्चन्दनादिना।
अग्निरुतरतो रक्षेत् प्रणीतापात्रमुत्तमम्।।४४।।
परिस्तरणमाकुर्य्यात् कुशेरेव समन्ततः।
पूर्वस्मिन्नुत्तराग्रं व पूर्वाग्रं दक्षिणे नृप।।४५।।
उत्तराग्रं पश्चिमे तु पूर्वाग्रमुत्तरे तथा।
आसादनं तु पात्राणां कुय्र्यादुत्तरसंस्थितिम्।।४६।।
पवित्रच्देदनानि स्युर्ब्रह्मग्रन्थियुतेः कुशेः।
त्रिभिः कुशद्वये नाथ पविखे रचयत् सुधीः।।४७।।

आज्यस्थाली तेजस्वी वा मृण्मयी योग्यता वशात्।
वेश्वदेवनिमित्तं च चरुस्थालयां परि न्यसेत् ।४८।।
सम्मार्जनकुशाश्चैव तथैवोप यमान् कुशान्।
संन्यस्य च ततो व्रिपाः संमन्त्रयमिनन्दितम्[१४]।।४९।।
श्रुवसुवौ तथाज्यं च पूण्ण्रपात्रं च तण्डुलेः।
पवित्रच्छेदनेः कुययाद्दक्षिणावर्त्ततः क्रमात्।।५०।।
प्रादेशमात्रं राजेन्द्र पवित्रं देशिकोत्तमः।
प्रोक्षनमुपरि[१५] संस्थाप्य पवित्रं वाग्यतः शुचिः।।५१।।
पवित्रोदकमादाय प्रोक्षर्णी पुरयेत्ततः।
जज्जलं[१६] तत् पवित्रेण कुशादुत्पवनं[१७] तथा।।५२।।
प्रोक्षणीपात्रमेततु सव्ये धृत्वाथ दक्षिणे।
अंगुष्ठानामिकाम्यां तु जलोद्दिइंखनमाचरेत्[१८]।।५३।।
प्रणीतोदकतो भूयः प्रोक्षयेत् प्रोक्षिणीजलम्।
प्रोक्षणीपात्रसवनो संस्थाप्य तज्जलेन वे ।५४।।
आसादितानां पात्राणां क्रमेण प्रोक्षयेत्ततः।
अग्निप्रणीतयोर्मध्य समं च समुदाहृतम्।।५५।।
प्रोक्षर्णीं स्थापयेतत्र होमकर्मविशारदः।
आज्यनिर्वापणे जाते मोदकेचारुपात्रके।।५६।।
तण्डुलानि ज निक्षिप्य ततश्च आज्ययोः पुनः।
सहाधिश्रयधं कुय्र्यात् पय्र्यग्निकरणं ततः।।५७।।
उदकसपर्शनं कृत्वा श्रुदः प्रतपनः ततः[१९]।
रुवसुचौ मार्जयेच्च तावत् संमाजनेः कुशेः[२०]।।५८।।
अभ्युक्षणं प्रणीतायां अलेनाधोमुखं पुनः।
कुय्र्यात् प्रतपनं भूमौ निधानं च परन्तपः।।५९।।
आज्योद्वासनमानयी चरुद्वासनमेच च।
वह्नेरुत्तरतः कृत्वा स्थपनं देशिकोत्तमः।।६०।।
आज्योत्पवनमाकृत्य चाज्यावेक्षणमाचरेत्।
प्रोक्षण्युत्वपनं काय्र्य सन्निधाय पवित्रकम्।।६१।
कुशनुपयमान् सब्ये घ्त्योत्तिष्ठन् समित् क्षिपेत्।
पवित्रसहितेनायं प्रोक्षिणीपात्रं वारिणा।।६२।।
ऐशान्यकोणादारभ्य चाग्नेः पय्र्युक्षण्णं चरेत्।
ब्रह्मणा स्पृश्यमानसतु जानुदेशे कुशेन च।।६३।।
आज्यहोमं ततः कुय्र्यात् श्रुवेणेव यथाविधि।

संश्रवस्थापनं काय्र्यमाधारा[२१] वावमागको।।६४।।
महाव्याहृयसतावत् भवन्ति मुनिसत्तमाः।
स्विष्टिकृच्चेति सर्वेषां प्रायश्चित्तमिमितकम्।।६५।।
प्रजापतिरयं शब्दः प्रणवाद्यो यवा[२२] पुनः।
स्वाहा उं श्च चतुर्थर्यन्तः पूर्वाचारः स उच्यते।।६६।।
इदं प्रजापतेय चेत्याचार्यात् संश्रवं पुनः।
प्रजापतिमिवेनदं च होमयेत् विधिना द्विजः।।६७।।
दक्षिणधार एषोऽपि कथितो भो नृपर्षभ।
अग्निसोमां तदा प्राः जुहुयात्[२३] क्रमतः शुचिः।६८।।
पश्चिमोत्तरनामानो त्वाधारो च तथा स्मृतो।
पुध्याहवाचनं कुय्र्यात् तदादो गोत्रनामके।।६९।।
उच्चर्य विधिवद्धीमान् वेष्णवाग्नो च पावने।
होमारम्भः यिते च तारावारादिकं वदेत्।।७०।।
अयं चामृतयोगसतु ग्रहाः सर्वे वदननृप।
एाकदशस्थ फलदा भवन्तु च भवन्तु च।।७१।।
शुभं भवत्विति तदा त्रिवारं कर्मकद् वदेतं।
अग्निं ध्यायेत्ततो धीमान् ध्यानं तत् श्रृणृ[२४] भूपते।७२।।
आस्ययुगललिप्तं क्रतुक्षेत्रं प्रिलं सप्तबाहुमनिनद्यम्।
राजमानचरणत्रितयमुद्जन्मसलायगिुणत्रयरमयम। (७३)
सप्तजिह्बतुदितार्कसमामं वेदसंख्यं पृथुलोच्चकश्रृंग।
मेषवाहनमनुत्तमयज्ञसूत्रवन्तमतिचारुजटालिम्।।७४।।
अक्षमाला च शक्तिश्च श्रुक्सुवो दक्षबाहुषु।
तोमृक् यजनं[२५] चेव धृतपात्रं च वामके।।७५।।
वामपार्श्वे स्वध तस्य स्वाहादेवी च दक्षिणे।
विष्णोः कर्मसु सवेषु वह्निमेतादृशं समरेत्।।७६।।
इति ध्यात्वाथ तद् बहनौ मूलेन द्वादशाहुतः।
हुत्वा तु चिनतयेतस्य गर्माधानमिति द्विजः।।७७।।
नराधि–पतया पुंसवनु द्वितीयमुच्यते।
सीमन्तोन्नयनं कर्म तृतीयं मुनिभिः स्मृतम्।।७८।।
चतुर्थ आतकर्मेद नामकर्म च पंचमम्।
बहिर्निष्क्रमणं कर्म षष्ठ। च नृपसत्तम्।।७९।।
अन्नप्राशनकर्मेदं चूडाकर्म त्तथाष्टक्रमम्।
नवोपनयनं काय्र्य विवाहो दशमः स्मृतः।।८०।।

एतत् कर्मषु प्रत्येकं सर्वेषु द्वादशाहुतिः।
हुत्या सर्वत्र मतिमान् चिन्तयेच्च क्रमाद् द्विजः।।८१।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये चत्वारिंशोध्यायः।।

FOOTNOTES

१ M. U मतः। २ M. U स्वाहेति। ३ U परं। ४ M मां पते। ५ M मोहार्थ। ६ M, U तण्डुलामिश्च। ७ M. U स्मरातुरम। ८ M रीच्यां। ९ U पुनः पुनः। १० U चेतसा। ११ M तत। १२ M समिधो द्वयं, U समिधो द्वयं। १३ M अथाग्निर्दक्षिणो, Uतथाग्ने। १४ M संमन्त्रयविनिन्दितम्। १५ M.U प्रोक्षण्युपरि। १६ M.U तज्जलं। १७ M कुय्यादुत्पनं। १८ U जालदिंग। १९ M.U प्रतपनं पुनः। २० M संमार्जनकुशेः पुनः, M काय्र्यमाधारा। २१ U यदा। २२ U संहुनत्। २३ U तच्छृणु। २४ U तोंमरुव्यजनं।

एकचत्वारिंशोऽध्यायः

ब्रह्मोवाच

हदानीं होमकर्मेदं श्रुयतां तत्तु यद् भवेत्।
तच्छुत्वा मानवा यावत्तदा भाग्यभृतश्च ते।।१।।
भूरित्यस्य च मन्त्रस्य प्रजापतिरहं ऋषिः।
गायत्रीछन्द एवात्र देवता वह्निरुच्यते।।२।।
विनियोगस्त्वाज्यहोमे ततः प्रणमुच्चरेत्।
प्रथमानतश्च भूशब्दः स्वाहान्तश्चेति संवदेत्।।३।।
एक्त्वा हुनेद यथान्यायं संश्रवं धारयेततः।
भुव इत्यस्य मन्त्रस्य ऋषिश्चेव प्रजापतिः।।४।।
छन्दुष्णिगसौ चात्र देवता वायुरेव च।
होमे तु विनियोगः स्यात् पूर्ववत् संश्रवं चरेत्।।५।।
स्वरित्यस्य च मन्त्रस्य प्रथमं प्रणवं वदेत्।
पूर्ववदृषिमाभाष्य छन्दोऽपि त्रिष्टुमाख्यकम्।।६।।
सूर्य्यश्च देवता ख्यातो विनियोगश्च पूर्ववत्।
होमं कृत्वा प्रयत्नेन पूर्ववत् संश्रवस्तथा।।७।।
तिसृधं व्याहृतीनां तु युगपन्नाम धारणम्।
कृत्वाऽचम्य च होमे तु युगपन्नाम धारणम्।
कृत्वाऽचम्य च होमे तु सर्वं कृत्वा तु पूर्वकम्।।८।।
गायत्रयुष्णिगनुष्टुव्त्रिष्टफभाख्य ऋषयस्तथा[1]।
अग्निवायुश्च सूर्य्यश्च देवताश्चात्र सम्मताः।।९।।
पूर्ववद् विनियोगश्च तथा होमश्च संश्रवः।।१०।।

सूत उवाच

महाव्याहृतिहोमोऽयं कथितो भवतां पुरः।
इन्द्रद्युम्नाय राज्ञे च विधिना यद् विभाषितम्।।११।।

ब्रह्मोवाच

त्वन्नोऽन इति मन्त्रस्य वामदेव ऋषिः स्मृतः।
त्रिष्टुमाख्यमिदं छनदस्त्वृषिशच तरुणस्तथा।।१२।।
देवतेऽत्र परिख्याते विनियोगश्च पूर्ववत्।
त्वन्मोऽग्र इति मन्त्रेण होमं कुर्याद् यथाविधि।।१३।।
इतभग्पिवरुणाम्यामिमि संस्रव धारयेत्।
सत्वन्मोऽग्नेश्च[2] मन्त्रस्य पूर्ववहृषिमेव च।।१४।।

पूर्वच्छन्द एवात्र देवता चात्र[3] पूर्ववत्।
पूर्ववद् विनियोगः स्यात् सत्वन्नोऽग्ने तु होमयेत्।।१५।।
संस्रव पूर्ववत् कुर्य्यात्ततोऽप्ययाग्न इत्यतः।
मन्त्रस्य ऋषिरेवात्र प्रजापतिरहं नृप।।१६।।
अग्निश्च देवता चात्र विनियोगसतु पूर्ववत्।
आयाच्चेति मनुं चोक्त्वा हुनदाचार्य्यसत्तमः।१७।।
हदमग्नय इतयुक्त्वा संस्रव धारयेत् पुनः।
ये ते शतमपीत्यस्य मनत्रस्य च नराधिप।।१८।।
शुनः शेफ षिख्यातः छन्दश्च त्रिष्टुमाख्यकम्।
वरुणः सविता विष्णुर्विश्वेदावाश्च वायवः।।१६।।
स्वर्कश्चत्र महीपाल देवताः कथिताः बुधैः।
तथैव विनियोगः सद् ये ते शतमिमं बमनम्।।२०।।
उक्त्वा च होमयेद्धीमान तेर्षो नाम सुसंस्रव५।
उद्धूततमिति[4] श्रीमन् मन्त्रस्यास्य महामते।।२१।।
पूर्ववद् ऋषिरेवात्र पूर्ववत् छन्द एव च।
वरुणो देवताख्यातो विनियोगध्च पूर्ववत्।।२२।।
उदुत्तमिति[5] स्पष्टमुक्त्वा मन्त्रं हुनेद् बुधः।
हदं व वरुणायेति संस्रवस्यानमहीपते।।२३।।
अथ प्रणवमुच्चार्य चतुर्थ्यन्तेऽग्निवल्लाभाम्[6]।
प्रजापतिमिमं शब्दमुक्त्वा होमं ततश्चरेत्।।२४।।
इदं प्रजापतये च त्वति संस्रवमाचरेत्।
अग्निस्विष्टिकृतं चैव चतुर्थ्यन्तेऽग्निवल्लभाम्।।२५।।
युगपत् कथयित्वेति हुवेत्तद्वच्च संस्रवः।
वैष्णवाग्निमिं शब्दं प्रणवाढयं नमोऽन्तकम्।।२६।।
चतुर्थर्यन्त्तं तु तं कृत्वा समानयविधिनावर्चयेत्।
पूर्णाहुतिं ततः कुर्य्याद्यथा भवति तच्छगु।।२७।।
आज्यस्थाली त्रयो दर्भाः पुनर्दर्भाश्च तादृशः।
श्रुवसूचो च नृपते! तथेका समिदुत्तमा।।२८।।
आज्यमाज्यसय च स्थालयामालनिर्वाप एव च।
आज्यादिश्रयणं चाथ पर्य्यग्निकरणं ततः।।२६।।
आढ्यदर्भैत्रयेणाथ श्रुवश्रृंगार्जनं चरेत्।
कुशत्रयेण चान्येन तखाज्योत्वपनं पुनः।।३०।।
आज्याद् वासनमाकृत्य तथाजयावेक्षणं चरेत्।

श्रृवेणेव सुचि पुनश्चतुराहुति संग्रहः।।३१।।
तस्योपरि समिद्दानं नारिफलफलं न्यसेत्।
मूर्द्धानमिति मन्त्रस्य भारद्वाजो मुनिः स्मृतः।।३२।।
अनुष्टुभाख्यकं छन्दो वेश्वानरश्च देवता।
अभीष्टसिद्धौ पूर्णायानाहुते होम एव च।।३३।।
विनियोगश्चति वाद्य मुक्त्वाथ मन्त्रवित्तमः।
मूर्द्धानमिति मन्त्रेण पूर्णाहुतिमथार्पयेत्।।३४।।
ततो ब्रह्मि विष्णुरुपं विचिन्त्य प्राशनं ततः।
मार्जनं च ततः कृत्वा कृत्स्यास्य च कर्मणः।।३५।।
सुप्रतिष्ठिार्थमेवेतद् ब्रह्माणे पूर्ण्णपात्रकम्।
दक्षिणां दापयेद्धीमान् सर्वभूपशिरोमणे।।३६।।
पवित्रप्रतिपत्तिश्च प्रणिताया विमोचनम्।
सिवर्जनं ब्रह्मणश्च तथा ब्रह्मे विसर्जनम्।।३७।।
साग्निकरणामाकुर्य्यातथा छिद्रावधारणम्।
भोजनं ब्राह्मणानां च कारयेन्नृपसत्तम।।३८।।

सूत उवाच

इन्द्रद्युम्नं महीनाथं ब्रह्मणा कथतं विधिम्।
वेष्णवाग्नेश्च भवतां पुरतोऽ विभाषितः[८]।।३८
इत्येवं गदतोऽथ वैष्णवबृहद्भानुव्यवस्थापनम्।
नानाकल्मषमोषदं सुखकरं तंत्स्थापितं भो द्विजाः।(४०)
मुद्राणां समधां च लक्षमणास्थिालीद्वयस्यापि तत्
वक्ष्ये यतै कृथितं पुरापि विधिना भक्तं प्रति क्षमापतिम्।।४१।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये एकचत्वारिंशोऽध्यायः।

FOOTNOTES

१ M. U स्मृताः। २ सत्त्वतोऽग्नेश्च। ३ देवतेणें च। ४ तदुत्तम। ५ दड्डतममिति, तदुत्तममिति। ६ चतुर्थर्यन्ते स्वहाब्जकम्, चतुर्थर्यन्त स्वाहान्तकं। ७ चतुर्थ्यन्ते स्वर्हान्तकं, चतुर्थ्यन्ते स्वाहान्तकम्। ८ विमावितं।

द्वाचत्वारिंशोऽध्यायः

सूत उवाच
वेष्णवागनेद्विर्जाः भूयः स्वरूपं कथयामि वः।
होमश्च यत्र कर्तव्यंसतच्च कार्यस्य सिद्धिदम्।।१।।
आज्यास्थल्याश्चरोस्थाल्या मुद्राणां समिधां च यत्।
इन्द्रद्युम्न प्रति नृपं विधिनोक्तं ददाम्यहम्।।२।।
ब्रह्मोवाच
वहेर्यज्ज्वलनं[1] भूप. मुखं तच्च प्रचक्षते।
यत्रं काष्ठं शिखाभावे श्रोत्रं धूमोऽत्र नासिका।।३।।
यत्राल्पज्वलनं तत्र तस्य नैत्रं विदुर्बुधाः।
उस्मातः शिर एवं स्याद्वपं बह्नेः प्रकीर्तितम्।।४।।
कर्ण्णहोमे महाव्याधिर्मेख होमेन्थता भवेत्।
नासिकायां महापीडा शिरोहोमेऽस्ति दुःखिंता।।५।।
आस्यहामे महीपाल ! सर्वसिद्धिभवेत् क्षणात्।
तस्मादग्निं परिज्वाल्य तन्मुखे होमयेत् सुधीः।।६।।
सर्वसिद्धिमवाप्नोति मुखहोमान्नः संशयः।
होममुद्राः प्रवक्ष्यामि श्रूयतां सावधानतः।।७।।
मृगी हंसी सूकरीति त्रिधा मुद्राः प्रकीर्तिताः।
तत्र तत्र प्रशस्ता स्व विपरीत त्वनर्थ द्य।।८।।
सूकरी करीसंकोचे हंसी मुक्तकनिष्ठिका।
मुकौ कनिष्ठतर्जन्यौ मृगी मुद्रा प्रकीर्तिता।।६।।
शान्तिपोष्टिक्कर्मार्थ मृगी हंसी च कथ्यते।
कामदा साधकानां तु होमकर्मकृतामिह।।१०।।
अभिचारीदिकर्मार्थ सुकरो कथिता बुधेः।
उच्चाटने मोहने च स्मम्मने कर्षणे तथा।।१।।
विद्रवणे मारणे च भद्रा मुद्रा सूकरी।
ब्रह्मविष्टरसंख्यायाः कथ्यतेऽथ नृपोत्तम्।।१२।।
यथा ब्रह्म भवेतद्वत् विष्टरश्च यथा भवेत्।
तयोर्विवरणं बूमः श्रूयतामेकचेतसा।।१३।।
पंचाशत् कुशवृप्दश्च दक्षावर्तेन संयुतः।
ऊर्ध्वकेशः सुशोभाड्यो ब्रह्मेति च निगद्यते।।१४।।
तदुर्ध्व कुशयृन्दस्तु लम्बकेशः सुशोभनः।

वामावर्ते भवेद् ब्रह्म दक्षावर्तस्तु विष्टरः।।१५।।
अथ श्रुवस्त्रुंचो भूप लक्षणं कथ्यतेऽधुना।
पलाशाश्वत्थयोः काष्ठेः शम्याश्च खदिरस्य च।।१६।।
सालसरंगयोश्चापि श्रुवः स्याद्वरणीधव।
अश्वत्थस्य विना शक्रसमाः शेषाः श्रुवस्य च।।१७।।
सुचं प्रकल्पयेद्धीमान् वक्षमाणेन दारुणा।
श्रीपर्ण्णयाः[3] शिशपायाश्च तथा क्षीरभृतां शुभेः।।१८।।
स्रवं वदति सर्वत्र ब्रह्मकर्म सुशोभनम्।
तेषां मध्ये गृहीत्वेकं मांनं षड विंशकागुलौ३।।१६।
विंशाशेश्च भवेद्दण्डे वेदी तेरष्टभिर्मवेत्।
कण्ठमेकांशतः कुर्यात् सप्तांशेन मुखं स्मृतम्।।२०।।
वेदी त्र्यशीनविस्तार कर्ण्णिकांशक कीर्तिता।
अग्रं कुय्र्यात्काष्ठमानान्मुच्चे मार्ग च कारयेत्।।२१।।
कनिष्ठांगुलिमानेन कर्ण्णिका स्यान्महीपते।
विदधीत शुभां तस्य कटम्मेकोंशतिोऽभितः।।२२।।
तस्य भागेसत्रभिर्तृत्तो बहिरर्द्धांशतो भवेत्।।२३।।
अंशनेकेन परितः पात्राणि परिकलपयेत्।
अर्द्धांशतो मेखला स्यानमुखवेदयोः समन्ततः।।२४।।
दण्डमूलाग्रयोः कुम्बोः गुणवेदांगुले+ः क्रमात्।
गण्डीयुग यामंशेः स्याद्दण्डस्याध्र्ध हरेदेति।।२५।।
वेद्याश्च पृष्ठभागेऽसो षड्भिरंशेश्च कर्मवति्।
हंसवस्त्रकवद् भूप राहुवत्त् पुत्रिवत् तथा।।२६।।
मुखं च विलिखेत् पश्चाद्भागे वेद्याश्च तत्त्ववित्।
मुखस्य पृष्ठभागस्य सुचः प्रोक्तं तु लक्षणम्।।२७।।
चतुर्विशांशतो भूप सुचश्च श्रुवमाचरेत्।
द्वाविंशांशतो दण्डमानामंशैरेतस्य कोर्तितम्।।२८।।
चतुर्भिरंशेनार्द्धः कर्णाम्बुग्राहितच्छिरः।
चतुर्भिरंशेर्निखनेत् पड.के मृगपदाकृति।
दण्डमूलाग्रयोर्गण्डी[4] भवेत्ककणभूषिता।।२६।।
समित्लक्षणमाचक्ष्ये शुभाशुभफलप्रदम्।
सल्लक्षणं च कुरुते मंगलं जायते पुनः।३०।।
अन्यथा चेत् प्रमवति नानादुःकरं सदां
समिधश्च प्रकर्तव्या कर्तुः प्रादेशसंमिताः।।३१।।

वन्यास्त्वचायुताः शुद्धारुजवोदनवर्जिताः।
नातिहृस्वा न च स्थूलां न वक्राश्च महीपते।।३२।।
द्विधा प्रजा न हि तथा नातिदीर्धाः न कण्टकाः।३३।।
नोत्पाटिता न भग्नाश्च समिथः शुभदायिकाः।
सर्वकर्म सुविख्यातासत्वन्यथाय्यशुभामताः[5]।।३४।।
क्षीणायुषं विशीर्णाश्च विदला रोगदायिनी।
दौर्बल्यदा च हृस्वा चेद् वक्रास्थानहराः स्मृताः।।३५।।
द्विधा प्रजा वेरिवृद्धिः कृशा सर्वस्वनाशिका।
स्थूला नाशयते लक्ष्मीं दीर्धा विघ्नप्रदायिनी।।३६।।
आर्द्राः प्रादेशमात्रां च छेदिता च त्वरणयजा।
अनामिकांगुलिसमा न सूक्ष्मा न च पुष्टिका।।३७।।
त्वयायुतास्ताः समिधः प्रशस्ता होमकर्मणि।
नोत्पाटितं नातिहृस्वां न वस्त्रां नातिपुष्टिकाम् ।३८।।
लतापल्लबसंयुक्तं द्वादशांगुलसंमिताम्।
पौष्टिके शान्तिके चैव समिधं तादृशी हृनेत्।।३६।।
पवित्रलक्षणं भूयः कथयामि नृपोत्तम।
अर्च्चाभिं[6] साग्रकं रम्यं कुशयुग्मं पवित्रकम्।।४०।।
शुद्रादिना स्पृश्यमानं सकृदाच्छिन्नमेव च।
प्रादेशमात्रं विज्ञेयं पवित्र नृपसत्तम्।।४१।।
अच्छिन्मागो तु दर्भो द्वो प्रादेशो तु प्रमाणतः।
अन्तः सूक्ष्मकुशाहीनो पवित्रमिति कीर्तितम् ।४२।।
कर्मणि प्रत्यहं शुद्धो न च पर्य्युषितो च तो।
तसमादनुनिदं भूयः कर्तव्यो तादृशो कुशो।।४३।।
वटुं धारयते यस्तु विना मन्त्रेण भूसुरः।
तेन कर्मकृतं रक्षोग्राहं भवति नान्यथा।।४४।।
रमा भाया कामबीजयुताय बटुकाय च।
नोऽन्तायेति राजेन्द्र वटफमन्त्रः स उच्यते।।४५।।
तन्मन्त्रेण वटफं गृहणन् कर्मसिद्धिभवाप्नुयात्।
अंगुल्याग्रे तपोऋर्द्धिः मध्ये सिद्धिर्भवेत् ध्रुवम्।।४६।।
मूले काम्यप्रदं चाहुः बटुफकग्रहणं बुधाः।
कुशहीनं तु यत्कर्म कुरुते यदि भूसुरः।।४७।।
तत् कर्म निष्फलं ज्ञेयं कर्मशास्त्राः[7] कुशायतः।
इन्द्रो यथा वज्रहस्तश्चक्रहस्तो यथा हरिः।।४८।।

शूलहस्तो यथा शम्भूः कुशहस्तास्त्तया द्विजाः।
आज्यस्थाल्यां लक्षणं हि तद् वदरमि तवाग्रतः।।४९।।
चरुस्याल्याश्च राजेन्द्र कर्मिणा हर्षवर्धनं।
तेजसद्रव्व्यसम्भूता त्वाज्यस्थाली विचक्षणेः।।५०।।
कर्तव्यं कर्म सुप्राज्ञो विसेषाद्धोमकर्मणि।
विभवस्यानुमानेन स्थालिका शुभदायिका।।५१।।
वेष्णवाग्ने होमार्थ चतुर्विशपलेः स्मृताः।
तदर्द्ध वा प्रकर्तव्य नित्यहोमसय कर्मणि।।५२।।
सुदृढाभव्रणां भद्रां स्थालीं कुर्यान्महोदयाम्
चरुस्थाली भवेत् प्राज्ञ पित्तलेश्वाथ मृण्मयेः।।५३।।
यथाशक्ति विधातव्या वितशाद्धयं नकारयेत्।
चरुप्रमाणतः स्थाली कुर्याच्चवणसिद्धये।।५४।।
अवश्यमेपव कर्तव्या सर्वेषां हितकाम्यया।
अन्नं विना न वर्तेत जगदेतत् प्रतिष्ठितम्।।५५।।
तस्मादन्नस्य कर्तव्या हेतोः स्थाली महीपते।
स्वशासोक्ततया राजन् चरुं कुर्याद् प्रयत्नतः।।५६।।
न च खिन्नं न दग्धश्च न भवे शिथिलं नृप।
न भज्यमानमाज्याक्तं रम्यं देवप्रियं शिवम्।।५७।।
शुद्धं प्रयत्नतः कुर्यात् तादृक चरुमनुत्तमम्।
प्रश्यत्रयेण तत्कुर्याद् वेष्णववान्मदहोमे।।५८।।
वेश्वदेवविधिं वक्ष्ये श्रूयतां नृपसत्तम।
पंच भूः संस्कृतिः कुर्यात् स्थण्डिण्लेऽग्निपुरः स्थले।।५९।।
ब्रह्माणां प्रणवाद् पंच चतुर्थ्यनतेऽग्नि८ बल्लभाम्।
वासतोस्पतिं तथा कृत्वा प्रपापतिमनन्तरम्।।६०।।
विष्णुं तथा च मतिमान् विश्वकर्तारमेव च।
निजोक्तया९ क्रमता भक्त्या जुहुयात् संस्कृतेऽनले।।६१।।
स्वस्वनाम्ना प्रकुर्वीत संस्रवश्च पृथक् पृथक्।
द्वारपार्श्वयुगे चण्डप्रचण्डो प्रतिदापयेत्।।६२।।
नमोऽन्तनाममन्त्रेण चरुं च संस्रवं तथा।
ऐशान्ये क्षेत्रपालंस्य च प्राच्यां दुर्गा सरस्वतीम्।
महालक्ष्मीं महेन्द्रस्य कौबेरदिशि दापयेत्।।६४।।
आग्नेयां दिशि पाखोरस्थो पशूनां पतिरेव यः।
यो नारद इति ख्यातः तौ॰ च दद्याच्चरुं नृप।।६५।।

वायव्यां दिशि राजेन्द्र वह्निं प्रति चरुं न्यसेत्।
विश्वसाक्षिणि मालक्ष्य मध्ये दद्याच्चरूं पुनः।६६।।
पंच प्राणानमिपुनश्चरुं दद्यात् यथाक्रमम्।
आद्यं तयोर्जलं दद्वात् प्रत्येकं बलिकर्मणि।।६७।।
नमोऽन्तं च चतुर्थर्यन्तं प्रणदाख्यं महीपते।
सर्वेषां नाम वोक्त्वाथ चरु दद्याद् बुधः शुचिः।।६८।।
अधार्चकः समाप्यैत्लक्ष्मीं घ्यायेत् सुरेश्वरीम्।
विष्णोः श्रहजगदीशस्य नीलाचलनिवासिनः।।६६।।
बलभद्रानिवतस्यापि माधवेन सुरैः समम्।
वर्तमानस्य च मुदे पाकार्थ याहि सिन्धु जे।।७०।।
तव दृष्ट्या यतो रम्यं नानाव्येजनसंयुतम्।
नानापूपसमायुक्तं भर्जनाबलिमंजुलम्।।७२।।
धृतेर्जजरितं तावत् खेचराबलिमंजुलम्।
चतुर्विधमिदं रम्यं रस्यमानन्तवर्द्धनम्।।७३।।
अन्नं यथा स्यात् कमले ! लेमिनीयतरं बहु।
जगन्नाथस्य तृप्त्यर्थ कुरु साम्प्रतद्दिद्वजे।।७४।।
इति ध्वातवामलां लक्ष्मीं सम्प्राथृर्य च पुनः पुनः।
प्रार्थयेत् गणनाथ च भूपसत्तमपूजकः।।७५।।
नमामि गणनाथ त्वां सर्वविध्नपतिं प्रभुम्।
विघनलेशो यथा न स्यात्पाकेऽस्मिन् कुरु तत्तथा।।७६।।
विधिमेवं प्रकुर्वीत प्रत्यहं नियतेन्द्रियः।
अन्यथा न भवेद् विष्णोः ससन्तोषो महीपते।।७७।।
विधिहीनं यदा कर्म जायते केशवार्चने।
न गृह्णाति तदा पूजां जगदीशो महीपते[११]।।७८।।
तस्मादेतत् विधिं कुर्यात् प्रयत्नेनैव सत्तमः[१२]।
वेष्णवाग्निरयं भूय पावनश्च जगतये।।७६।।
अनेन धूपं वद्विष्णोर्दीपदानं महोदयम्।
अशाश्रिकां तथा कुर्यादवश्यं मंगलोदकम्।।८०।।
वेष्णवाग्नियुतं धुपं दीपमारात्रिकं तथा।
ये पश्यन्ति महाविष्णोर्मुक्ताः स्युः भवबन्थ नात्।।८१।।
एतानि पूर्ववत् कृत्वा षडंगन्यासमाचरेत्।
करन्यासं ततः कृत्वा प्यंगन्यासमाचरेत्।
करन्यासं ततः कृत्वा प्यंगन्यासं तथैव च।।८२।।

आदित्यं च रविं चैव भानुं भास्करमेव च।
सूर्यर्य च क्रमतो न्यस्येदादित्यादीनि पंच च।।८३।।
आदित्याया नम इति वदत् प्रणवपूर्वकम्।
शिरस्यास्ये च हृदये गुह्ये पादतले तथा।।८४।।
आदित्यवन्न्यसेत्तत्र तांश्च तत्रेव भूपते।
मस्तके मुखदेशे च कण्ठे च हृदये तथा।।८५।।
कुक्षो नाभो ध्वजे पादे मन्त्राक्षरचयं न्यसेत्।
प्रत्यंकं प्रणवाझयं च नमोऽनतं तत्र तत्र च।।८६।।
न्यसेत्तदा पूजकोऽसौ सूर्य्याध्यानं ततः शृणृ।।८७।।
शोणोम्मोजयुगी भेयप्सितकरं केयुरहारांगद –
भ्राजत कुण्डलमण्डितं त्रिलयनं माणिक्यवन्ममस्तकम्।
मन्दारद्युतिसुन्दरं सुरमसं घोरानथकारच्छिदम्।
लोकारनन्दकर शुभं परतरं वनदे सदा भास्करम्।
एपं प्रातः सुरं सूर्य्य ध्यात्वा मध्यन्दिने तथा।
ध्यायेद् यथा तद् वदामि श्रूयतां नृपसत्तम।।८८।।
रक्ताम्भोजवासनं गुणनिधिं त्रेलोक्यशर्मपद्रम्।
फुल्लाम्भोजमुखामुखाम्येष्वक्लिसघ्वस्तं शिरोरत्पकम्।
सौवर्ण्णोत्तम भूषाणाचिंतन्नुं देदीप्यमान् कृतिम्।
भानुं सर्वजलानिमनन्दितपदं मित्रं पवित्रं भजे।।९०।।
मध्याह्ने पूजने भूप सूर्य्यमेवं च चिन्तयेत्।
चिन्तायित्वार्च्चयेद् विष्णुं नीलाद्रो दारुरुपिणम्।।९१।।
सायाह्नं ध्यान माचेक्ष सौरं पापहरं नृप।
दाडिमीकुसुमाकारं श्वेतपद्मसत्करम्।।९२।
सुवर्ण्णभूषणं रम्यं रत्नोल्लासिशिरः स्थलम्।
सप्ताश्वामध्यस्थं व्योममार्गावलम्बिनम्[13]।।९३।।
ब्रह्मादिदेवतावन्द्यः छायादिपरिसेवितम्।
ध्यायेद्देवं सूर्ययपं त्रेलक्यानन्दवर्द्धनम्।।९४।।
एवं त्रिषु च कालेष्र्रु ध्यात्वा मुद्रां प्रदर्शयेत्।
व्योममुद्रां पद्ममुद्रा क्म्बुमुद्रा च निष्ठफरा।।९५।।
गोविषाणा धेनुमुद्रा तापिनी सप्तमुद्रिका।
एता मुद्रा प्रदर्श्याथ व्यापकत्रयमाचरेत्।।९६।।
आचार्य्यपात्रविषयं कथयामि नृपोत्तम।
श्रुयतां ते यथा श्रद्धा जायते हृदयेऽमले।।९७।।

रत्नं हेमं रोप्यकं च पित्तलं ताम्रमेव च।
शंखं[१४] च दारुसप्तानि शक्तायर्थार्पणे रवेः।।९८।।
एतेषामध्र्यपात्राणां शंखः श्रेष्ठतमो मतः।।९९।।
तसमाच्छंखेन कृतिना सूय्र्यायाध्र्य प्रदीयते।
शस्त्रमन्त्रेण[१५] च पुनः शंखं प्रक्षाल्य तत्र वे।१००।।
मूलमन्त्रेण तेनाशु जलं च पूरयेत् सुधीः।
वेष्णवाग्निविधिं विष्णोर्दीपं वा धूपमेच वा।।१०१।।
आरात्रिकां वा यः कुर्य्याद्विष्णु संकोपयूद् ध्रुवम्।
विष्णोः क्रोधग्निना दग्धो लिप्येतेऽत्र न संशयः।।१०२।।
वेष्णवाग्नेः कीर्तनं यः करोति मानवः सदा।
अवलाकंक तथा पूजां प्रदक्षिएणकमल्मषम्।।१०३।।
कृत्वा मुच्येत् संसाराम्युदितो नृपसत्तम।।१०४।।
एतद् वेष्णवपाककोतमविधिं विर्ष्णोर्म्हाप्रीतिदम्।
नानाकल्म्षमोक्षदं सुखकरं बुद्धिप्रसादप्रदम्।
ये श्रुत्वा रचयन्ति तेन विधिना पूजां हरेः शाश्वतीम्।
भुक्त्वा चात्र महासुखं कुलयुतं गच्छन्ति शेषेऽव्ययम्।।१०५।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये द्विचत्वारिंशोऽध्यायः।।

FOOTNOTES

१ U वन्हे। २ U मुक्तो। ३ U श्रुचं। ४ M षड्विंशकांगुले। ५ M, U संसारस्य च हेतवे। After sl. 22a, M writes - कर्ण्णिकास्या महिपते and Ms. U writes = । कर्ण्णिकास्यान्महीपते। ६ U र्दण्डी। ७ U मता। ८ M अगर्म, U अर्थाम्मसा। ९ U कर्मणस्ताः। sl. 48a is absent in M. १० M चतुथ्र्यनते स्वहानतकं, U चतुथ्र्यनं स्वहान्तकं। ११ M त्रिथोक्ता क्रमणे। १२ U महामते। १३ M, U सत्तम। sl. 81 is absent in M. Mss. M. U include sls. 82-88 in the chapter 43. Mss. M, U include sls. 89 - 100 in ch. 43. १४ M, U वलम्बनं। १५ U शंखश्च। १६ U अस्त्र।

नाभिपंकजमध्यस्थं पद्मकिंचील्म[14] सन्निभम्।।२७।।
चतुमुमखं चतुबाहुं पुस्तकं च कमण्डलम्।
ध्यानांजलिं स दधतं पूरकादो विचिन्तयत्।।२८।।
शंखचक्रगदापद्ममविस्फुरतम् करपद्मज।
नवीननीरदश्यां सर्वाभरणभूषितम्।।२९।।

कुम्भकादो प्रसन्नास्यं हृदये भावयेद्धरिम्[15]।।३०।।
त्रिशूलसत्वांगमृगांनमालालसत्करं पूर्ण्णशशांकरम्यम्।
गदाधरं चक्रधरं हरं तं ललाटके रेचक कर्मणाढ्यम।।३१।।
सकोज्य तर्जनीमध्ये कुयूर्यादंगुष्डया पुनः।
कनिष्ठानामिकाम्यां यन्मुद्रा सा प्रणवे स्मृता।।३२।।
तावद्देहमलोत्करं[16] क्षितिसुरे ह्रीं स्वः समृतोऽयं यदा
तारः सारमरो हरेच्च विपुलं दीपो महातपाकम्।
यावत् सोऽपि प्लुतस्वरेण कलितो मोक्षप्रदो जायते.
यावत् सन्ततिभावति नरवरेः सायुज्य मुक्तिप्रदः।।३३।।
एवं चतुर्विधः प्रोक्तः प्राणायामः परन्तप[17]।
षड्विधोऽपि भवेत् सोऽयं गद्यते तच सन्निधो।।३४।।
श्वासयुक्तः सः धूमः स्याद्धूमश्चेनन वर्जितः।
जपयुक्तो यदा जात' सगर्भः प्रणवः स्मृतः।।३५।।
अनामिश्च जपेर्हानिः संलक्ष्योध्यानसंयूतः।
ध्यानहीनोप्यलक्ष्यः स्यात् षड्धुथ प्रधवः स्मृतः।।३६।।
प्राणायामः यथोक्तस्तु ये कुर्वनित द्विजातयः।
तदन्तः करुणशुद्धिमन्यथा न हि शुद्धयति।।३७।।
यावत्कालं तीक्ष्णाशुद्धया पद्ममपत्रोधमभेदकम्।
प्राणायामविधो तावनन्त्राणगानमुच्यते।।३८।।
सव्यहज्ञते सव्यजानुर्स्पशनं यावदाचरेत्।
यावत्कालं[18] प्रकृर्वीत मात्रमिर्गणनं द्विजः।।३६।।
यावदांगुलिनिः स्वाने जायेते तु परनतप१६।
तावन्मात्राभिर्गणनं प्राणायामं चरेदबुधः।।४०।।
प्राणायामं बिना सर्व कृतं यत् कर्म निष्फलम्।
प्राणायाममतः कुय्र्यात अनतःकरणशुद्धये।४१।।
मनसश्च मदा शुद्धिर्जीवस्य च महीपते।
कायिकं वाचिकं पापं मानसीयं परं च यत्।।४२।।
प्राणायामोद्वहेदाशु विधिनानुष्ठितो यदा।
अनेन विधिना यसतु प्राणायामं चरेद् बुधः।।४३।।
सर्वपापेः प्रमुच्यनते कोटिजनमार्जिते सरपि।
ष्वासः कालश्चरोगश्च शिरः श्रोत्रक्षिवेदना।।४४।।
जायेते च तथा कलेशाः प्राणयमाव्यतिक्रमात्।।४५।।

सूत उवाच

तस्मात् संयतचितात्मा यरेत् प्रणवमुत्तमम्।
सुखारोग्यबलोत्कीर्तिप्रदं[२०] पापमोचनम्।।४६।।
ये कुर्वन्ति नृपं प्रति प्रकथितंधता पवत्रात्मना।
प्राणायामविधिं समस्तकलुषध्वंपद्रं भूतले।।४७।।
त वे सर्वसुखं विभूज्य सततं शेषे च मोक्षप्रदम्।
गच्छन्त्त्यब्जदृशः पदं मध्मुमिदौ भूमा सुराणां वराः।।४८।।

इति श्री सूतसंहितायां नीलाद्रिमहोदये प्रणववर्णनं नाम
एकपंचाशत्तमोऽध्यायः।

FOOTNOTES

१T सुपाशुभ्राजमानां। २U ये कुय्र्या। ३U प्रोक्तं। ४T भवतः। ५T पुटिते च यः। ६M सौते। ७M तयासो। ८U देश। ९U न सः। १०U देशिकेन्द्रः। ११U च्चदु। १२T रेचकानां। १३M,T,U किंजल्क। १४M,T हरिं। १५T नृप। १६M,T,U तावत् कालं। १७T नृप। १८T परं पातकमोचनं।

द्विपंचाशत्तशोऽध्यायः

ब्रह्मोवाच

अथ देहस्वरुपस्य भावनां[1] वर्ण्यतेऽधुना।
यदज्ञात्वा योगिनो यान्ति तद्धाम परमं हरेः।।१।।
योगीश्वरो हरो यतु कुरुते योगिसिद्धये।
अन्ये च साधका यत्तु कुर्वन्ति[2] शुद्धमानसाः।।२।।
साधकानां हितार्थाय गृहयाद् ग ुह्यंतरं च यत्।
तदहं सम्प्रवक्ष्यामि यथमोमक्तविधिना नृप।।३।।
मण्डूकाधारपृष्ठेऽपि सुषुम्णा सम्प्रवर्तते।
तदूर्ध्वदेशे विश्वात्मा कालरुद्रो विराजते।।४।।
पद्मासनातया नाड्यां ध्यायमानस्त्रिलोचनः।
जटामुकुटधारी च तदूर्ध्वे प्रकृतिः परा।।५।।
मूलप्रकृतिविख्याता द्विभुजालवलतायुध।
रक्ताम्बर तडिद्गोरी तत्र नाड्यां सुशोभना।।६।।
तस्योपरि पुनमार्म्यामथ्मरशक्तिर्गुणात्मिका।
निर्गुणा सा च शंखारि गदाम्बुजकरा हरा।।७।।
पदमासना रक्तवक्त्रा तत्र नाडंया व्यवस्थिता।
तदूर्ध्वदेशे कममइश्चतुममरमंघ्रिं महीबलः[3]।।८।।
तन्नाडी कल्पितासथश्च सवपाश्वोगदगतनाडिकः।
तन्नाड्याकलितो जिह्च पूज्छदेशांगचूडकः।।६।।
अनन्तो नाम नागस्तु विश्वाधारो विराजते।।१०।।
अनन्तरूढोद्गतनाडकोदत्सव्यांध्रिरेजानवनीरदश्रीः।
गदारिशंशाबूजमनोज्ञपाणिस्तिष्ठन्नसी रूज्ञवराह एव।।११।।
तद्धन्तोगतनाडिकोपररिलसत् पातालजोकं सुधा
वर्णश्चासित तदूर्ध्वतोऽस्ति चरसां पूर्वन्तं नामकम्।।१२।।
विभ्रच्छामतरं तदूर्ध्वकपरे पीतं ततं निर्मलम्।
नाम्ना ख्यातमहीतलं सुविपुलं तसयोपरिष्टात् पुनः।।१३।।
भक्तं[4] तच्च तलातलं जियते तावम्नमोज्ञं ततः
कृष्णं सुष्टुलिं ततोऽपि वितलं रक्तं च पीतं तलम्।।१४।।
पातालादितलान्तमद्मुततमं तत् सप्तलोकं वभौ
तन्नाड्या परिगुम्मितं क्षितिपते तस्योर्ध्वदेशे पुनः।।१५।।
आधारनामकें चक्रं चतुर्दलसमन्वितम्।
दलेषु रक्तिमायुक्तं तन्नाडया परिगुम्फितम्।।१६।।

दले दले वकारादिमकामरानतक्षराण्मिा चम।
समुशक्तिमूर्तितत्त्वानि वाहनायुधसम्भृतः।।१७।।
तनमध्ये डाफिनी नाम देवी पद्माना शुभा।
रक्तांशुका पंचमुत्री नानाभूषण भूषिता।।१८।।
श्रुवं पद्मं चाक्षसूत्रं पुसतकं भ्रिती सती।
तस्योदरे विदुशवर्णरम्यो लम्बोदरोऽज्वासन एष देवः।
पाशांकुशैष्वाभ्यचारुहसतः स शक्तितो मूषिकपत्र ईड्यः।।१६।।
तच्चक्रोद्गतनाडिकाकोपरि लसत् विद्युतः समाभं पुनः।
चक्रं तत्षटपत्रकं दलगतैबादयैलकारान्तकेः।।२०।।
तत्तवेः शक्त्या च मूर्त्या युतमधौ विलसन्मध्यदेशे तदीये
देवी सा राकिनीयं कमलवरगता वेदवस्त्रान्तभूषा।।२१।।
दण्डं घण्टां कपालं वरमसयमसिं बिभ्रिति हस्तपद्मेः
तस्याश्चास्तेऽज्ज्वलनमामम वसति च सुतरां चोदरे निर्दरेऽस्मिन्।
हसतोद्यद्दण्डपुसतस्रगमृतविसरभ्राजनोध्येय एव
क्षोषी देवेः स्वशक्तिः स्फुरिततरनिक्रोडदेशः सुदेशः।।२२।
तद्धच्च्वक्रोदगतनाडिकाभिर्ग्रस्तानना कुण्डलिनी त्रिवृत्ता।
अधोमुखी प्रोद्यतपुचददेशा सुप्ता च नाड्यूर्ध्वतले विशाले।।२३।।
तदूर्ध्वदेशे वरनाभिचक्रं दिक्पत्रशोभं घृतरत्नकान्ति।
उकारादिफंकारान्तेर्वर्ण्णैः प्रतिदलं युतम्।
मूर्तिशक्तिकततवेश्च तादृशं नाभिचक्रकम्।।२४।।
तत्रस्था काकिनी नाम त्रिमुत्री कमलमसना।
नासनामरणसम्पन्ना प्रतिवक्त्रं त्रिलोचना।।२५।।
दण्डं खडगं कपाल च वज्रमेवं व बिभ्रती।
शंखचक्रगदापद्मराजत् करचतुष्टयः।।२६।।
लक्ष्म्या च सहितः श्रीमान् पीतवासा ध्नद्युतिः।
विष्णुस्तदीयोदरगो घ्येयो ध्यानपरेर्नरैः।।२७।।
तदग्रदेशे दरफृल्लपद्ममधोमुखं चाष्टदलं च शुक्लम्।
क्रमेण चाष्टाक्षरवर्ण्णरम्यम् तन्नडिकास्युतगतोर्ध्ववाडम्।।२८।।
तदेव जीवसवपदं प्रसिद्धं पापानि लोल्लासितममस्य तस्य।
स एव दीपस्य शिखव भाव्यो देदीप्यानो हृदि संयमज्ञौः।।२६।।
तसयोर्ध्वदेशे रविशंखपत्रं पद्मं सुवर्ण्णा प्रतिमप्रभं तत्।
ठान्तेश्च कादेः कलितादलेषु तनमूर्तिशक्तयुतम तत्त्वयुक्तम्।।३०।।
मध्ये तदीये द्विमुखी च कृरुणा सा साकिनी नाम चतुर्भुजा च।
त्रिशूलकं खर्परक्षसूत्रम् सतुम्बरं च दघतीं प्रसन्नाम्।।३१।।
तदुदरवरपीठे दिव्यदेहं शिवं तंः हारेण परमशूलस्वर्णघण्टाढ्यहस्तम्।

शिरखि रविशाशिनेत्रं चारु पद्मासनस्थं।
रजनिचयकानतं कान्तया लक्ष्यमीझे।।३२।।
तद्धक्त्रादेशेद्भव[9] नाडिकायां देदीप्यते षोडशपत्रममद्मम्।
स्वरेश्च मूर्त्यादियुतेर्दलेषु स्तुत्यं च युक्तां प्रममीदृशं च।।३३।।
तन्मध्यभागे जयति त्रिशूलं वज्रं दधाना स्फुटविदुममा भा।
सा डाकिनी नाम लसद्विभूषा पद्मासना रक्तपयोदवक्त्र।।३४।
तस्याश्च देवयाः परमोदरेऽस्मिन्नात्माविशुद्धुतिरिच्यमानः।
श्रुतिसमृतिसपष्टतरार्थदेव्यः सद्यः सतां हृदय विकासनथी।।३५।।
तत् षोडशदलाम्भोजवक्खोदयन्ना दिकोपरि।
घण्टिकास्ते तदुपरि प्रणालप्रतिमोऽपरः।।३६।।
तदूर्ध्वे नासिका चासते नासिकोभयतः शुभे।१०।
चन्द्रसूयात्मके नैत्रे तदूर्ध्वे ते भ्रुवो शुभे।।३७।।
तन्मध्ये वर्तते हंसः सोऽमित्युंच्यते बुधेः।
तदूर्ध्वेदेशे या नाडी तत्राबजं द्विदलं स्म्दतम्।।३८।।
तत्र हंक्ष वर्ण्णयुगं दधत् शुभ्रतमं शुभम्।
तत्रास्ते लाकिनी नाम षडाननमनोहरा।३६।।
डम्बरुं चाामालां च पडकीजं खर्परं तथा।
हसतेश्चतुमिमर्दधतमी पद्मासनमनोरमा।।४०।।
दिवये तसयाश्च देव्याः विलसतासतरां निर्मले चोदरेऽस्मि.
न्नित्यंसत्यस्वरूपः श्रुतिचयनिपुर्णर्वेद्यमानः परात्मा।
योगारूढेरमूढेर्नियमितहृदयेर्योणिभिश्चन्त्यमानो
ध्यानाशक्तेश्च मुक्तेः क्चदयिहृदये वीक्षितो व्यापको यः।।४१।।
तदूर्ध्वभागे परने प्रसिद्धमयूरपूच्छांशुकवर्णपक्षा[11]।
सिंहाघ्रिवद्पादचतुष्टयाझ्रया या बालदेशक्षरितामृतश्रीः।।४२।।
मनुष्यत्रक्त्रामहिषात्रिशृंगा सद्रोणचंचूद्गतनाडिकासो।
गोकर्ण्णयुक्ता चरणायुद्योग्र कोटिस्थलाभात्यजापा कृपालुः।।४३।।
अजया नाम या देवी गायत्री सोच्यते बुधैः।
तज्जपासक्चचितानां ब्रह्मासाक्षात्कृतिर्भवेत्।।४४।।
अजयोर्ध्वपादे सहस्त्रपत्रं कमलं तमिद्वमलं विमाति लोके।
प्रतिपत्रकरकारदिवर्णाः कलनीयाः कुशलेरथ क्षमस्व।।४५।।
सहस्त्रपत्राम्बुजमध्यमागे या याकिनी नाम विरजातेऽसो।
पद्मासना सपतमुखी प्रसन्ना मुण्डाद्बहसता धृतचित्रवर्ण्णा।।४६।।
तदीयोदरे सुन्दरे शुद्धमूर्तिर्गुरुर्देवतानां[12] गुरुमति नित्यम्।
अभित्यद्बहस्तं स्वकानतांगसंगह समस्तप्रससता श्रुतिस्मु त्यतीकः।।४७।।
तसयोपरि त्रिकोण[illegible] मण्डलं विलं शुभम्।

हमित्येकाक्षरारम्यं राजते रजतप्रभम्।।४८।।
तस्योपरिष्ठादतुले विमाने यो नीलचक्राद्युतिराजमानः।
सुवर्ण्णवर्णस्फुटरत्नसिंहासनस्य शून्यस्थलमेव यः स्यात्।।४६।।
ओमण्डुकाधरमनारतं[13] यः पूज्या[14] मुदा ह्रूमममजपादिकेषु।
शून्यालयान्तं प्रतिमाव्य कुर्यात् कर्मात्र सोख्यं परिपूज्य मुक्तः।।५०।।

सूत उवाच

एतां ये भावनां कृत्वा यत्कर्म कुरुतेऽप्रियः१५।
तदेव कोटिगुणितं ब्रह्मोरीतामिति द्विजाः।।५१।
एतद् भावनया विना न हि सुखं प्राप्तं द्विधा याजकै
र्यभत्कर्मकृतं[16] य तत्तु निष्फलं तेषां न शुद्धं मनः।
तसमाद् सत्नतया हिताय सहसा तावन्जिसय क्षितो
लोकसयासय च संकुशोरनुदिनं संक्षिप्य कुर्ययादिदम्।।५२।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये द्विपंचशतमोऽध्यायः।।

FOOTNOTES

१T वर्ण्णीनां। २T,U कुर्वन्ति। ३U महीबलः। ४U रक्तं। ५U पुन। ६U शुक्रं,U संख्य sl. 24, b,c.d are absent in T। ७T विरतं। ८T तद्वस्त्र। ९T नाम्ना। १०U प्रसिद्धा। ११ मर्ति is absent in T १२U मूर्ति। १३T मतरितं। १४U पूजा मूदा। १५U यि यः। १६U र्यतत् कर्म।

त्रिपंचाशत्तशोऽध्यायः

ब्रह्मोवाच

तादृशीं भावनां तु कृत्वा पूजकसत्तमः।
वक्राणां च यथा कुर्यानन्यरसान् षण्णां परन्तपः।
तथैव षोडशाधारभावनां च यथा चरेत्।
श्रूयतां भवतां तावत् परत्रेह च शर्मणे।।१।।
प्रतिपृचक्रं यथा ध्यानन्यासो व देववर्णयोः।
मूर्ति[1] शक्तिकलत्वनां[2] कथयामि च साम्प्रतम्।।
आधारे वेदपत्रे च वादिसान्तान् स बिन्दुकान्।
मेदोऽस्थिममज्मजाश्चचक्रांश्च तत्त्वान् देवान् तथा शृणु।।३।।
बलं वृषधनं वृषहंससज्ञो सूक्ष्मां च सन्ध्यां क्रमतो हि देवि[3]।
प्रज्ञा प्रमे चन्द्रसमानभासा भयावरस्रग्ग्रचानादि दिव्या।।४।।
आधरपदकेरह मध्यदेशे स वाहानं शेणितवर्णरम्यम्।
पाशांकुशोष्वाभयहस्तपंदमं वन्देऽरविन्दे स्थितमीशपुत्रम्।।५।।
तत्र गन्थादिना तांश्च विधनेशं मनसाऽर्च्चयेत्।।६।।
अनावलिकमलयेऽयक पीठे विद्युतप्रमे षट्छदखिदीप्ते।
वरो मयूरो लमिताः षडर्णाः प्राणोमतिजीर्वनोऽनलेन।।७।।
तत्त्वानि च त्वामनुवर्ण्णितानि देवाश्च[8] देत्यश्च परस्परं[9] च।
विद्युत्प्रभास्तुत्वमाहः[10] स्वरूपाः पीठेश्वरानन्दरताः प्रसन्नाः।।८।।
भूधरा विश्वमूर्तिश्च वेकुण्ठः पुरुषोत्तमः।
बला बलानुजश्चेव षडेते पुरूषाः स्मृताः।।६।।
क्लेदिनी च तथा क्लिन्ना वसुदा वसुधा परा।
परायणेति विद्युदभा अंकुशाम्बुजकार्मुकाम्।।१०।।
पुध्यवाणानफं धारयन्त्त्यां[11] मदविभ्रममम्बरा।।११।
षडम्मोजिमध्ये स्मरं भावयेतं दधानं धनुः पाण्यमेतच्छरांश्च।
रतिप्राणबन्धुं सुशोणांगमुच्चैर्जयन्तं जगतं सवमुग्धं[12] नमन्तम्।।१२।।
स्मर मेतादृशं भूपं षट्पत्रवरपद्मजे।
ध्यात्वा गन्धादिना तावत् मूर्त्यादोश्च ह१दार्च्चयेत्।।१३।।
मणिपूरे दशारे च नीलाम्बुज समत्विषी।
इकादिककरान्तं[13] न्यासं कुर्याथथाविधि[14]।।१४।।
प्रणवाद्या· विन्दुयुताः क्रमात् भूपालसत्तम।

नन्दीनरो नरः कश्चित् हरिः कृष्णश्च सतयकः।।१५।।
सात्वतः शोरिः शूरश्च जनार्दन इतीरितः।
देवानां गण हत्युक्तः शृणु देवि[15] वदामि ते।।१६।।
स्थिति रुद्धिः समृद्धिश्च शुद्धिवृद्धिस्तथा पुनः।।१७।।
भूतिर्मीतिः क्षममा रमा उमा तादृशी[16] कीर्तिता।
ताः श्यामा ज्ञानमुद्राश्च वरामयम्गुजोज्वलाः।।१८।।
चक्षुः रोत्रपादगन्ध्रसरूपेः स तत्वकेः[17]।
स्पर्शः शब्दमनोहर्ता तत्वेरेतेः समुज्ज्वलाः।।१६।।
वन्दे विधिं नाभिसरोजमध्ये किंजल्कवर्णं च चतुर्मुखं तम्।
स सक्तिकं हंसवराधिरूढं दण्डस्रगम्मः पदपुस्तहस्तम्।।२०।।
सहसा मनसा तत्र तमार्च्य चन्दनादिना।
अनाहते द्वादशारे पद्मरागसमप्रभे।।२१।।
लकादिभिश्च[18] ठाकरान्तेः सानुस्वारेः पृथक् पृथक्।।२२।।
युक्ते[19] तेषु[20] मात्मभूता देवा देत्यश्च तत्वतः।
चक्री गदी तथा शांर्गी शंखी चैव हली तथा।।२३।।
मुषली शूली पाणी च अंकुशी च मुकुन्दकः[21]।
नन्दी त्यनाहतास्तस्या दोः देव्य निबोद्य मे।।२४।।
जया दुर्गा प्रभा सत्या चण्डी वाणी विलासिनी।
विजया विरजा विद्या चिनन्दा यमुनेति च।।२५।।
पुहव्यम्ब्वगिनवाय्दाकाशपाणिपायुयुगं पदेः।
वाक् घ्राणरसनायुक्तेस्तत्वेयूर्ता हरिप्रभा।।२६।।
वरामीत्याम्बुजद्वन्द घारयन्त्यो मनोरमाः[22]।।२७।।
हृदयजलददेशे विष्णुन्दिोवराभं
करकलितगदाब्जध्यानतृचछद्म चक्रम्।
कममलवलयहर प्रस्फुरत् कुण्डलादि
प्रचुरतरविभूजं श्रीयुतं भावयेऽहम्।।२८।।
मनसा भनवयेद् विष्णुं हृच्छक्रे रविपत्रके।
तत्र मूत्यादिकां चेव गन्थादि विधिमार्च्चयेत्।।२६।।
विंशुद्धे षोडशदले चन्द्रकान्तिसमप्रभे।
स्वरवर्णान् विजानीहि स्फुरत्तरविराजिताम्।।३०।।
देवनेषां प्रवक्ष्यामि सर्वसिद्धिफलप्रदा।
केशवोऽथ नारायणो माथ वोऽनन्त ण्व च[23]।।३१।।

गोविन्दो विष्णुपरो मधुसूदन एव च।
त्रिविक्रमो वामनं च श्रीधरस्तदनन्तरम्।।३२।।
हृषीकेशः पद्मनाभो दामोदरोऽर्च्चयेच्च तान्।।३३।।
वासुदेवः संकर्षणः प्रद्युम्नश्चानिरूद्धकः।
स तत्त्वानन्दरुचिरा विज्ञेयाः स्वरदेवताः।।३४।।
आनन्दत्वं पुरतः प्रविष्टम् आनन्दतातद्धिततये प्रविष्टा।
चितत्त्वमुक्तं त्रितये च सम्यक् तुरीयतः स्यादपरेण तत्त्वम्।।३५।।
तदविष्णुतत्वं ज्रदेतहृन्नतम् व्याप्तं परात्मा सहसा चराचरम्।
वर्द्धिष्णुतत्वं खलु षड्विमेदं ज्योतिष्कमत्रत्वमथामृत त्वम्।।३६।।
लीला ततोऽथवा भवतत्ववारः श्रीवासुदेवस्य स्मोद्यशक्तेः।
इलात्वमाद्यं पुरुषं प्रधानं प्राणसततः क्रोध न तत्तव नाम।।३७।।
एतानि चैव तत्त्वानि कृष्णवैभवरूपतः।
कथितानि विशुद्धेऽस्मिन् विभूति न महाप्रभो।।३८।।
कीर्तिः कान्तिस्तुष्टिः पुष्टिः धृतिः शान्तिः क्रियाः क्रिया रमाः।
मेधा हर्षा तथा श्रद्धा लज्जा लक्ष्मीः सरस्वती।।३९।।
रतिः प्रीतिरिति प्रोक्ता स्वदेव्योप्यमृतात्मिकाः।
शुद्ध स्फटिकसंमकमाशाः सुधाकुम्भलसत्पराः।।४०।।
घुर्तोत्पलवराभति धारिणोऽकृतविग्रहाः।।४१।।
ध्यायेत् कण्ठसरोयहे शशिकला तज्जह्नुकन्या जसन्
मौलि शंकरभिन्दुकुन्दसुशं सौम्यं लसत्त्यम्कम्।
हसतोल्लासितरात्रिशूलपरशुस्रग्डम्बरूं सुन्दरम्।
चंचद् व्याध्रगजेन्द्रचर्मवसनद्वन्द्वं तमन्धिच्छिदम्।।४२।।
तदुत्तम्मनसा तत्र गन्धवादिविधिनार्च्चकः।
षोडशच्छदके शम्भुं मूर्त्यादिसहितं यजेत्।।४३।।
शरदुदितशशांके दीप्तकेरुहांके
द्विदललसितवर्णो हंससंज्ञो स बिन्दु।।४४।।
क्रमत इह गतो तो श्रीवराहनृसिंहो
हयमवरपरतत्त्वक्रोधतत्वो क्रमेण।।४५।।
निशम्य विद्युता शक्तिरितिष्ट चक्रमातृका
द्विदले केवले हंस्वर्णयुक्तं विधुप्रभम्।।४६।।
मूतयादिसंहितं तत्र पूजयेद्धतसत्तम।।४७।।
उकारसमरणोर्ण्णरश्मिविकसदपद्मेषुतेषु स्फुरद्

पत्रेषु स्वरदेवताचयलसद् रूपेषु यस्त्वर्चकः।।४८।।
नित्यं तवादिदं विमामत्य नृपते[२५] शुद्धेन ते रेतस[२६]
चोर्ध्वं वक्त्रयुतेषु भावनवशाभाः पूजयेत् भक्तितः।।४६।।
पुण्डरीकादधो देशे आज्ञया ऊर्ध्वतः क्रमात्।
भगवद् मवेवेर्मन्त्रैः षोडशाक्षरनिर्णयः।।५०।।
आध्रीयते पुण्डरिकं सर्वतत्वपरायणम्।
आधारः कथ्यते तेन कलाभेदः कलात्नाम।।५१।।
रूद्राक्षविवरं चादो कामरूपं द्वितीयकम्।
अद्रियाणं तृतीयं स्याद्बलारन्ध्रं चतुर्थकमम्।।५२।।
पूर्ण्णावलं पंचं च षष्ठं स तारसंज्ञकम्।
सप्तमेकास्त्रपीठं च अर्द्धचन्द्रमत्थष्टकम्।।५३।।
निशीधिकाक्षं नवमं नादाख्यं दशमं सममृतम्।
एकादशे च नादान्तं द्वादशे क्षीरवारिधिम्।।५४।।
त्रयोदशे सहस्त्रारं तदूर्ध्व चन्द्रमण्डलम्।
चतुर्दशं पंचदशं शिवशक्तिपदं विदुः।।५५।।
नित्यस्थलं षोडशे स्यात् पुण्डकरीदमिदं विदुः।
तदूर्ध्व यत् सहस्त्रारभूर्ध्वकालमधोमुखम्।।५६।।
तदन्तं विजानीह तदात्रपत्रलक्षणम्।
सहस्त्रदलछत्रानतर्मणिराज विराजितम्।।५७।।
राजज्योतिर्बह्मानन्दवस्तु[२७] राजते प्रभया प्रभोः।
सच्चिद्ब्रह्मानन्दवस्तु परस्य परमात्मना।।५८।।
प्रभया मिण्डतं स्थानं हंसबिम्बायितं जगुः।
बहिरर्थविदीये ते हंसजयोतिपरायणाः।।५६।।
वस्तुतः तत्पदं नित्यं सर्वाकृतिसमनिवतम्।
अथ रुद्राक्षविवरं स्मरेच्चन्द्राग्निसन्निमम्।।६०।।
विन्ध्याकारं शरीरं च चिदाकायासहंपरं महः।
अपां बीजं तत्र गोरं लक्ष्मीनारायणत्मकम्।।६१।।
शरण्वोरमसश्लिष्ट इलया व निषेवितः।
यो नामया कालक्रान्तपरं ज्योतिर्मयो विभुः।।६२।।
अस्य पारायणाम्यासात् सिद्धिः स्याच्छरणागतः।
नारायणः प्रसन्नः स्यात् लीलाभ्यां निषेवितः।।६३।।
इत्येवं प्रथमाकारः कथितः सर्वकामदः।

अधुना कथ्यते भूप[२२] द्वितीयाधारनिर्णयः।।६४।।
कामरूपं महापीठं विद्युदग्निसमप्रभम्।
त्रिकोणमध्यतस्तस्य द्वितीयं बीजमुन्येत्।।६५।।
हरिरमा शान्तयुक्तो योगमाया महोन्वितः।
उद्दभानुसमोध्येयो विद्यामोहं तरेत्ततः।।६६।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये त्रिपंचाशत्तमोऽध्यायः

FOOTNOTES

१U मूर्ति। २T,U तत्त्वानां। ३U देवी। ४T देवांश्च। ५U परं परातः। ६U स्तत्त्व। ७T धारयन्त्या। ८T देवी। ९U तादृशकीर्तितः। १०T समुज्ज्वलाः। sl. 19b is absent in T ११U कादिमिश्च। १२U युते। १३T तेषां U तेषा। १४U मुकुन्दकः। १५T मनोहाराः। १६U रेततः। १७U तदा तं। १८U व्याप्तं। १९T भूप। २०T भूपते। २१U चेतसा। २२T नृप

चतुःपंचाशत्तशोऽध्यायः

ब्रह्मोवाच[१]

महीपते ते पुरतोद्वितीयाधारनिर्ण्णयः।
कथयित्वातृतीया स्वास्थारस्यं फलमुच्येते।।१।।
नाडिकांशं च षटकोणं चन्द्रकान्तिसमप्रभम्।
नीलजीमूतसंकाशं तात्तोयं तत्र चिन्तयेत्।।२२।।
कमलेशान्विता लक्ष्मीस्तुरीया पररिमझिाता।
योगमाया च विमला परं ब्रह्म प्रकाशिनी।।३।।
ध्यानेनेधिं[२] परानन्द कृष्णवामेऽभिसिध्यते।
तात्तीयाधार एषो हि चतुर्थः काम्यतेऽचुना।।४।।
जालन्धरं महापीठं जबाकुसुमसंन्निभम्।
द्वयुर्वाहतिकं मध्ये गोविन्दं व्यानिनीयुतम्।।५।।
योगमाया परं ब्रह्मराजितं परमं मनुम्।
ध्यायेदनेन गौपालस्नेहाच्च[३] कथमाम्यमहम्[४]।
पूर्ण्णयोलमहापीट ममण्डलाकारमण्डने।।७।।
पटरागप्रतिकाशं[६] उपरमानन्दमव्ययम्।
ईन्दिरालिंगितं पीतं योगमया परायणम्।
अनेन जायते प्रीतः श्रीकृष्णे सुहृदम्बरे।
पंचामाधार एषोऽत्र गदितो नृपसत्तम[७]।।६।।
इन्द्रनील प्रतिकाशं सफटिककांचनसन्निभम्[८]।
ध्यानेनानेन जगतां प्रकृतिः प्राकृतासना[९]।।१०।।
नाथ एको जगन्नाथ विहर्ता प्रभुरीश्वरः।
यथा प्रकृतिरीशस्य, विलासायाखिलं जगत्।।११।।
शोरीः कृत्याश्चिष्टदेहः कलाविन्दुसमन्वितः।
एकान्ते कांचनाभासे मुक्ताच्छवि धरो मनुः।।१२।।
ध्यायेज्जगत्कार्यरूपं[९९] स्वकान्तं कृरूणमीश्वरम्[१०]।
बहुवल्लमतामस्य विस्मरेत्तेन केशवम्।।१३।।
विनासिनी स्वयं कृष्ण कान्ता स्वस्येव रंजकम्[११]।
नाथस्तत्र मन्त्रध्यानसिद्धेः ज्ञज्ञनं च तादृशम्।।१४।।
इत्येवं सप्तमाधारः कथितो ज्ञानदायकः।
अष्टमाधारमधुना निगदामि महीपते।।१५।।

अर्द्धचन्द्रसमं पीठं विद्युदग्निसमप्रभम्।
रसदं कीर्तिसंश्लिष्टं कालब्रह्ममयं तथा।।१६।।
शुद्धानुरागमुदितं बल्लभं प्रणबल्लभम्।
अत्र पारायणाभ्यासात्[१२] बल्लममत्वंमम भवेत् प्रभोः।।१७।।
इत्यष्टमाधारफलोऽर्थविज्ञः करोति यः कर्मण एव धीरः।
सुखं समामभुज्य तरत्र लोके सच्छर्म कर्मान्वित एव गच्छेत्।।१८।।
परकीयानुरागाय यथा दुलर्लभ वस्तुनि।
निरोधिकाम्ममोदिनिमा अर्द्धचन्द्र तया कृतिः।।१६।।
तन्मध्ये चिन्तयेन्मन्त्री धरित्री द्वितीयान्वितम्।
केशवं योगमायाढ्यं परं ज्योतिः परं स्मृतम्।।२०।।
सा धरित्री प्रेमात्मना सख्या युक्ता विलासिनी।
अन्योऽन्याश्लिष्टसर्वागी तोषयेत् केशवं परम्।।२१।।
ध्यानेनाने सततमम्यायशेन गदाग्रजः।
प्राप्नुयात् वासमति सा रहस्यं ब्रजनाथयोः।।२२।।
अयं नवाधार इति प्रसिद्धिप्रदः[१३] सदा[१४] साधुसमाधिभाजाम्।।२३।।
नादं विद्युतप्रमं शुद्धं मृणालतन्तुसंनिभम्।
भगवन्तं भावयतु[१५] कान्त्याश्लिष्टं स योगिकम्।।२४।।
परं ब्रह्ममयं दिव्यं प्रेममम्भमक्तिप्रसिद्धये।
दशमाधार एवोऽत्र सेवतां सर्वकामदः।
अपरं कथयिष्यामि त्वाधारं रुद्रसंख्यकम्।।२५।।
नादान्तं पाण्डरं शुद्धं चक्रावर्त स्फुरद्रसम्।
प्राणेशं चिन्तयेत्तत्र प्रवालमणिसन्निभम्।।२६।।
कीर्तयोगान्वितं ज्योतिः प्रसिद्धं परमायनमृ।
अनेनेवानुसन्धानात् प्रेमप्राणो भवेत्तसुधीः।२७।।
इत्येकादर्शकाधारः कथितो धर्मवर्द्धनः।
क्षीरोदिधिीरे शुभ्रं प्राणेशं रससंमितम्।।२८।।
आदेन रससारेण विलासन्तं कलागुरुम।
योगमाया ब्रह्मवस्तु परितं स्वानुभूतिदम्।।२६।।
अनेन प्राप्नुयाद् भक्तिः सिद्धिप्रेमानुमूतिजम्१६।
कृष्णं संखं नवास्वादुं मधुरं मधुसूदनम्।।३०।।
द्वादशधामित्याहुः वदन्तीति मनीषिणः।
त्रयोदशाधारमहं कथयामि महत्सुखम्।।३१।।

सहस्त्रारं महापदम् सहस्त्रकिरणोज्वलम्।
कलात्मिका समाश्लिष्टं आनन्दं तत्र चिन्तयेत्।।३२।।
योगमामया ब्रह्मरूपं शरचम्चमन्मद्रसप्रभम्।
ध्याननेधिं सुतीव्रेण मक्तरक्षिका भवेत्।।३३।।
भजतं[२०] श्रीकृष्णचन्द्रं नानामावकलास्पदम्।
इति त्रयोदशाधारः कथितो नृपसत्तम[२१]।।३४।।
चन्द्रमण्डलमेवादी द्रवबह्मेककारणम्।
तद्वै शिवपदं प्राहुः शु'स्फटिककसन्निभम्।।३५।।
परानन्दशिवं तत्र यं सेव्यमिममित ते जगुः।
हलधृक् रेवितीयुक्तः तुरीयवासतोऽमलः।।३६।।
योनिमाभय ज्योतिषाक्तः सहस्त्रफणिमस्तकः२२।
वर्ण्ण भेदेन जगतः कलातस्तत्वमीयते।।३७।।
चतुर्दशाधर इति गदितो गदतां वर।
अतः परं पंचदशाध आरं शृणृ महीपते।।३८।।
देवकालामतो विद्धि ऊर्ध्व सिद्धगणैः सदा।
ध्येयमष्टाममलमष्टशक्तियमन्वितम्।।३६।।
दद्वद्भानुसमं दीप्यद्रत्नाकीर्ण्ण रसत्मिका।
रमाप्रूम्णानि सहितं योगमाया सहोच्यते।।४०।।
देवीलोकमिमिं केचित् वदन्ति तत्त्वित्तमाः।
रूक्मिणयंशसमुद्भूता यत्रास्ते प्रकृतिः परा।।४१।।
सात्विकी राजसी तामसी गुणात्मिका गुणातीता।।४२।।
इति पंच भेदाः, तेः, तथा च श्रुतिः—राजसी वाणी तामसी
पार्वती। गुणाम्कि विद्युदमती। गुणातीता ईशावास्यामिदमिति।।४३।।
इति पंचविस्तासां कीर्तिता यत्र वे त्रुतिः।
पंचभेदैः जगत्सर्व प्रकाशयति सेश्वरि।।५३।।
इति पंचदशाधारः कृण्वतां कुर्वता तथा।।४५।।
सर्वपापक्षयकरः सर्वदा सर्वकामदः[२३]।
तदूर्ध्व पुण्डरीकं च नीलं दिव्यं सदाचलम्।।४६।।
सप्त पदाचच तं प्राप्य गायत्रीमिरधिष्टितम्।
तत्र कृष्णपरममन्त्रमेकार्ण्ण चिन्तयेत् सुधीः।।४७।।
आनन्दं कृरूणसंकाशं धरित्रीं कांचनप्रमाम्।
तुरीयामरूणामान्तां कलां शुक्लां चतुर्मयम्।।४८।।

बिन्दुं विचिन्तयेन्नित्यं ब्रह्म सच्चित् परात्परम्।
षोडशाक्षर एषोऽपि कुर्वतां स्मरतां तथा।।४९।।
एतद्भावयुतां तावद् सर्वकाममफलप्रदः।
एवं षटचक्रसच्चिन्तं षोडशधवारसंहतेः।।५०।।
भावनां येऽपि कुर्वन्ति तेऽपि शुद्ध जपादिषु।
पूजासु विष्णेस्ते र्योयास्ततद्भावनाया द्विजाः।।५१।।
विना भावनया तेषां जपहोमार्चनादिषु।
अयोर्ग्यस्तेऽपि तद्विष्णो कर्मणे च न संशयः।।५२।।
ततः कृतं च यत्कर्म निष्फलं जायतेऽनध।
तमाद् यत्नेत कर्तव्या साधकैर्मावमप्यसौ।।५३।।
कृते विष्णेश्च सन्तुष्टः कर्तुः कर्मफलप्रदः।।५४।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये चतुःपंचाशत्तमोऽध्यायः।।

FOOTNOTES

१U श्रीब्रह्मोवाच। २T ध्यायेनेथं। ३U स्नेहद्वरमिवर्द्धते। ४U तृरीयाधार। ५T दता। ६U पद्मरागप्रतिकाशे। ७T राजसत्तम। ८U सफटिका। ९U प्राकृतात्मनां। १०T शैरीः। ११U ध्येयो। १२T कान्तमिश्चरं, U पद्रागप्रतिकाशे। १३U रंजकः। १४U प्रसिद्धः सिद्धिप्रदः। १५U omits सदा। १६T भवयन्तो। १७U सिद्धा। १८U भक्ति। १९U भजतः। २०T भूप। २१T मण्डलः। २२U कलातीततत्व। २३T उदीद्दीभानुसमं दीप्तं। २४U रसात्मिकां। २५T कामकः। २६T विप्रा।

पंचपंचाशत्तमोऽध्यायः

ब्रह्मोवाच

विष्णोर्निगदिता तावत् मातृका कालेशेधिका।
इदानीं मातृका षक्ता कथिते नृपसत्तमृ।।१।।
आधारब्रह्ममरूणं चतुर्दलसमन्वितम्।
वादिन्तेश्चतुवर्ण्णेर्युतं दिव्यममधौखम्।।२।।
प्रणवाम्यासतो मन्त्री प्रणपोच्चारममात्रतः
ऊर्ध्ववक्त्रं चिन्तयित्वा पूर्वादिक्रमतो न्यसेत्।।३।।
प्रणवं पूर्वमुचर्य वादिपण्णां ततः परः[३]।
लक्ष्मी माया कामवाणी बीजं तस्मामन्नियसोजयेत्।।४।।
परमः सहजश्चैव रिजो[३] योग एव च।
आनन्दरय पदेनैव संयोज्य साधकौत्तमः।।५।।
गुप्ता ब्रह्मा कामदझ च शर्द्दोला सा चतुर्थिका।
हृन्मन्त्रं च समुच्चार्य प्रत्येकेन तु संन्यसेत।।६।।
ध्यायेत् कर्णिकायां तु वक्त्रतुण्डमानायम्।
तत्र गन्धादिना त मतु मनसा पूजयेद् बुधः।।७।।
लिंगे स्वाणिष्ठानके च षड्दले ब्वदिलान्तके।
त्रियः कालो वारणं च शर्द्धलिमृतपूर्ण्णकः।।८।।
बकारादीन् पुनश्चान्ते षट् परिवारदेवताः।
क्रीडा मूर्च्छात्वज्ञास्वाज्ञज्ञ नमोऽन्ताः स चतुथिकाः।।६।।
एतत् पदफमान्तराले च मदनं मनसाच्चंगत्।
मणिपूरे दशदले नाभौ यूडादिपान्तके।।१०।।
सबीजं यस्य शुक्तौ च रोविते विवदः स्हृतः।
सत्यस्नापितस्वासौ च मोळान्ताः स चतुर्थिकाः।।११।।
ज्ञाना भद्रा च शान्तिश्च मुद्रा च विक्रिया तथा।
दाक्षिणी प्रौक्षिणी चैव सुक्रिया स्वपिता रमा।।१२।।
चतुर्धर्यन्तानमोऽन्ताश्च शक्तयः कथिताः बुधैः।
शक्तिभिः सहजामंगे कादिठान्तताण्र्णसंयुते।
प्रोक्षणश्चरकाश्च वैजयन्त्यश्च सोपनः।।१४।।
मायायाश्च बलश्चैषतोऽर्थकः पद्य एव च।
अनपायः समाचितै विकल्पोऽनन्तनामकः।।१५।।

शान्तिमुद्रा च प्रीता च विजया च गदा स्मृता।
प्रोक्षणी च तथा किन्ता[४] सचतुर्थी कपालसा।।१६।।
परितात्मा च शोभा च वेदिका सा सशारदा।
नमोऽन्ताः कथिताः स्मयक् मध्ये विष्णुं च चिन्तयेत्।।१७।।
ध्यशयेसत्कर्णिकामध्ये श्यामवर्ण्ण चतुर्भुजम्।
शंखचक्रगदाद्धारिणं वनममालिनम्।।१८।।
विशुद्धे षोडशदले कण्ठस्थाने न्यसेत् स्वरान्।
मायया चित्ररामौ च प्रभृतयः श एव च।।१९।।
प्रियं भागः सिहंनादः पद्मनामस्तयैव च।
प्रभृत्यं च सुमित्रं च हंसः शिवः थ्रियस्तथा।।२०।।
घूम्ररूद्धेन्द्रनानौ चतुर्थर्यन्ताः स्मृताश्च ते।
भद्रा घण्टा च शिखरा षोडशा लोहिता तथा।।२१।।
मदालसा क्षमा चैव रुचिरा सा चतुर्धिका।
सौभाग्या च गुरुम्या च वाणि च त्रियस्त्था[५]।।२२।।
कालस्वदेवता दित्यार्ण्णपूर्ण्ण चैव रामका।
मध्ये च चिन्तयेन्मन्त्री नीलकण्ठं महेश्वरम्।।२३।।
शच्चन्द्रनिभं देवं शूलहस्तमनामयम्।
तत्कार्णिकायामध्यस्थं स्त्रम्बकं पार्वतीधवम्।।२४।।
चिन्तयित्वा तत्र देवं शिवं च मनसार्च्चयेत्।
आज्ञा चक्रे द्विदले च भुवोर्मध्ये सहाक्षके।।२५।।
इन्द्रो दाक्षिण्यपुरुषः[६] एतौ वर्ण्णदिको एतौ।
महाकाली महालक्ष्मीः शक्तिश्चैव प्रकीर्तिता[७]।।२६।।
क्षेऽन्तके च नमोऽनते च परमात्मानमत्तरे।
तत्र गन्धा दिना पद्मे मनसात्मानमर्च्चयेतं।।२७।।
आज्ञा स्वे सहस्त्रानते लं वर्ण्ण तु परिन्यसेत्।
पूरकाय भाग्यवती स चतुर्थी नमोऽन्तुका।।२८।।
समस्तमातृकायुक्ते भ्रजद्गुरुष्को देवते।
नानावर्ण्णसमुल्लसे त्वज्ञानामिधशक्तिके।।२९।।
हंसौकपरिवरेऽस्मिन् सर्वालंकारसंयुते।
सांगोपांगान् गुरुननत्वा हृदा गनधादिना यजेत्।।३०।।
तादृशे कमले दिव्ये सुगुप्तं सुमनोहरम्।
ललाटच्छानि नित्यस्थं लं सं च प्रणवं परम्।।३१।।
पुरा ज्ञाय ततौ भाग्यवत्ये नम इति द्विजः[८]।

इति संचिन्त्य मनसात्मनं गन्धादिना यजेत्।।३२।।
ऊर्ध्वदेशे सहस्त्रारे दिनस्थिरस्तान् प्रवन्यिसेत्
अभिषे[9]कासितौ नित्यः शिवोढेऽनते[10] प्रकीर्तिताः।।३३।।
ऊर्ध्वांगी चैव मेषांगी नन्दा च पार्वती स्मृता।
चतुर्थयन्ता नमोन्ता च तेजौमध्ये प्रविन्यसेत्।।३४।।
सहस्त्रपत्रे कमलेऽव्यक्ता[11] विन्यस्यते द्विजः।
नम इत्येषः स्फटिकमात्री मन्त्रफलं भवेत्।।३५।।
इत्यष्टचक्रविषयो वर्णितो मुनिपुंगवाः[13]।
शक्तः शक्त्यचिनेऽप्येवमन्यथा निष्फलो विधिः।।३६।।
विधिः प्रोक्त मातृकेयमीदृशी पूजकोत्तमैः।
अवश्यमेव कर्तव्यापौरुषी शक्तका तथा।।३७।।
यावद्देवादशक्ता[14] स्ते कर्तृ च चरीसुराः[15]।।
सामान्यां मातृकां कुर्युर्यथा स्यात्त्द्वदामि वः।।३८।।
आधारपद्मं स्मृतवेदपत्रं लिंगाम्बुजं षटछदमुत्तरोत्तरम्[16]।
दशार्णिकं नाभिसारोरुहं तद्ररत्नप्रभं चन्द्रनिभं च कण्ठयम्।
पद्मं पुनश्चारुललाटपद्मं द्युम्रप्रभं पत्रयुगेन युक्तम्।।४०।।
वशी ससौ च न्यसता च मन्त्री बाद्यं चलान्तं क्रमतस्ततोऽर्ण्णम्।
हाद्यं[18] प्रकारान्तमवर्णवृन्दं नाभौ च कादि हृदि ठान्तमेव।।४१।।
कण्ठे स्वराणा कुलमेव घारे न्यसेल्ललाटेन्दुमिदं क्षमेवम्।
नमोऽन्तमायं प्रणवं स बिन्दु प्रत्यक्षरं न्यायासतु द्विजेन्द्रः[19]।।४२।।
आधारपद्ममादिललटपद्मप्रान्तं क्रमाद् विक्रमणान्तशत्रौ।
अनामिकांगुष्ठमध्ययोगादघेमीमुक्तमनिष्ठकासौ।।४३।
तर्जन्यालग्नाघृतपुष्पिकाभीर्न्यासेमृगी शस्ततमः च मुद्रा।
तथ न्ससेन्मत्र विद्रुतमोऽयं षट्चक्रपत्रेषु च वर्णवृन्दान्।।४४।।
वकारादिक्षकरान्तान् संस्न्यस्य निर्मलो भवेत्।
आधारचक्रेऽपि गणेशमेवं षट्पत्रपद्मे स्मरमाशु मन्त्री।।४५।।
नाभौ विधिं हृत्कमले च विष्णुं कण्ठे शिवं चात्मयुगं भुमध्ये।
द्मेण संचनत्य च तत्र तत्र स्थनेऽर्च्चयेन्मानसतस्ततस्तान्।।४६।।
स्वस्स्वस्थानंस्थितास्ताश्च षडंगन्यासदेवताः।
चिन्तयित्वा ततो न्यासान् कुय्यादात्मविशुद्धये।।४७।।
शिरस्यास्यक्षते दृशैः कर्णयोगश्च सफुरद्दण्डयुग्मे तथैवोष्टभागे।
लसद्धपतपंक्त्योः तथा चौत्तमांगे मुखेऽपि न्यसेत्तच्चि वर्णान् स वर्णी।।

बाह्वोर्मूलतलात्कारांगुलितलप्रानतं तु सन्धिस्थले।
तावच्चोरुतलात् पदांगुलितलं तत्सन्धिदेशे क्रमात्।।४६।।
पार्श्वे[२०] बन्धकपृष्ठनाभिहृदये कण्ठस्थले दक्षिणे
बाहौ तत् ककुदि न्यसेत् पनरसौ सव्ये भुजे देशिकः।।५०।।
अथ हृदयतलाद्धपय्र्यन्तमाय्यौ न्यासत्तु हि सकृदेवं सव्यवद्दक्षहस्ते[२१]।
पुनरपि हृदयार्द्धा सव्यपादान्तमेव न्यसनविधिसुविज्ञो
दक्षपादांगुलानतम्।।५१।
पुनः कुक्षो मुखे चैव लिपिन्यासविधिं चरेत्।
आकारादिक्षकरान्तं लिपिवृप्दं सुपावनम्।।५२।।
प्रणवाद्यं नमोऽनतं च प्रत्येकं बिन्दुसंयुलम्[२२]।
समुच्चार्य[२३] प्रयत्नेन तत्त्त स्थानेषु विन्यसेत्।।५३।।
तत् संन्यस्य यथान्यायं ततो ध्यायेत् स देशिकः।
तत्तद्वर्णशतार्द्धमिर्मितपदद्वन्द्वोरुचं तत्कटीनामि–
हृदभुजदण्डकण्ठचिबुकास्थात्। मुत्तमांगांगकम्।।५४।।
मालापीमूय कुमभ ललितवर काम्भोजदेशां सुदेशाम्।
राजत्यंगेरुहस्यं त्रिन्यनरुचिरां भारतीं भवयेताम्।।५५।।
मातृकासौ महीनाथ! चतुर्थघयुता भवेत्।
बिन्दुत्रिता बिन्दुयक्ता तथैर्वेभीयसंयुता।।५६।।
स विसर्गा चतुर्थे ति कथिता बुधसत्तमैः।
विद्याप्रदा केवला स्याद्धनदा सह बिन्दुका।।५७।।
स विसर्गा पुत्रकरी सोऽभया मोक्षदायिनी।
एताच्च्तुर्विद्याः प्रोक्ताः मातृकाः कामदायिकाः।।५८।।
कर्तव्याः देशिकैः सर्वेः कामनासिद्धिसत्वरेः।
मातृकाक्षरवृन्दानां न्यासमुद्रा यथा भवेत्।।५६।।
इदानीं तत्र प्रकटनं क्रियते खूयतां नृप[२४]।
अनामिका मध्यमाम्यां दक्षहस्तसय देशिकः।।६०।।
शिरस्यास्ये च वृत्ते च तासां चैव तु विन्यसेत्।
मध्यमानासिकाम्यां च तर्जन्या नेत्रयोर्न्यसेत।।६१।।
अंगुष्ठेन न्यसेत् कर्णो कनिष्ठांगुष्ठयोगतः।
नसोर्न्यासः प्रयास्तः स्यात्ततर्ज्नी मध्य मे पुनः।।६२।।
गण्डद्वये स्मृते ते चानामिका मध्यमे पुनः।
अनया मुद्रया तावत् सर्वत्र विन्यसेत् बुधः।।६३।।

एताः मुद्रा पंशस्तास्तु मामतृकान्यासर्कणि।
विष्णौः प्रीतिकराः पुण्याः पूजायां सुप्रतिष्ठिताः।।६४।।
अथवा नामिमकांगुष्ठा एकघा[२५] च प्रकीर्तिता।
उष्ठयौर्दन्तपंक्तौ च समाख्याता नीयवरैः[२६]।।६५।।
पुनर्मध्यमया शीर्णे सर्वामिश्च मुखे न्यसेत्।
मध्यमानामिकागुष्ठयोगेन विन्यसेत्त्सनौ।।६६।।
पुण्यैर्वा चेतसा वाऽपि ह्यमावे न्यासमाचरेत्।
मातृका दशवा प्रोक्ता गुप्ता गुप्ततमा अपि।।६७।।
त्वत्प्रेम्णा कथ्यते सेयं विष्णौः प्रीतिकरा नृप[२७]।
शुद्धा च केश्वाढ्या च शक्ति युक्ता स्मृता।।६८।।
श्रीबीजसंतिता तद्वत् कामबीजयुता पुनः।
रामा माया कामबीज सहिता चापि जायते।।६९।।
अनेन पुटिता स्याच्चेत् सर्वसिद्धिप्रदाख्यका।
हंसमन्त्रयुताघासौ सर्वाधमर्षणा स्मृता।।७०।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये पंचपंचाशत्तमोऽध्यायः।

FOOTNOTES

१T भूप। २U परं। ३T विराजो। ४T चिन्ता। ५U त्रियं तथा। ६U पुरुषौ। ७U प्रकीर्तिते। ८T विप्रः। ९T आप्यो। १०U न्त। ११T नालन्ये। १२U विनाशितेणोम्यः। १३T ऋषि। १४U शक्तास्तेताः। १५T अवनि। १६T मुत्तडिदृशं। १७T वितेशसं। १८U डाद्यं। १९T विप्रेन्द्रः। २०U पाश्र्व। २१U भागे। २२U समन्वितं। २३T समुच्चयर्यो। २४T भूप Sl. 63a is absent in T. २५U omits it २६T ऋषिश्वरैः। २७T भूप।

षट्पंचाशत्तशोऽध्यायः

ब्रह्मोवाच

आदौ कुर्य्यान्मातृकामान्तरीयां पश्चाद्बाहयां देशिकेन्द्रः सदैव।
अन्तःशुद्धिर्नैव चेद् बाहृयाशृछिद्धर्न स्याद्समादान्तरीयां चरेद्वे।।१।।
यन्मातृका न्यासक कर्म कृत्वा मर्त्योऽपि देवत्भूपेति सद्यः।
मुद्रामनूहृष्टतथैव दोषान् सर्वान् दहत्येव हि मातृकेयम्।।२।।
मातृकान्यासतः सार्वन् कामानु प्राप्ययूरुत्तमाः।
द्विजा[1] यदा तथा हीनास्त्वयोग्याः सर्वकर्मसु।।३।।

सूत उवाच

मात्काख्यं मनुं चोक्त्वा ब्राह्मणं ऋषिमत्र[2] च।
गायत्रीच्छान्दसं कृत्वा मातृकाशब्द पूर्वकाम्।।४।।
सरस्वतमी देवता स्याद्धलोबीजं तथा स्मृतम्।
स्वराश्च शक्तयः ख्याताः मातृकान्यासकर्मणि।।५।।
चरेद् विप्रान्यासं कुर्याद् यथाविधि।
ऋष्यादिंकं चतुर्थर्यन्तं नमोऽन्तं प्रणवादिकम्।।६।।
कृत्वा त्वनेन विधिना रूण्याउन्यासमाचरेत्।
संपुटीकृत्य स्वकरो षष्ठयनते मन्त्रनामके।।७।।
ततोंऽगुलिचया लग्ने दक्षहस्ते फणाकृतो।
शिरोदेशे रुशिन्यासं३ कुयृर्यादाचाय्र्यवय्र्यकः।।८।।
कनिष्ठांगुष्ठरहितमंगुलित्रयलग्नक्।
करं वक्त्रान्तरे मन्त्री छन्दोन्यासे प्रदर्शयेत्।।९।।
हृदये देवतान्यासं तलेन रचयेद् बुधः।
कनिष्ठ्या विरहितं सर्वागुलिकयोजनम्।।१०।।
करं कृत्वा न्यसेद बीजं शक्तिंचामृषमुद्रया[4]।
विनियोगं ततः कुय्र्यात्करांजलिपुटे पुनः।।११।।
अकारं तु विनायुक्तं प्रणवाद्यं ततः परम्।
कवर्ग बिन्दुसंयुक्तं मुक्त्वांगुष्ठत्रिपर्वणि।।१२।।
अंगुष्ठामया नम इति मन्त्रेण विन्यसेन्नरः।
इकारद्वयसंयुक्तमामद्योपानते चम वर्गकम्[5]।।१३।।
सानुस्वारं च ताराथं कृत्वा स देशिकः पुनः।
तर्जनीभ्यामिमति पदं ब्रह्मिणायां ततो वदेत्।।१४।।

योो मनूर्जायते तेन तर्जनीन्यासमाचरेत्।
आकराम्यां पुटीकृत्य सानुसवरं टवर्गकम्।।१५।।
मध्यमाम्मयां वशडिति मध्यमा न्याकृद् द्विजः।
आद्येकारं तवर्ग च प्रान्तेकारं स बिन्दुकम्।।१६।।
अनामिकाम्यां हुं चेति न्यासेन्मन्त्री त्वनामिके।
ओ कारो कारपुटितं पवर्ग च स बिन्दुकम्।।१७।।
अकनिष्टाम्यां वोषाउिति मनुना विन्यसेद् बुधः
अकारं पूर्वमुच्चार्य मादिवर्णान् सबिन्दुमकान्।।१८।।
हकारं प्रान्ततच्चोक्त्वा करशब्दं तथा तलम्।
पृष्ठशब्दं समासेन चतुर्थी वचनद्वये।।१९।।
संयोज्य ताम्यामसत्रायं पंदुक्त्वा न्यासमाचरेत्।
अनेन विधिना प्राज्ञश्चतुरंगंलिकाग्रतः।।२०।।
हृदये शिरसि न्यासवं चरेद्दशिकसत्तमः।
उन्नतांगुष्ठया प्रोक्ता ह्यधोमुख्या शिखां स्पृशेत्।।२१।
सव्यासव्यकरद्वन्द्वांगुलिभिः[६] कवचं न्यसेत्।
तर्जनीमध्यमाम्यां व नेत्रयोर्न्यासमाचरेत्।।२२।।
अंगुलिमिश्च सत्वामिः तलपृष्टविघर्षणात्।
सव्यहस्ततले भूयो दक्षमध्यत्रयांगुलेः।।२३।।
ताडयेऽस्त्रस्य द्विजः[७] कुर्यात् पूर्वन्मन्त्रवित्तमः।।२४।
षडंगमनत्रधिष्ठाता देवताः यादृशाः स्मृताः।
तासां रूपादिकं भूयः कथयामि समासतः।।२५।।
नम इत्यस्य मन्त्रस्य देवता पुरंस्त्रीलिंगका
लसतकुण्डताटकंः गदाकम्भस्रगङ्गधृक[८]।।२६।।
हृदगुष्ठस्थले चिनतामूषिताम्बुजसंस्थिता।
पाशांकुशवराभीति लसच्चरुकराम्बुजाः।।२७।।
स्वहानाम्नारुशांगा श्रीमूद्याणोललासिनी शुभा।
शिरोदेशेऽम्बुजस्था सा चिन्तनीय च देशिकेंः।।२८।।
वषदित्यस्य मन्त्रस्य देवता त्रिगुणतिमका।
शंखं चक्रं त्रिशूलं च डम्बरुवांदताभये।।२९।।
धारयन्ती मूजैश्चिनतया शिखायां मध्यमा बये।
हूं चेत्यर्णगता देवो दूर्वादलसमप्रभः।३०।।
शंखचक्रधरः श्रीमान् पीतवासाब्जलोचनः।

वर्गेस्थलेनामिकायां[१०] चिन्तनीयो मुहुर्मुहुः।।३१।।
दोषउात्मकएरूा देवता ब्रह्मणोंशजनितोऽम्बुजप्रभः।
चारुदण्डजलपात्रसत्करश्चिन्तय एव नयने कनिष्ठके।।३२।।
नित्योऽसत्राय पडिति मन्त्रविलसद्वर्णावली देवता
श्रीरुद्रप्रतिरूपिणी चन्द्रावतांशोज्ज्वला।३३।।
शूलं डम्बरुकं मृगं विदधंती मालां करेभूषिता[११]
शादूलार्जितचेलिनी प्रतिदिनं चिनत्यास्खमन्त्रे द्विजेः।।३४।।
एतत् षडंगदेवानां ति चिन्तनं नाचरेत्तु यः।
तसय ततकर्म विफलं जपोहोमार्च्चनादिकम्।।३५।।
कुपितसतस्य[१२] विप्रस्य षडंगदेवचिन्प्तनम्।
मातृकां च तदा सर्वा सफंलं[१३] तसय जायते।।३६।।
युक्ता भूयष्च सकला सकलार्थदा[१४]।
एं दशविधाः प्रोक्ताः मातृका सर्वसाधिकाः।।३७।।
पृथक् तल्लक्षणं बूमः श्रूयतां नरपालकः।
रूष्यादिकं[१५] पदं कृत्या पूर्वपद देशिकोत्तमः।।३८।।
तारबिन्दु नमः शब्दे रहितं मात्काक्षरम्।
कारादिक्षकरान्तं नयसेत् यावन्निजांगके।।३६।।
शुद्धाख्या मामतृका ख्यातमा सिद्धिदा सिद्धिकादिभिः।।४०।।
इति श्रीसप्तसंहितायांनलाद्रिमहोदये षट्पंचाशत्तमोऽध्यायः।।

FOOTNOTES

१T विप्रं। २T मुनिमत्र। ३T मुनि। ४U शक्ति च मृगमुद्रया। ५T देशकं। ६T हस्त। ७T, U घृक्। ८U पीतवासाबृज। ९T हस्तें। १०T कुर्वत। ११U सर्व सकलं कर्म।. १२U भूयः सकला सकलर्थदा। १३T मुन्यां।

सप्तपंचाशत्तशोऽध्यायः

ब्रह्मोवाच

केशवादिन्यासमन्त्रस्रूास्य दक्षप्रज़ापतिः।
रुषिश्चैवात्र कथितो' गायत्री छन्द एव च।।१।।
अर्द्धलक्ष्मी नारायणे देवता परिकीर्तिता।
बलीं श्रीं बीजशक्तिं च कथितो मुनिपुंगवेः।।२।।
चर्तुवर्मफलप्राप्तये विनियोग उदाहृतः।
दीर्घस्वरेः समायुक्तः कृत्वा मनमन्त्रबीजकम्।।३।।
षडंगन्यासकं तेन बीजेन देशिकश्चरेत्।
सार्द्धचन्द्र रमा मायाबीजं चौक्त्वाथ वर्णकम्।।४।।
स बिन्दु च ततो मूर्ति शक्तिं च देशिकोत्तमः।
चतुर्थर्यन्तं नमोऽनतं च कृत्वा च क्रमतः सुधीः।।५।।
मूत्याँ शक्त्या लक्षणं तत् कथयामः समासतः।
यज्ङ्.कात्वा मुचयते जन्तुः कोटिजनमार्जिता ह सा।।६।।
केशवो मूर्तिराख्यातः कीर्तिस्तावदिहोच्यते।
तद्वननारायणः माधव स्तुष्टि रेबच।।७।।
गोविन्दः कापुष्टियुक्तः सयाद्विष्णुश्च धृतिसंयुतः।
मधुसूदन संज्ञास्य तान्तिः शक्तिर्निगहयते।।८।।
त्रिविक्रमः क्रियायुक्तः श्रीधरो मेघयानिवतः।
हृषीकनाथं चु पुनः शक्त्यापि हर्षयान्वितः।।६।।
श्रद्धासाम्बुजनाभस्या जज्जा दामारस्य व।
लक्ष्मायतो वासुदेवः तथा संकर्षणस्य च।१०।।
शक्तिः सरस्वती ख्याता प्रीतिः प्रद्युम्ननामके।
अनिरुद्धस्य देवस्य रतिः सा शक्तिरुच्यते।।११।।
इतासताः शक्तयः सर्वाः सर्वामरणसंयुताः।
विद्युदगोरासतमरक्रोडादेशी व्यवस्थिताः।।१२।।
अम्बुजाभयहसताढ्य स्वरोपेताश्च चिन्तयेत्।
शंखचक्रगदापद्मधारिणो वनमिालिनः।।१३।।
नवनीरदनीलामः प्रफुलकमलेक्षणाः।
दिवयाभरणसम्यन्नास्तत्वद्भक्तिसमन्विताः।।१४।।
एतादृशाः केशवाद्या तद्धदेव मातृकाविधो।

चक्रिणश्च जया शक्तिः दुर्गारादिन एव च।।१५।।
प्रभा च शार्गिणं ख्याता खड्गी सततयन्वितः।
चण्डीः शक्तिः संखिनः स्या वाणीथं हन्तिनः स्तथा।।१६।।
मुषली लासिनी शक्तिः पाणी च विरजांचितः।
अंकुशविश्वया[२] युक्तो मुकुन्दो विनियांचतः[३]।।१७।।
नन्दजस्य सुनन्दा स्यानमन्दिनः स्मृतिरेव च।
नरस्वर्द्धर्नरकार्णात् सकृद्धि सहितः स्मृतः।।१८।।
हरिः शु द्धियुतः ख्यातः कृष्णसतु बुद्धिसंयुतः।
सत्यो मुक्तियुतसतावन्नति युक्तश्च सात्वतः।।१९।।
शक्तिः शैरेः क्षमा ख्याता शूरस्य च रमास्मृता।
उमाजनार्दनस्येव बलेदिनी मूधरस्य च।।२०।।
विश्वभूर्त्रेश्च सा दिव्या वेकुण्ठो वसुधायतः।
वसुधाशक्तियुक्तश्च त्वगात्मा कलितस्त्था।।२१।।
पुरुषोत्तम नामा च ततश्चाप्यमृतात्मनः।
वन्दिनश्त पराप्रक्तिसततोमां सात्मनास्तथा[४]।।२२।।
बलानुजसय कथिता शक्तिः सत्यपरायणा[५]।
मेदतत्त्वयुतः६ कालः सूक्ष्मशक्तिसमन्वितः।।२३।।
अस्यात्मतत्वसहितो वृषघ्नः सत्ययान्वितः।
मम्ज्जात्तत्त्रुचिरो वुषः प्रक्षन्वितसतथा।।२४।।
शुक्रतत्त्वात्मललितो हंसोश्रयं प्रभयान्वितः।
प्राणात्मतत्त्बलललितो विमलो मोचयान्वितः।।२५।।
शक्या तत्व ललितो विमलोमोधयान्वितः।
क्रोधात्मतत्वसहितो नृसिंहो विद्युतांचितः।।२६।।
पाशांकुशगदाशंख राजमानाः७ कराः शुभाः।
मूर्तिस्ताः भावयेठीमान् मस्वर्णवर्णप्रतिष्ठिताः।।२७।।
मूर्तिकोदभवता शक्तिर्वरामयकराः प्रदा।
सर्वालंकारशोभाढ्याः पीनोव्रुगातरस्तनाः।।२८।।
एवं संचिन्तय मनसा मन्त्रज्ञो न्यासमाचरेत्।
अतः परं प्रवक्ष्यामि ध्यानं सर्वफलप्रमद्।।२९।।
लक्ष्मीनारायणायेति ध्यायतां पावनं महत्।
चंचन्नीरदविद्युदुत्तमदाविरीमासुरं सुन्दरम्।।३०।।
प्रम्णा लग्नतरं प्रतिषणमहं ध्यायेरहः श्रीवपुः।

हसतेः शस्त्रवरेः सरोरुहगदाशंखारिशोभर्युतम्।।३१।।
राजत पुस्तकदर्पणांगकलश श्रीमत् करालक्षितम्।।३२।।

सूत उवाच

केशवादि न्यासयुतो यः पूयति केशवम्।
सर्वपापिशुद्धात्मा मुनयः सोऽपि मुक्तिभाक्।।३३।।
१२ तथिं वर्णगतं हरिं द्विजवराः संचित्त्य यः पूजयेत।
आनन्दान् प्रतिवासरं स लभते सर्व सुखं भूतले।
आयुर्वितमशेषकं च परमां कीर्ति च धर्म पुनः।
लबध्वा सर्वमनोरथ परतरं स्थानं व्रजेच्छेषतः।।३४।।
इदानीं शक्बिीजजाख्या मातृका यादृशी भवेत्।
तदहं वच्मि विप्राणां हिताय संयात्मनाम्।।३५।।
शक्तिबीजं च पुरतो मातृकां तदनन्तरम्।
मम्त्याचास्य च मन्त्रस्य शक्तिकात्र रुक्षिः समृत५।।३६।।
गायत्री इन्द एवात्र सर्वसौभाग्यदायिनी।
वद्वच्छशक्तिबीजयुतम्क्ता मातृकान्यास एव च।।३७।।
शक्तिबीजं पुनदीर्घः स्वरैरेव समन्वितम्।
भक्त्या षडंगविन्यासं कुय्र्यातेनेव दैशिकः।।३८।।
आदै तारं समुच्चय्र्य शक्तिबीजं ततः परम्।
आकरं न्दिुना युक्तं नामोऽनतं च ततो बुधः।।३६।।
मातृका लिपि छन्दा च तत्त् थानेषु विन्यसेत्।।४०।।
चंचण्डमशीयिषश्च सद्शां तुगारुपीतस्तनाम्।
चन्द्रार्द्धस्फुरितोत्तमांगमुकुबं हारानिभूषोज्जृवलाम्।।४१।।
क्षस्रकृपुसतशांकुशरुविरचरां पद्मसंस्थां च वन्दे।
त्र्यक्षीं तां साधकानांसक्लसुखवरां दुःखदां दुर्जनानाम्।।४२।।
इति शक्तिकबीजमातृकान्तं रचयंश्चारुतमं शितं हि लोके।
यदि न हहि रचिता द्विजं च शीघ्रं सकलसुखं विनिहनित सेयमास्ते।।४३।।
श्रीबीजमातृमका सेयं त्रूयतां कथ्यते मया।
यद्धत्वा यदनुष्ठानान्न दुःखी जायेते नृपः[१४]।।४४।।
श्रीबीजमातृकामन्त्रस्य स्यादमृगुरुणिः समृतः।
स्मद्मतिस्तु छन्दस्य स्यात् देवता बीजनिर्गता।।४५।।
चतुर्वर्गफलप्राप्तयै विनियोग उदाहृतः।
दीर्धाध्वबीजमानस्य षडंगं च समाचरेत्।।४६।।

यथा ध्यानं चरेन्मन्त्री च शृणुष्व वदाम्यह्।।४७।।
दाहोत्तीर्ण सुवर्णवर्णरुचिरां ममतेमचंमत्फुर–
प्राद्यज्दिज्यसुघाघटीसृतरसैः संसिक्तदेहां त्रियम्।
मालापुस्तकंससारसकरां रुद्रत्नभूषोज्ज्वलाम्।
पीनोतुंगकुचस्यातिरु चिरां ध्यायेज्ज्ञानमातरम्।।४८।
श्रीबीजसहितां तानतु मातृकां विधिना वरेत्।
श्रीबीजमातृकं कर्म वृतां लक्ष्मीः स्थिरा तथा।।४९।।
यथाविष्णोर्विशालेऽस्मिन् वक्षासस्थितमाषिणी।
स्मरबीजमातृकां व शुणुताथ महर्षयं।।५०।।
यस्य श्रवण मात्रेण वंशवृद्धिश्च जायेत।
समरबीजममातृकानत्रस्रूास्य संमोहनो रुचिः।।५१।।
गायत्री छन्द एवात्र सरोऽत्र देवता स्मृतः।
भुक्तिमुक्तिकृते तवाद् विनियोग ादाहृतः।।५२।।
स्मर बीजं सुदीर्ध च कृत्वा तेनैव देशिकः।
षडंनयासमामकुर्याद् देहशुद्धयर्थामादरात्।।५३।।
प्रावासं ततः कृत्वा कामबीजं ततः परम्।
वर्णकं च ततौ बृशत् नमः शब्दमतः परम्।।५४।।
न्यसेत्तन्ममातृकास्थाने ततौ ध्यानं समाचरेत्।
उद्यद्ग्रीष्मखरांशकोटिरुचिरां तां सफटिकीं मालिकामम्।।५५।।
कौदण्डं रुचिरेक्षुदण्डजनितं कन्दर्पवाणानथ।
विद्यां चैव कराम्बूजौ विंदधत्री राजतिनेत्रां शुभाम्।
नानालंकृतिमंजुलां धुतकलां वन्देऽरचिन्दे स्थितमा्।।५६।।
स्रणीययुतां रम्यां मातृकां रचयन्ति ये।
तेषामात्र महासौख्यं वंशवृद्धिश्च जायते।।५७।।
बीजत्रययुतास्यास्य मातमृकान्त्रस्य च।
संमोहनरुषिः[15] सोऽत्र गायत्री छन्द एव हि।।५८।।
सर्वलोकवंशकाय्र्यमास्विान् संमोहनात्मके।
देवता कथिता मूर्त्यैर्विनियोगः परं स्मृतः।।५९।।
त्रीशक्तिकामबीजानि मातृकाणां स बिन्दुकाम्।
नमोऽन्तं प्रणवाढयं च क्रमान्मन्त्री न्यसेत्ततः।।६०।।
स्वस्वस्थाने न्यसेवावत् देवं सर्वाक्षराणि च।।६१।।
ध्यायच्चन्द्रकलाथरां त्रिनयां संमोहनां सत्कुचाम्

नारारत्नमयीं विभूषणयुतां चित्राम्बरां सुन्दराम्।।६२।।
मालामंजुतरेक्षुचापशर सत् पाशांकुशादजस्फुरत्।
विद्याहसतसरौरुहां सुरनतां तन्मातमृकार्ण्णालयाम्।।६३।।
इमां ये मातृकां कुर्युः जपहोमार्चनेषु च।
ते नूने सकलं वांछामरं प्राप्नुयुरुत्तमाः।।६४।।
षडबीजसंयुतायास्य मातृका मन्त्रस्य च।
दक्षप्रजापतिश्चात्र रुषिश्चैव निगद्यते।।६५।।
त्रिष्टुमाख्यमिदं छन्दः कृतिमिः परिकीर्तितम्म्।
सर्वस्य जननी चात्र ातृका देवता स्मृता।।६६।।
चतुर्वर्गफलप्राप्तयै विनियोग उदाहृतः।
प्यट्वीजातिक्रमान्मन्त्री षडंगेषु न्यसेत्परम्।।६७।।
रमामायाकामबीजयनगेऽपि क्रमतौ वदेत्।
मध्ये वर्ण्णं बिन्दुयुतं प्रतिलोमतया पूनः।।६८।।
तानि बीजानि सन्यसरु मातृकान् स्थानतो न्यसेत्।
पूर्वध्यानं द्विजश्रेष्ठाः[१६] कुर्यादत्रैव देशिकः।।६९।।
असिद्धिसिद्धिपफलदो नानासंयत् प्रदस्तथा।
सर्वव्याचिक्षयकरो गद्यते मुनिपुंगवैः।।७०।।

सूत उवाच

प्रणम्य मातृकामन्त्रस्यास्य ब्रह्मा रुषिः स्मृतः।
गायत्री छन्द एवात्र विदन्तु[१७] मुनिसत्तमाः।।७१।।
परत्परं यत्तुं सर्व सर्ववस्तूगतं तु यत्।
योगिध्येयं च यतेजौ देवतात्र प्रकीर्तितम्।।७२।।
प्रणवो बीजममाख्यशतस्त्व जपा शक्तिरुच्यते।
मोक्षप्राप्त्यर्थमवायं विनियोग उदाहृतः।।७३।।
स्वाहां चादौ समुच्चार्य ततः पंच मनूनपि।
हारहरार्ण्णतः कुर्यादन्त्रन्यासं समाचरेत्।।७४।।
भारमदौ ततौ मायाबीजं दत्वा स बिन्दुकम्।
शिरोर्ण्ण त्वजपापात्मा च बहिनज़ाजाय यौ मनुः।।७५।।
तं न्यसेन्मातृकास्थाने क्षदिवर्णान् विलोमतः।
सानुस्वारान् ककरान्तान् तेन मन्त्रेण मन्त्रवित्।।७६।।
ऊंकारादिकपंच मन्त्रकलानात् सर्वर्द्धममान्स्वउम्।
पूर्ण्णं सर्वगतं चराचरलसदबीजीं चिदानन्दकम।।७७।।

कामबीजस्य[१८] मन्त्रस्य स्यादत्र च प्रजापतिः।
रुषिः[१९] नदोऽपि गायत्री कालत्मकतान्विता।।७८।।
वर्णानां जननी हे हृयत्र शारदा देवता स्मृता।
एतादृशी[२०] मातृकाआ न्यासे कुर्यात्तु देशिकः।।७९।।
विनियोगं ततः कुर्यात् शडंगन्यासमुत्तमम्।
ढ२[२१] ढ द्वयं विनातारं स्वरर्द्धादशिमिः परैः।।८०।।
पुटीकृत्य क्रमात्कुर्यात् षड़ंगनयास आदृतः।
प्रणवादीन् स्वरामानदौ चतुर्थर्यन्ताः कालस्तधा।।८१।
कृत्वा न्यसेद् यथा मन्त्री अूयतां कथ्यत द्विजाः[२२]।
निवृत्तिं विन्यसेत् पूर्व प्रतिष्ठां च ततः परम्।।८२।।
विद्याज्ञानितश्च संन्सस्य चेबि्दका दीपिका तथा।
रेचिका मोचिका सूक्ष्मा तथा सूक्ष्मामृता स्मृता।।८३।।
ज्ञानामृताऽयायिनी च व्यापिनी व्योमरुपका।
अनन्ता न्यस्यनीया सा चतैव स्वरखम्भवा।।८४।।
जाताः सदाशिवैनैताः देवताः शुभमूर्तयः।
अक्षमालां च विद्यां च त्रिशूलं च कपालकम्।।८५।।
दथातास्ताः स्वरोतभूताः कलान्यासे प्रतिष्ठिताः।
मुक्तिमुक्तिप्रदा शान्ता न्यस्यतां सततं सताम्।।८६।।
प्रथमं विन्यसेत सृष्टिं रुद्धिं च स्मृतिमेच च।
ततो मेधां न्यसेत्कान्तिं लक्ष्मीं च घृतिमेव च।।८७।।
स्थिरां स्थितिं तथा सिद्धिं क्रमादेवं न्यसेत्कलाः।।
कवर्गेण च वर्गेण युक्ता दश प्रकीर्तिताः।।८८।।
आकररूपं यद् ब्रह्म त्वस्माद्बगाताः हमाः क़लाः।
तप्त चामीकरप्रख्याः ख्याताः ब्रह्मकला इति।।८९।।
अक्षस्रक[२३] पंकजद्वन्द्वामृतभाजन सत्कराः।
जया न्यस्या मालिनी व शान्तिश्चेव तथेश्वरी।।९०।।
रतिश्च कामिकमान्यस्या वरदाह्यदिनीति च।
प्रीतिदीर्घा योजनीया टादिनान्ताक्ष्रान्विता।।९१।।
उकाराद् विष्णुतो जातास्तालदलसंन्निभाः।
शंखचक्रवरामीति हस्तास्ताः परिकीर्तिताः।।९२।।
संहारकारिणीभूताः कलाः सम्प्रति कथ्यते।
मकाररुपात्तदुद्रातः सम्भूताः श्रूयतां नृप[२४]।।९३।।
न्यसेत्तीक्ष्णां च तां रौद्रीं मयां निद्रां च विन्यसेद्।

तन्द्रा क्षुत्क्रोधिनी तावत् व्रियां च विन्यसेद् बुधः।।९४।।
मकारी चैव मृत्युं च विन्यसेत् क्रमतः शुचिः।
रुद्रेण यक्षयोर्वर्गा जाताश्चन्द्रनिम प्रभाः।।९५।।
अभयं वाछितं शूलं कपालं बिमृतीः कलाः।
न्यसेत्तत्र महौत्साहाः संहाररसवर्द्धनाः।।९६।।
रुद्राक्षयाथवर्गायां संभूताः विद्युतः कलाः।
शुभा पीता शोणिताभा ममिसमताम चेति क्रमान्न्यसेत्।।९७।।
श्वेतां चतुर्थाशुयक्ता भुक्त्वा स्थानै न्यसेद्बुधः।।९८।।
थकारं च तथा मज्ज्वा पीतां चैव तथा न्यसेत्।
अहं हंस तथैवौकतावाऽयरूणां च तथा न्यसेत्।।९९।।
हृीं क्रीथं च शितामुक्त्वा पूर्ववद् विन्यसेद् बुधः।
जमाकुसुमरक्ताणां हरिणं तथा मेव च [२६]।।१००।।
अमयं च करं चैव दधाना निजबाहुभिः।
एताः बिन्दुकला ख्याताः साधकानां च सिद्धिदाः।।१०१।।
एतत् कला न्यासपरा नरा ये
ते सर्व सोख्यं सह पुत्रपौत्राः।
मुक्तवात्र चान्तपरमं पदं तम्
गच्छन्ति शान्ता वरमुक्तिमाजः।।१०२।।
विभ्राणां करपंकजैः सरसिजं चक्रं च पाशं मृगम्।
विद्यां शंखयरं कपालमतुलां मालां च टंकः तथा।१०३।।
सौवर्ण्ण कलशं विभूषिततमां पायांदमुक्ताजवा
बिदृयत् स्फटिकवर्णकेश्च वदनैस्त्र्तक्षैयुता पंचमिः।।१०४।।
पूर्णन्द्रुप्रतिमप्रभां श्रृणु महोन्नत्यसतमाढेयां शिवाम्
बालां बालमृगेक्षणां सुरनतां तां शारदां चिन्तयेत्।१०५।।
इति श्री सूतसंहितायां नीलाद्रिपहोदये सप्तपंचाशत्तमोऽध्यायः।

FOOTNOTES

१T गदिते। २T संचास्य। ३U चण्डा। ४U अंकुशी। ५U विवदांचितः। ६U नरस्य शुद्धि। ७U श्चसा। ८U शक्तिः सा च परायणा। ९T वेद। १०U राजमाना। ११U दम्रगता। १२T ऋषयः। १३U ईथिं। १४T विप्रः। १५T मुनिः। १६T विप्ररेष्ठाः। १७U विजितं। १८U कामन्त्रस्य च मन्त्रस्य। १९T मुनि।२०U सतादृश्या। २१U ऋदृद। २२T विप्राः।२३T,U स्रक्। २४T भूप। २५U शवक्रं। Sl. 99 is absent in T. २६ 100a is absent in T.

अष्टपशत्तमोऽध्यायः

ब्रह्मोवाच

श्रीकण्ठमातृका न्यासविधिं शृणु महीपते१।
यस्य त्रवणमात्रेण श्रीणापो भवेन्नरः।।१।।
श्रीकण्ठमातृकान्यासमन्त्रस्यास्य रुषिः कृतः।
दक्षिणामूर्तिरूषिः प्रोक्तः गायत्री छन्द ईरितम्।।२।।
अर्द्धनारीवरोऽप्यत्र देवता कथितो बुधैः।
हृी बीजमंत्र कथितं शक्तिः सा निरुप्यते।।३।।
सर्वसौख्यक्लाभार्थे[१] निनियोग उदाहृतः।
हंसेन दीर्धयुक्त्ने षडंगन्यासमाचरेत्।।४।।
सोऽहमित्येव संचिन्त्य ण्यायेत् देवं हृदम्बुजे।
राजत् पल्लवराजराजनगिरीत्रमासुरांगं मुदा।।५।।
प्रोम्णोल्लासिममरात्परस्पर मिलद्दोहार्द्धभावं विभुम्।
सप्ताांकुशमा लिका दरलसद्धसताम्बुजं सद्भुजम्।।६।।
चंच्व्चन्द्रकलं चक्रयक्षमथुरं ध्यायेद्रिजा वल्लभम्।।७।।
तात्तीर्यपूर्वानयामातृकार्ण्णन् न्यसेत्ततौ रुद्रकशक्तिकायाः।
यार्ण्णविदण्णेर्षु च चातुयुग्मं प्राणं तथा क्रोधममुं च युंज्यात्।।८।।
हृहीं च सर्वत्र संयोज्य मातृकार्ण्ण क्रमेण च।
मूर्तिः शक्तिस्तथा चोक्त्वा नमोऽन्तं विन्यसेद् बुधः।।६।।
देवताशक्तिनामानि कथ्यते साम्प्रतं नया।
श्रीकण्ठं व तथा पूर्ण्णोदरीं च विन्यसेद् द्विजः[३]।।१०।।
अनन्तं विरजां चैव सूक्ष्मशाल्मममलिके तथा।
त्रिमूर्ति च ताते लोलाक्षीं चैव विन्यसेद् बुधः।।११।।
अमरेशं बर्तुलाक्षीं दीर्घेशं दीर्घघोषिकाम्।
भूभारमूर्तिकस्यास्य शक्तिं दीर्धतुखीं न्यसेत्।।१२।।
अतिथीशस्य सा शक्तिः विन्यसेत् तौ स देशिकः।
सथाणुं च दीर्धजिहवां च ततो वाराह मेव च।१३।।
कुण्डोदरीं न्यसद्धीमान् न्यासकर्मणि तत्परः।
झिएडीषं मुक्तकेशीं च विन्यसेत् क्रमतः: शुधीः।।१४।।
भौतिकं चाथ विकृतमुखीं च तदन्तरम्।
सद्योजातं ततो ज्वालामुख च विन्यसेत् क्रमात्।।१५।।

अबुग्रहेश्चरेणाथ सार्द्धमुलामुखीं न्यसेत्।
अनुग्रहं चाथ सुधीमुखं तावत् परिन्यसेत्।।१६।।
महासेनं ततो विद्यामुखीं मन्त्री परिन्यसेत्।
इत्येताः मूर्तयस्तावत् शक्तयः षोडश स्मृताः।।१७।।
त्रिशूलसत्वंगपिनाकमालाघरा जटाजूटविशेभमानाः।
रुद्रांश संमुततराः शितास्तकेननीयाः स तु देशिकेन्द्रैः।।१८।।
पाशंकुशीतिवराब्जहसः प्रफुल्ल्रक्तोत्वलमुजुरामाः।
मूर्त्यकदेशस्थितिसावधानाः सुशोमनास्ताः परि भाव्यमानाः।।१९।।
कादिवर्णेषु सर्वेषु पूर्ववत् विन्यसेद् बुथः।
क्रोधीश्वरं माहकालीं चण्डेशं च सरस्वतीम्।।२०।।
पंचान्तकं सर्वसिद्धिं शिवोत्तमममतः परम्।
गौरं च विन्यसेद्धीमान् मातृकाक्षरपूर्वकम्।।२१।।
त्रैलोक्यविद्यया सार्द्धमेकं रुद्रं च तन्नयसेत्।
कूर्म मन्त्रात्मशक्तिं च न्यसेन्न्यासं विदावरः।।२२।।
एकतेत्रं तथा कुयर्यात भूतमात्रासमं पुनः।
चतुरान्तेन साकं लम्बोदरीन्तु तन्नयसेत्।।२३।।
अजेशं क्रमिणीं चैव स्त्रीं च नगरीं न्यसेत्।
सोमश्वरीं खेचरीं चं न्नयसेद द्विजसतमः[४]।।२४।।
तां मंजरीं लांगलिना सार्द्ध शक्तिमवन्सेत्।
दारुकं रुपिणं तावत् विन्सेद् साधकोत्तमः।।२५।।
अर्द्धनारीश्वरं ततुविरिणं विन्यसेद् बुधः।
उमाकान्तं तथा कालौदरीं च निरूसेत् क्रमात्।।२६।।
आशढिनं पूतानां तां दण्डिनं मद्रकालिकाम्।
अत्रि च यौगिनीं तावन्मीनं च शिखिनीमिमाम्।।२७।।
मेषेश चादिनी शक्तिः ज्ञात्वा तौ देशिको न्यसेत्।
लौहितं कालरात्रिं च शशिफं कु,र्तीं न्यसेत्।।२८।।
छगलण्ड ततौ धीमान् कपार्दिनीमतः परम्।
द्विरण्डेशं तातै विप्रा! वज्रां च विन्यसेद् बुधः।।२९।।
महाकालं जयां चैवविन्यसेद् देश्कोित्तमः।
त्वगसृगासमेदस्थि मज्ज्माशुक्राण्यतः। परम्।।३०।।
प्राणश्चैव तथा शक्तिस्तितत्त्वानि च क्रमामत्।
यदि वण्रे षु संयोज्य मातृकांणां तु प्रात्नतः।।३१।।

सुमुखेश्वरीं तां शक्तिं बालिकना सह संन्यसेत्।
रत्या सह मुजगेशं माधवीं पिनाकिनां।।३२।।
क्षड्गीशं वारुणीं तावत् बकेशं तावच्च वायवीं तथा।
श्वेतारक्षोऽवधारिण्या सार्द्ध तावच्च विन्यसेत्।।३३।।
दुर्गेश सहजां चैव लक्ष्म्या सह कुसंज्ञकम्।
शिवं च व्यापिनीं तावद्विन्यसेनमात् मान्नरः।।३४।।
,वर्त्रकं मायया साद्ध ह्रौक्ष्रं प्रणवपूर्वकम्।
कादिवर्ण्ण गताः शक्ताः मूर्तयः शक्तयस्तथा।।३५।।
शबरोरससम्भूताः पूर्ववत् मावयेच्कुमाः।।३६।।
सूत उवाच
एताः द्वादश्धाः प्रोक्ताः ममातृकाः धर्मसाधिकाः।
विष्णौः जूजासु कर्त्तव्याः भानवीया मुहुर्मुहुः।।३७।।
ये विप्राः प्रतयहं तावत् कुर्वन्ति विष्णुपूजनम्।
त एवं कर्तुं शकयन्ते ज[illegible] सर्जनं क्षयम्।।३८।।
हव्याजने कलान्यरासं श्रीकण्झादिं ततः परम्।
अन्यथा केवलं कर्म निष्फलं जायते ततः परम्।
अन्यथा केवलं कर्म निष्फलं जायते पुनः।।३६।।
असक्तः स्याद् द्वजो यावत् कर्तु तद्वशमातृकाः।।४०।।
विन्दोश्च मातृकां कुर्यात् केशवादिं च देशिकः।।४१।।
एतन्न्यासपरायणा यदि महादेव्यः सदा भूतले।
ते नूनूं विनिहत्य पापनिचयं पुण्योदयो ल्लासिनः।
नानावांछितशर्मजजालमतुलं सम्मुज्य साद्ध निजैः।।४२।।
गच्छन्तयत्र दशा सुवैष्णवपदं शम्भोः पदं वा परम्।।४३।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये श्रीकण्ठादिवर्णने
अष्टपंचाशतमोऽध्यायः।

FOOTNOTES

१T नरपते। २T सेस्येत। ३U विप्रः। ४T विप्र। Sls. 22b and 23 are repeated in T.

एकोनषष्टितमोऽध्यायः

सूत उवाच
अत+परं प्रवक्ष्यामि तत्वन्यासं महोदयम्।
यन्न्यासंसमरणादेव ब्रह्मभूतो भवेन्नरः।।१।।
ब्रह्मोवाच
पूर्व प्रणवमुच्चार्य आदिवर्णान् व्यतिक्रमान्।
नमः शब्दं परायेति तानि तत्तवानि चात्माना।।२।।
त्रिभिरितैश्च तत्वैश्च हृदये विन्यसेद् द्विजः।
शब्दस्पर्शोरुपतत्त्वरसं गन्धमतः परम्।।३।।
शिरस्यानद्हठगुह्यपदेषु क्रमतो न्यसेत्।
शोत्रं त्वक् चक्षूषि चेव रसनाघ्राणामेचव च।।४।।
वाक्पाणिपादपायूपस्थ तत्त्वानि देशिकः।
श्रोत्रियोस्त्वद्य नेत्रे च ह्विवयां च नमोस्तथा।।५।।
वाचि हस्तद्धेय चाघयोः मेढके तानि विन्यसेत्।
आकाशतत्वं शिरसि वायुतत्वं मुखे न्यसेत्।।६।।
तेजस्त्त्वं[1] हृदि पुनः जलं लिंगोपरि न्यसेत्।
प्रथवीतत्वं पदद्धन्द्वे क्रमादता नि विन्यसेत्।।७।।
हृतपुण्डरीकतन्वं तु हृदये पूर्वमन्न्ससेत[2]।
द्वादशकला व्याप्तात्मा सूर्यमण्डले मेच च।।८।।
चतुर्थ्यन्तं नमो न्तं हं नमः शब्दपूर्वकम्।
पराशब्दं चतुर्ध्यन्तं कृत्वेति विन्यसेद् बुधः।।९।।
शं षं नमः शब्दपूर्व पराशब्दं च वूर्ववत्।
षोडशकलया व्याप्तं चन्द्रमण्उलमात्म्ना।।१०।।
चतुर्थ्यन्तं च संयोज्य नमोऽन्तं तद्धदि न्यसेत्।
प्रणवाढ्यं वह्निबीजं हृनमन्त्रं च ततो वदेत्।।११।।
परं च पूर्ववत् कृत्वा दिक्पालाव्याप्तपूर्वकम्।
कृत्वा तन्मण्डलत्र्य्या हृदये वारुणार्ण्णकम्।
पृथ्वीबीजं तु सर्वत्र सबिन्दु हृन्मन्त्रं ततः।।१४।।
भक्त्या पीत्वा येतित्वा परमेष्ठिनमेव च।
पुरुषं विश्वशब्दं च निवृतं सर्वमेव च।।१५।।
ऐतषामामत्म सार्द्ध समासेन्न्यसतो पूनः।

वासुदेवं चत्‌थ्र्यनतं शंकर्षणमतः परम्।।१६।।
प्रद्युम्नश्चानिरूद्धश्च नारायणमतः परम्।
नमः शब्‌दं च सर्वत्र देशिकः क्रमतौ वदेत्३।।१७।।
शिरोमुखहृन्मेद्राघ्रिष्वेषु स्थानेषु तान्‌यसेत्।
न्यसोच्च सर्वत्र सतारपूर्व तारां नमयचेति पराय चेति।।१८।।
क्रोधतत्वात्मने नृहि य नमः इति देशे सर्वत्र विन्यसेत्
क्रोधाद्‌यतत्त्‌वात्मन एतन्मुक्त्वा ततो नृहाय नमश्च मन्त्री।।१६।।
तत्त्‌वन्यासरता येह च मातृकान्यासतत्पराः।
ते सर्वे विष्णुतत्परा योऽत्राः स्युः विष्णुपूजने।।२०।।
तेषां न्यासवतां ये व दर्शनं कुर्वते नराः।
आलापं वा विमुक्ताः स्युः सर्वसौख्यभुजच ते।।२१।।
इति श्रीसूतसंहिताया नीलाद्रिमहोदये एकोनषष्ठितमोऽण्ण्यायः।

FOOTNOTES

१T तेजि। २T पूर्वजन्न्‌यसेत्। ३ वदत्। Sl. 21b is absent in T.

षष्ठितमोऽध्यायः

ब्रह्मोवाच

प्राणायामं च रुष्यादिध्यानपर्यन्तमाचरेत्।
डया पूरकं कुर्यात् मूलेन बीजतश्च वा।।१।।
सुषुमण्या कुम्भकं च रेचकं पिंगलास्त्था।
पूरकः षोडश ख्यातः चतुष्टष्ठया च कुम्भकः।।२।।
द्वात्रिंद्धारैर्विशखतो रेचकः पापमोचकः।
मूले वा प्रणवो वोऽपि कर्तव्यत्वाद् द्विधा स्मृतः।।३।।
प्राणायाभासस्य द्वैविध्यं कर्त्तव्यं विष्णुपूजने।
अन्यथा स्थानमहादोषः सन्तोषो नैव देवतः।।४।।
रोगीः दुःखी च निष्कर्म तद् द्वयं नाचरेद् यदि।
अतो हि देशिको धीमान् तद्द्वयं यत्नतश्चरेत्।।५।।
प्राणायाम समप्याथ योगपीठं नजागके।
कुर्याघथा देशिचकेन्द्रः साम्प्रतं तत्प्रकाश्यते।।६।।
आधारशक्तिवै प्रकृतिं हुर्मानन्तो क्षमाततः।
श्रीरसिन्थुस्तथा श्वेतद्वीपं च मणिमण्डपः।।७।।
कल्पद्रमंश्च तां सर्वा चाधाराद्दा हृदि न्यसेत्।
दश्सा वाससंसयोजसतावत् दक्षवामोरुदेशे।।८।
मुखेऽस्मिन् वामपार्श्वे च कट्टयां दक्षिणपार्श्वके।
धर्म ज्ञानं च वैराग्यमैश्वर्य च ह्यधर्मकम्।।६।।
ततोज्ज्ञानमवैराग्यमैश्वर्य क्रमेण तान्।
प्रणवाद्वान्नमोऽन्तांश्च चतुर्थर्यन्तान् परं न्यसेत्।।१०।।
ात्वं रजस्तमस्तवेति गुणैस्तैः वृत्तकायितेः।
असंलग्न तथा पद्म वेष्टितं वसुपत्रकम्।।११।।
कर्णिकारं समायुक्तं केशरो१मास्वरापरम्।
सान्ममाण्डकन्दकलितं तादृशं हृदि चिन्तयेत्।।१२।।
आनन्दकन्दं त ततः सर्म्विक्षालं चिदात्मकम्।
प्रकृतिममयपत्राणि विकामरयकेशराः।।१३।।
पंचशब्दर्णवीबाह्य कर्णिका चेति मात्रकः।
कन्दादिकर्ण्णिकानतं च हृदयेभावयेत्तदा।।१४।।
तारपूर्व त्वकारं च बिन्दुना परिमूषितम्।

आदित्यमण्डलं डेत्र्ऽन्तमुक्त्वा च तपिनी तथा।।१५।।
तापिनी च ततो धूम्रा मरीविज्ज्वालिनी रुषिः।
सुषुम्णा भोगदा विश्वस बोधिनी धरणी क्षमा।।१६।।
एमतत् कलाभ्यो नमश्चेत्युक्त्वा हृदि सामान्यसेत्
उं चेत्युक्त्वा[२] ततः सोमण्डलानेति देशिकः।।१७।।
अमृता मानदा पूषा तुष्टिः पुष्टिः ततः परम्
रतिर्घृतिश्च शशिनी चण्डिका कान्तिरेव च।।१८।।
ज्योत्सना रीः प्रीतिरेव स्यादंगदामृपिर्ण्णिका।
कामदा चेति चन्द्रस्य शक्तयः षेडशः स्मृताः।।१६।।
एतत्कलाढ्यो नम अति स्मृत्वा तत्रैच विन्यसेत्।
मं विह्नमण्डलोयति ततश्चौक्वा स मन्त्रोकः।।२०।।
घूम्रार्चीरुष्या ज्वालिनी ज्वालिनी तु स्फुलिंगिनी।
सुत्रीश्चैव स्वरूपा च कपिला च ततः परम्।।२१।।
हव्यकव्यवहा च स्यादिहोक्ता लश शक्तयः।
तत्कालान्भ्यो नम हति युवत् हृदि परिन्यसेत्।।२२।।
सं सत्वाय नमश्चेति तथा रं रजसे नमः।
तं तमसे नम इति बुवरानफनेवं न्यसेदृ गुणान्।।२३।।
आं आत्मने नम इति अकारं च तातै ब्रुवन्।
अनतरात्मने नम इ फकारं च पुनर्वदेतृ।।२४।।
परमान्मने नमोऽन्तं च ह्रीं बीजं च स्मरेत्पुनः।
ज्ञानात्माने नम इति त सर्व हृदि विन्यसेत्।।२५।।
विमलोत्कार्षिणी ज्ञानक्रियायोगा तथैव च।
प्रभा सत्या तथेशानुग्रहा नमशक्त्यः।।२७।।
प्रत्येकं प्रणवाथं च चतुर्थ्यन्तां नमोऽन्तकाम्।
न्यसेद्दष्टदलेष्वेतानमध्ये चानुग्रहा न्यसेत्।।२८।।
त्रत्याः शक्तयः सर्वाः सव्रामरणभूषिताः।
ज्ञानमुद्राबीजहंसतास्ताः पृथुलोच्च कुच्च्द्वयाः।।२६।।
सौवंर्ण्णनिकषाद् मासिश्चिन्तनीयाश्च[२] देशिकैः।
अंगुष्ठनामिकाम्यां च शेषांगुलिविधरणे[३]।।३०।।
या तन्वमुद्रा भवनि तथा न्यसेतु पुण्यतः।
नमो भगवते विध्णवे सर्वभूतन त्मने तथा।।३१।।
वासुदेवासय च पदं कल्पयित्वा स देषिकः।

सर्वात्मसंयोगपद्ममपीठात्मने नमस्त्विति।।३२।।
कर्णिका मध्यवतः स्मृचका विन्यसेत्तदृशं।।३३।।

सूत उवाच

आधारोत्तमामामवनामनुदिनं कुर्वन्ति ये देशिका
श्चेमानते त्रुतिकीर्तयः कलिमलध्वंसस्फुरन् मूर्तयः।
योग्यास्ते जपहो मपूजनविद्यौ सन्धोतकार्न्तिलाः।
सद्ज्ञानामृतपानतोषकलिता लोकद्वेय पूजिताः।।३४।।
इति श्रीसूतसंहितायां नीलाखिमहोदये षष्टितमोऽध्यायः।।

FOOTNOTES

१T पुन र्निवन। २T श्चिनतनीयाशु। ३T विशारसे।

एकषष्ठितमोऽध्यायः

ब्रह्मोवाच

उत्तानसंपुटसव्यकरंहृदयलग्नकम्।
तत्र पुष्पाणि दक्षहस्त पिधाय च ।।१।।
व्यस्तं तद् ध्यानमुद्रेति विदितंकन्त्रवित्तमैः।
मुद्रापो देपता तत्र चिनतयेत् परमं महः।।२।।
प्रकाश्यते तत्सहसा साधकानां हिताय च।
हृदेय परमाकाशः भव्यक्तं तद् विचिन्तयेत्।।३।।
सर्वमन्त्रलताबीजं प्रणवभावयेत्नपुनः।
प्रणवे परमाकायास्थस्ये वेदमूलके।।४।।
तत्र तारतरं सारं त्रुतीनां च परं महः।
उंकारात्मनतस्तस्मात् तेजसो मूलमन्त्रगम्।।५।।
यत्तेजश्चिन्त्यते तावत् सैषा हृदये भावना।
प्रणवात्मकमस्तस्माच्च हंसः शवासवर्त्मना।।६।।
आनीय दीपवद्दीपाध्यस्तान्य्यन्तरके न्यसेत्।
करन्सासं ततः कृत्वा विधिना विधिसत्तमः।।७।।
हस्तयोर्मावना सेषा कथ्यते विधिकोविदैः।
हृदयांद्दक्षनासायां रन्थ्रूणानीय देशिकः।।८।।
ततेजोचितहसताम्यां व्यापकत्रयमाचरेत्।
जि कालवरे चाथ स स्वयं भास्करोपमम्।।६।।
अंगन्यासं तः कुर्यात् व्यापकान्ते द्विजोत्तमः।
सा देहाभावना चेषा कथयते मुनिसत्तमैः।।१०।।
आब्रह्मरन्थ्रपकंदान्तं पादाद् ब्रह्मपदं प्रति।
न्यसते ब्रखरन्धप्रन्तं हृदयान्तं न्यसेद् बुधः।।११।।
हृदयादंघ्रिपर्य्यन्तं न्यसेद् व्यापकमूर्तयः।
अथ मन्त्रवरं सारं त्रुतीनां च वदाम्सहम्।।१२।।
सक्द् द्वयोगतं यावद्यमृत्युमयक्षयम्।
तथा विषहरं तापत्रयनाशनकारणम्।।१३।।
जयदं रणभूम्यां च वनेऽथ मयदं तथां
जनानां जनमीतिखनं पुत्रपौत्रधनप्रदम्।।१४।।
सौन्दय्र्यवीर्यशै य्र्यरीबलवाहनवृद्धिदम्।

हस्त्यश्वरथपादा तिघनधान्यसृष्दिम्।।१५।।
बहुनापि विमुक्त्ेन जपतां सर्वकामदम्।
वक्षमाणपदे दम्भः क्षणं कलयतादमुमु।।१६।।
कामध्नेूपमं मन्त्रं साधकानां सदा मुदे।।१७।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदेय एकष्मष्ठितमोऽध्यायः।।

FOOTNOTES

१T तत्र सुरतारातरं। २T स्विये। ३T हस्ताम्यां। ४T ऋषि।

द्विषष्ठितमोध्यायः

ब्रह्मोवाच

खान्ताण्र्ण च समुद्धत्योकारेण योज्रयेत्पुन।
पकारं वामनेपाढ्यं जनशब्दमतः परम्।।१।।
वल्लभं च चतुथ्र्यन्तं कृत्वा स्वाहेति देशिकः।
एवं दषाक्षरो मन्त्रे निर्ण्णीतो द्विजसत्तमैः[1]।।२।।
खान्ताण्ग्र प्रथमं त्रयोदशयुतं चंचत् स्वरेणामधे
वामास्फ्रिुरितं पर्वकपुरे वर्ण तदन्ते जनम्।
बीजं चोज्फितबिन्दुकं जलपतेः पृथ्वीबीजं तथा
द्वैरुक्त्यं च ततः पवर्गतुरार्वर्ण्णैर्युतं देशिकः।।३।।
वायौर्बीजमिदयं बिन्दुरहितं संजयल्प्य वह्नेः पुनः।
जायां योजयतां दशार्ण्णकमनुः ख्यातौ मननुनां वरः।।४।।
अयं दक्षाक्षरो मन्त्रै नारदोऽस्य ऋषिः स्मृतः।
छन्दो[2] विराड्यं क्ष्यातः सर्वमधुरदायकः।।५।।
नन्दनन्दन पपोऽग्र देवता परिकीर्तितः।
क्लीं बीजमिति चाख्यातं स्वाहात्र शक्तिटुच्यते।।।६।।
चतुर्वर्गफलप्राप्त्ये विनियोग उदाहृतः।
एवमुष्यादिकं कुर्यात् निष्कामो द्विजपुंगव[3]।।७।।
सकामस्तु मनोसतस्य कुर्ययार्द्धुर्गा सुरेश्वरीम्।
श्रीकृष्णस्य प्रतिकृतिमथिष्ठात्रीं च देवताम्।।८।।
आयुधेत्तममूतत चक्रं विष्णेः प्रकीर्तितम्।
तसमाच्चद्देण पंचांगन्यासं कुर्याद्विचणाः।।६।।
प्रथमं प्रणवं कुर्याद् द्वितीयं पूरकं ततः।
चतुध्र्यन्तं ततश्चक्रं वह्निजायां तदन्ततः।।१०।।
एतन्मनुलिंगमन्त्रे संयोज्य न्यासमाचरेत्।
दक्षनेत्रयुतं बहजं वारूणं विश्वकन्दकम्।।११।।
सूपसर्व तः कृत्वा त्रैलोक्यमक्षणं ततः।
असुरानतकशब्दं तु चक्रं सर्वत्र योजयेत्।।१२।।
संयुज्य विन्यसेद्धीमान् क्रमेण च परन्तप।।१३।।

सूत उवाच

पंचोंगयुक्ताकनुरेव माति हर्षपदो दैत्यनिषूदनं च।

विना कनिष्ठानयनद्वेयन न्यासस्तथास्थान च साद्धयोनेः[४]।।१४।।
अधुना तस्य मन्त्रस्य बीजं शृणुत मूसुराः[५]।
त्रैलोक्यपावनकरं पत्पंचांगमनोर्महत्।।१५।।
पृथवीबीजोपरि ब्रह्मवर्ण्णच परियोजयेत्।
वामनेत्रयुतं तत्तु बिन्दुनार्द्धेन्दुनानिवतम्।।१६।।
एमादृशं बीजमनुत्तमं तद्दशाक्षरस्यास्य मनोः प्रसिद्धिः।
ब्रह्मस्वरूपं खलु पंचवर्ण्ण संनिर्मितं दुर्ल्लभसिद्धिकारि।।१७।।
भूतेर्लकारं श्चोत्पन्नं ककारो जनसम्भवः।
ईकारो वह्निसम्भूतो बिन्दुराकाशसम्भवः।।१८।।
इति पंचागकं बीजं दशार्ण्णनते नियुंजयन्।
योजयेच्च स्धकं कर्मसिद्धिं नयति तत् क्षणात्।।१६।।
मनोस्तस्य च बीजस्य विषयः कीर्तितो मया।
ध्यानं च कथियते सम्यक् त्रूयतां द्विजसत्तमाः[६]।।२०।।
राजनन्नीपरनीलमुजुजतनु सम्पूयुर्य चन्द्राननम्।
फुल्लेन्दीवरनिन्दिसुन्दरदुशं विम्बाधरं सुन्छरम्।।२१।।
श्रीमद्दन्मतचयं मानोरमतमघ्राणं च सत् पृष्ठकम्।।२२।।
केयूरोत्तमहारकुण्डललसद्रत्ममावली मेखला
चंचत्सवर्णकिरोटनूपुरमुख श्रीमद्विभूषाघरम्।२३।।
दक्षे हस्ततलेऽमले प्रविलसत् सत्पायसं वामकें
संसर्पन्नवनीतकं सुरवरं गोपीकुमारं भजे।।२४।।
प्रातः सामान्यपूजायामेवं प्रतिदिनं बुधः।
दारुब्रह्मस्फुरद्रूपंभावयित्वार्चयेशुचिः।।२५।।
एवं भरवयतस्तस्य देशिकस्य द्विजोत्तममः।
जायेत श्रीरसौ पूर्ण्णा स्थिरांष निश्चलोऽनधाः।।२६।।
पुत्रौत्रप्रपौत्रेश्च नन्दते सह बन्धुभिः।
शेषे विष्झुपरं यशति ध्यानमेवें चरेन्नरः।।२७।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये गोपालमन्त्रकथने द्विषष्ठितमोऽध्यायः।।

FOOTNOTES

१T विप्र। २T कृत्यां। ३T विप्र। ४T योतं। ५T भूदेवाः। ६T विप्रसत्तमा। ७T सम्भूतः।

त्रिषष्ठिमोऽध्यायः

ब्रह्मोवाच

प्रातः कालेऽपि या पूजा द्विधा प्रोक्ता महासुराः[1]।
सामान्ये च विशेषे च कुर्याध्यानमिदं बुधः।।१।।
अतः परमिदं जनभिहिरनन्दिनी वीरेण
ब्रज प्रकटसौरभा निलमनोहरं सुन्दरम्।।२।।
प्रसूनफलमंजुलडमलताकुलं पत्रिणम्
स्वनैः श्रुतिसुखं चरन्मृगलयं पत्रिणम्
प्रवालकुसुमाक्लीफलचयापदेशनमुहः।
समसतमणिहीरप्रभुरत्नसम्पद्यतम्।।४।।
अशेषवनवलबीं बलिकामतृष्णाबलि–
निन्कुंजजयमुजुलं सकलसत्त्वशर्मोज्वलम्।।५।।
मयूरशुसारिकाप्रमुखपरिराजमिल–
न्निरन्तररतिक्रियं विविधसत्त्ववृन्दाश्रयम्।
विसारि कुसुमोत्करं भ्रमरकोकिलासंकुलम्
चलद् दुमलता निलं पवनसंगरंग स्मरेत्।।६।।
सौवर्णीत्तमसौधके मामियस्थल्यां छितेभूषिते
रत्नत्रेणीविमण्डिते सुमनसां रेणब्रजर्वासिते।
सच्चन्द्रातपपराजिता जिततरचंचत्सुधांशूकिरे
पश्येल्लोकमनोहरे गिरिवर प्रस्थे तु सौख्येऽक्षये।।७।।
तत्र रीनीलयं सुखप्रदमिदं दिव्यास्त्रतां सद्गुणम्
तद्दूरद्रवचन्द्रनां चितमतिः स्फीतं सुशीतं ततः।
नानारत्नविचित्रकुटिटमतलं सन्मंगलं मंजुलम्
पीठं चाष्ठवलार्बजचारूमधुर ज्योर्तिम्रयं भावेय[2]।।८।।
श्रीवृन्दावनमध्यदेशविलसछोमेव तत्रेत्तमे
पीठे सपतवने लतातितिमिलल्कत्कल्पदुमप्रोज्ज्वले।
चंचन्नीयतरूत्तमच्छदलसत् पुष्प्रशाखवली।।६।।
रम्ये हेममयस्थले सुखितयासीनं च कृष्णं स्मरेत्।।१०।।
नवीनघनमासुरं कुटिलकुस्यन्तलं मंजुलम्
चलत् शिखिषिखण्डकोज्ज्वलशिरस्थानं मंगलम्।
लसत्कनककण्उलं सकलशारदेनदूपमा नन

जलरूहेक्षणं रूचिरभूषणं सद्गुणम्।।११।।
प्रवालमधुराधर तवतुलना सिकं कुन्दवत्।
स्फुरद्दशनजालकं कमलगन्धनिः श्वासकम्।
दरजतिकण्टकं पृथुलदीर्घाबाहुद्धयम्
विशालतरवक्षसं विपुलपाश्वकनस्थलम्।।१२।।
श्रीवतसकास्तुममनोहरहाररम्यं
ह्याविर्तसाम्यबिलसिन्नतनामिदेशम्।
पीताम्बरां चित कटीतमेखलाढयम्
दिव्योत्तरीयललितं बलितसिमतास्यम्।।१३।।
रोमावलकलितनूतनयौवनाढ्यम्
सज्जानुदेशरुचिरोरुयुगं प्रंशस्यं
हस्ताघ्रिकद्धयतला जितपल्लवाभम्
केयूरनूपुरघरं जितकोटिमारम्।।१४।।
मणिकररागनुीतसन्मखरालिराज
त्वादारविन्दतमलष्टदशेक चिह्नम्।
चंचत्स्वराममलमनोहरवेणुनाद
स्फुर्यद्रसालसमरा जगति स्त्रियसताः।।१५।।
वत्सानां च तथांशुजाललितिकावृक्षावलीनां मुहुः
वन्यानां मृगपक्षिणां तरूी भूमंगमानन्दरजम्।।१६।।
आत्मानुरुपव्रजपालवानां वृन्दैरमन्दैः कृत्ततुल्यवेशैः।
समानतारुण्यविलासहृासैः वंयीधरेस्तैः परितौ वृतं च।।१७।।
गोपीकदम्बैः पृथुसंनितम्बैः पीनोरुवक्षोजमनोहरैस्तैः।
नानाविलासात्रंयचारुववत्रैः सद्भूषणेत्रणिलसत्सगात्रैः।।१८।।
चीनाम्बरैश्चारुतरैकहारैः प्रसूनमाल्यां चितकेशपाशैः।
नेत्रारविन्दान्तलसत्कटाक्षैः त्रैलोक्यसम्मोहनचारुचष्टैः।।१६।।
रत्नावलीमास्वरहेममभूषैः पश्यज्जनान्ताः करणातितोयैः।
संसेवितंसर्वतएव नाम पन्नदं मुरारिं स्मर कोटितुल्यम्।।२०।।
समानतः संगतगोपगोपीस्वमित्रमूर्ता तिंकधनुनालम्।
श्रीकृष्णचन्द्रं पारिभाव्य चाग्रे समस्तदेवांश्च ततोऽनुध्यायेत्।।२१।।
ध्येयं मुमुक्षिमिश्चैव चिन्तयेत्तं कृपार्णवम्।
सव्यदेशेऽपि गन्धर्था यक्षकिन्नरचारणाः।।२२।।

विद्याचराः सदा शस्ते गीतकर्मणि तत्पराः।
गीतनृत्यपरैः सारैः तृष्णोत्साहसुथेषितैः।।२३।।
गणेरप्सरसां दिव्यैः दिव्ययौवनहृद्यकैः।
यः सदा नन्दितो नूनं सै तं नन्दनन्दनम्।।२४।।
एं ऐशान्ये यज्ञस देवोत्तममनुतचरणाम्मोजयुग्मास्य विघ्णोः
ज्ञानाशक्तःशिवोऽयं जयति च जगति ख्यातकीर्तिः सदेव।
चंचत्केन्दुकान्तः कलितशशिकलः सन्नटः प्रस्फुटश्चीः
गंगाधारी सनारीस्मरपुरदलनस्तं मजे कृष्णचन्द्रम्।।२५।।
पाशंकुशमयवस्रफृरिताबृजहस्त–
चंचत् प्रवालमधुराकृमितरग्निकोणे।
खर्व सुधाकरकलारुविरोत्तमांगे
यभावयन् वितनुते तमहं स्मरामि।।२६।।
नेत्रऋत्यां दिशि मानुष्च क्षिभुजोऽबुजमृच्छभः।
ध्यात्वां यं नन्दते नित्यं तं नन्दतनयं मजे।।२७।।
वायव्यकोणे परमोऽपि चन्द्रः
सुधामय श्चीः सुखदः सदैव।
यद् भावना [illegible]बृधतमात्माकान्ति–
स्तं कृष्णचन्द्रं सततं नमामि।।२८।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये त्रिषष्ठितमोऽध्यायः।।

FOOTNOTES

१T भूसुराः। २T सोचये। ३T सन्मुख।

चतुःषष्टितमोऽध्यायः

सूत उवाच

तृतीयपूजनक्षणेऽशितगिरोमुरद्वेषिणम्
सरोजनयनं शरत्सकलचन्द्रम्याननम्।
सुदीर्घपृथुलभूजद्वयविराजमानम्
लसद्विशालतरवक्षसं रुचरवाससं सुन्दरम्।।१।।
दारुब्रलस्वरुपं तं ज्ञानमेवं च भावयेत्[1]।
तृतीयार्चनकानेऽस्मिन देशिको मक्तिमाचुकः।।२।।
सायाह्ने पूजने विप्रा[2] यथाध्यानं चरेद् बुधः।
तदहं साम्प्रतं वक्षे वृध्वतां सर्बकामदम्।।३।।
द्वारवतयां पुरि श्रेष्ठैर्भवनानां सहस्त्रकेः।
कलासंख्येरसंख्यातमणिहूमादिनिर्मितेः।।४।।
सौवर्ण्णस्तम्मकिनकरप्रासादवरुांचितैः।
चारुचन्द्रातपैर्मूपराजिकासार सुन्दरैः।।५।।
चारुसोपानसहित श्रीमन्नण्मण्डितैः।
पशयज्जनमनोहारि विस्मयप्रदाचारुकैः।।६।।
युतायां स्वर्णतुल्यायां कृत्रिमवर्नसत्तमैः।
प्मोत्पलाविरुचिरस्फीतगन्धाम्बुशीरैः।।७।।
फलप्रसूनाललितैः। लतामिनोहरैः।
मन्दमारुतसम्पूर्णेः नानाशमसमुज्ज्वयालैः।।८।।
मत्तभ्रमरजालैश्च कोकिलाला पमंगलेः।
क्रीडत्पक्षिगणैर्दिव्यैर्दिव्यसौरमसंयुतैः।।९।।
शोभितायां रत्नवैद्यां तत्र सिंहासने शुभे।
मंजुलास्तरणे दिव्ये पीठे सौवर्ण्णके पदे।।१०।।
तत्र पद्मजमममध्यस्थं शोभनं नवनमालिनम्।
नारदाद्यैर्मुनिवरैर्वेष्िअतं ज्ञानदायिनम्।।११।।
नवीननीरदश्यामं पीतवासामच्युतम्।
पूर्णचन्द्राननं सोम्यं शारदाम्बुजलोचनम्।।१२।।
नानाभूषणरम्यांगगदा ग्जदरचक्रिणम्।
मन्दहासरसोल्लाससर्वलोकसुखप्रदम्।।१३।।
श्रीवत्सकौसतुमयुतं सेवतां सकलार्थदम्।

एवं च चिन्तयेत्प्राज्ञश्चतुर्थपूजने शुभे।।१४।।
रात्रौ नर्मपरित्रान्तं रासोल्लासिविलासिनम्।
गोपीमण्डलमध्यस्थंनानामण्डनमण्डितम्।।१५।।
गोपानां प्रेममक्तानां चारु वेणुभृतां परम्।
चूडामणित्रवो भूषा नासाभूषालसत्त्विषाम्।।१६।।
हारनपुरकंजीभिः शोभितानां च भूषणैः।
अन्यैर्नानाविधैर्दव्यैः दृष्ट्युत्साहकरैः परैः।।१७।।
दिव्यावरपरीतानां सुस्मितानां च योषिताम्।।१८।।
दिव्यशंकुपरिभ्राज्यत्पंकजस्त्वतिसंमृताम्।
एतादृशं गोपिकानां भ्रमितानां मुहुर्मुहुः।।१६।।
शताकोटिसहस्त्राणां वल्लवीणां च मध्यतः।
सुखोपविष्टं नेत्रास्ते पश्यतां तद्विचेष्टिताम्।।२०।।
अतसीकुसुमश्यामं वनमालाविभूषितम्।
किरीटकुण्डलद्वन्द्व प्रमुखोत्तभूषितम्।।२१।।
पीताम्बरघरं देवं कामभोगसममत्सुकम्।
कोटिकन्दर्पललितं बाहेज्ज्वलस चूडकम्।।२२।।
एवं कृष्णं स्मरेद्धीमान। चन्द्रावत्तरकान्तरे।
द्विगुण्सीकृतया दिव्यल्लमयमा चारुमशेभया।।२३।।
तथा वृत्तया योशितां च शोभमानं सुचन्दनम्।
यथेन्दनीलमणिकं कांचनान्तरसंसितमम्।।२४।।
तं च कृष्णं तथा ध्यायेद्वारक्रीड़ाव्यवस्थितम्।
शरच्चन्द्रोदये स्फीते नीरदोत्करवासिते।।२५।।
नन्दमारुतरम्येऽस्मिन् चारुकेकममभूषिते।
कालन्दीतरलमस्वच्छ नीरमममशीकीशीतलैः।।२६।।
आकाशदेशसंराजद्देवगन्थर्वमुक्तकैः।
सुमनोर्वषौरम्येः शेभमाने सुमण्डले।।२७।।
यामुने पुलिते दिव्ये गोपीक्रीडललालसम्।
स्फुरद्वेणुस्वनेनैव मोहितात्माननागरीम्।।२८।।
कन्दर्पलीलाचतुरं मांवयेन्नन्दनन्दनम्।
रात्रै पूजाद्वेय विष्णु तं ध्योयद्दवमंजसाम।।२६।।
विष्णोः षटकालपूजासु ध्यानान्येतानि यश्चरेत्।
पुत्रौत्रप्रपौत्राणां घनधान्या दिस्पदाम्।।३०।।

व्रॊिश्च जायते तस्य सुखमारोग्यमेव च।
राजवल्लमाता तस्य वृत्तिश्च विपुला भवेत्।।३१।।
विष्णुः सन्तोषितस्चानते कुय्र्याद्वैकुण्ठवासिताम्।
अशक्तो च यदा तावत्समभाव्य ध्यानमाचरेत्।।३२।।
सव्येसन्वनीतपिण्डमितरे दक्षे करे पायसम्।
दिव्य संदधतं नवीनघनवत् श्यामाभिराकृतिम्।।३३।।
पूण्णेन्द्रुप्रतिमाननं सुनयनं वक्षः स्फुरत्कौस्तुममफ
राजद् व्याघ्रनसान्वितं परिचलद्वेणि तु कृष्णं स्मरेत्।।३४।।
रम्ये वन्दावने चंचद् परमे यामुने घने।
तीरे तत्र स्वर्णमयी दिव्या च कनकस्तनी।।३५।।
तत्र क्लपतरोर्मूले मंजुले कुसुमोज्ज्वले।
सहस्त्रदलसम्पन्नं पद्मजं चारु चिन्तयेत्।।३६।।
तत् कर्णिकान्तरे दिव्ये वर्तमानं स्मिताननम्।
दले दले स्थिताभिश्च गोपीमिर्वेष्टितं मुदा।।३७।।
वेणुवादनसंसक्तं नानामण्डपमण्डितम्।
पीताम्बरघरं शानतं श्यामलं चारुकुण्डुलम्।।३८।।
रामक्रीडापरं चंचत कन्दर्पाविष्ठचेष्टितम्।
एतादृशं स्मरेत् प्राज्ञः पूजने पंचमौऽर्च्चकः।।३६।।
दिव्यसौथतले कानते शीतले रत्नकोज्ज्वले।
तत्र सिंहासने दिव्ये गतौपम्ये सुखप्रदे।।४०।।
प्रमदा शतकोटीनां भूशितानां सुभूषणैः।
विनासहाससम्पन्नेर्गणैश्चत्रिगुण्पीकृतैः।।४१।।
वेष्टितं चानुयेश्टाढयं सर्वेषं मध्यवर्तिनम्।
शंखचक्रधरं द्वाभ्यां कराभ्यामितरे पुनः।।४२।।
कलवूणुघरं घीरं पुनर्दाकरे[3] शुभे।
रमया दत्तमन्नं तत् नानापूपसमन्वितम्।।४३।।
दिव्यपायससंयुक्तं क्षालितान्नं सुसाधितम्।
पल्यत्सु सर्वदवेषु ब्रह्मेन्द्रादिषु चाग्रतः।।४४।।
एवं च चिन्तयेद् देवं षडमले पुरुषोत्तमम्।
एवं यो ध्यायते नित्यं पूजासु नरपालक।।४५।।
सर्वान् कामानवाप्नोति प्रसादाचक्रपाणिनः।।४६।।

सूत उवाच

तेन सरोजजेन मुनयो[४] भूपौत्तमं तं प्रति
श्रद्धालु गदितं नयत्फलिममलप्रध्वंसिनं सौरभम्।।४७।।
सम्प्रति मे पुरः प्रकटितं दिक्संख्यकानां लस–
त्तत्वानां विधिनिर्णयं च परमं तापत्रयच्छेदकम्।।४८।।
इति त्रीसूतसंहितायां नीलाद्रिमहोदये चतुःषष्ठितामोऽध्यायः।।

FOOTNOTES

१T शोचयेत्। २T दिया। ३T हस्ते। ४T ऋषयो।

पंचषष्ठत्तिमोऽध्यायः

ब्रह्मोवाच

एतत् दशाग्रमन्त्रस्य प्रत्येकं ये च वर्णकाः।
तानर्द्धेन्दुयुतान् कृत्वा प्रणवान्नमोऽन्तकम्।।१।।
न्यसेद्धदि शिरोभाग शिखयां कवचेऽस्तंके।
पार्श्वयोश्चक्रमात्पृष्ठे नामो च मूर्घ्नि दैशिकः।।२।।
एतद्दशांविन्यासं पंच पंचांगमुद्रयां
संन्यस्य च ततः पार्श्वद्धय शूकरीमुद्रया।।३।।
नाभौ पृष्ठे न्यसेन्ममूमिर्घ्न मृर्गी नाम्न्या च मुद्रया।
ऊँकारां पुटितं मन्त्रं कृत्विा व्यापकमुद्रया।।४।।
सवांगे विन्यसेनमन्त्रं निजतेजः समृद्धये।
मन्त्राक्षराणि दिव्यानि ताराम्यां पुटितानि च।।५।।
प्रत्येकं बिन्दुयुक्तानि तानि वर्ण्णानिनि तु क्रमामत्।
नमोऽन्तानि समुच्चार्य दक्षुगुष्ट त्रेपर्वतः।।६।।
आसन्यांगुष्ठपर्यन्तं दशाण्णं मनुमान्यसेत्।
सृष्टिन्यासस्तदा न्यस्य दुक्तोऽयं मन्त्रवेदिभिः।।७।।
दक्षांगुष्ठक निष्ठान्तमेवं तद्धिन्न्यसद् बुधः।
वामांगुष्ठक निष्ठान्तं तथा न्यासं चरेत्पुनः।।८।।
स्थितिन्यासममुं कृत्वा ततः संहारामाचरमेत्।
वामांगुष्टात्पुनर्दक्ष वृद्धांगुलिमभिन्यसेत्।।९।।
संहारनामकं न्यासं कथयन्ति मनीषिणः।
करयोर्यवसृष्टयादिन्यासं कृय्र्याच्च देशिकः।।१०।।
पुत्रपौत्रघनेश्वारायारोग्यवान् जायते नरः।
संहारादौ यदा न्यासेर्वैरवृद्धिस्तदा भवेत्।।११।।
स्थित्यन्तेऽपितदोष्पीतं तस्मात्सृष्टयादिमाचरेत्।
ततोंऽगपंचकं न्यासं कुय्र्याद्दक्षेऽपि देशिकः।।१२।।
आकरादि[1] क्षकरान्तं वर्ण्ण च बिन्दुसंचुतम्।
मन्त्रेण पुरटितं कृत्वा मातृका स्थानकेम न्यसतेल्।१३।।
आदौ प्रणवमुच्चार्य मन्त्रार्ण्ण च नमोऽन्तकम्।
परायेति ततः प्राज्ञः पृथवीतत्तवं नियुजसय चं।।१४।।
आत्मने चेति मन्त्रेण पादयो परि संन्यसेत्।

एवं च सलिं वह्नि वायुं चाकाशमेव च।।१५।।
महदोंकारतत्तेवे द्वे प्रकृतिपुरुषौ तथां
परत७वं ततो धीमान् पदायोर्लिके तथा।।१६।।
हृदयास्ये च शिरोदेशे पुनश्च हृदये द्वयम्।
सर्वागे च त्रयं ताबद्दशत्त्वानि तत्र तु।।१७।।
एवं कुय्र्याच्च सृष्टयादिं पयचात् संहारमन्त्रकैः।
अनामिकांगुष्टयोगात्पंचतत्तवानि विन्यसेत्।।१८।।
पंचागुलिमिहृदये वारद्वयमनिमिदतम्।
सर्वागे व्यापकं कुर्ययात् त्रिवारं च करद्धये[२]।।१६।।

सूत उवाच

एवं यः कुरुते विप्राः दश तत्वानि विन्यसेत्।
मन्त्रसिद्धिभवेत्तत्र निष्पापो जायते नरः।।२०।।
अन्यथा मन्त्रिणीर्यस्य हानिर्भवति भूतले।।२१।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये पंचषष्ठितमोऽध्यायः।।

FOOTNOTES

१T तेजि। २T पूर्वजन्न्यसेत्। ३T वदत्।

षष्ठषष्ठितमोऽध्यायः

ब्रह्मोवाच

संहारादिं यदा न्यासं शरीरे नृपसत्तम्[1]।
सर्वपापसमूहस्य नाशात् संहार उच्यते।।१।।
तस्मात्पादतलादूर्ध्व मर्द्धानं न्यासमाचरेत्।
प्रणवं पुरतः कृत्वा मध्ये वर्ण नमोऽन्तकम्।।२।।
एवं दशविथार्णनि तत्र तत्र च विन्यसेत्।
पदयोश्च जानुदेशे लिंगे नामौ हृदम्बुजे।।३।।
मुखे च नासापुटयोश्चाक्षुषोः कणर्योस्तथा।
शिरस्येवं परं न्यां कुयर्याद्विप्रो यथाक्रमम्।।४।।
सर्वागुलिमिश्चरणे विनांगुष्ठं च जानुनोः।
कन्ष्ठिया विना मेढे नामो चांगुष्ठमध्यतः।।५।।
अंगुष्टं तर्जनीम्यां तु हृदये विन्यसेद् बुधः।
सर्वागुलिभिश्च पुनः मुखे न्यासं समाचरेत्।६।।
नासापुटद्वयेऽड. गुष्ठानामि नामिके मुदां
हृदि तर्जनीमध्यमाभ्यां चक्षुषोः न्यासमाचरेत्।।७।।
कनिष्ठांगुष्ठयोगेन कर्णयोयच ततः परम्।
मध्यंगुल्या केवलया शिरोदेशेऽपि विन्यसेत्।।८।।
अनेन विधिना न्यासं संहाराख्यं विदुर्क्षुधाः।
सर्वेषामेनसां नाशात्संहरः कथितौ[2] बुधैः।।६।।
इदानीं च स्थितिं वर्ख्येये श्रृणुतां सुखद नृप३।
हृदयात्पादपर्यनतं शिरस्तो हृदयादचि।।१०।।
पूर्ववनमन्त्रवर्णाश्च तत्र तत्र च मुद्रया।
तथा न्यसेत्ततौ धीमान् स्थितिन्यासं वंदन्ति हि।।११।।
शिरः श्वणयोर्यत्र घ्रणयोश्च मुखे तथां
हृदि नामौ जानुदेशे लिंगे पादतले क्रमात्।।१२।।
पूर्वमन्त्रवर्णाश्च विन्यसेद्देशिकोत्तमः।
तत्र तत्र पदे न्यासं कुय्र्याच्चैवोक्तमुद्रया।।१३।।
सृष्टिन्यासमुं विद्धिं कुर्वतां सुखदं नृप[3]।
विभूतिपंजरं नाम न्यासं कुर्याद् या द्विजः।।१४।।
प्रकाशयामिम नृपते गुप्तं तत् साम्प्रतं परम्।

प्रणवाझयं ततो वर्ण बिन्दुना परिभूषितम्।।१५।।
नमोऽनतं न्यासमाकुर्यर्यात्तत्र तख च देशिकः।
आधारे च ध्वजे नाभौ हृदये च गले मुखे।।१६।।
ऊरुद्वेय स्कन्धयोध्च नाभौ कुक्षो हृदि न्यसेत्।
स्तनद्वेय पाश्वयोश्च पृष्ठे च कटिभागने।।१७।।
शिरस्यव तथा नेत्रे श्रुतो थ्राणद्वेय तथा।
कपोलयोश्च विन्यस्य ततो हस्तकसन्थिषु।।१८।।
तथेव पादयोः सन्धो पंच पंच च विन्यसेत्।
हस्तपादांगुलिवृन्दे प्रत्येकं वर्णकेर्न्यसेत्।।१६।।
शिरोमध्ये ततस्तस्य शिरसः पूर्ववार्श्वके।
दक्षिणे च ततः पश्चात् उतरे च ततः परम्।।२०।।
ततः शिरसि मूले द्वे बाह्वोश्च संक्थिनी द्वेय।
शिरस्याक्षिण च ववत्रे च कण्ठे च हृदये तथा।।२१।।
ध्वजे पादयोश्च क्रमादेव विप्रो न्यसेत् मन्त्रर्णान् तथा देशिकेन्द्रः।
पुनः त्रोत्रदशे तथा चक्षुषोश्च स्फुरद्गण्डयोः कण्ठके बाहुमूले।।२२।।
उरौ देशके पार्श्वयुग्मेऽपि नाभौ तथा जानुमध्येऽपि मेढे च गुहये।।२३।।
शीर्षे नेत्रेऽथ पवेत्र गलविमलपदे मंजुले बाहुमूले।
हृद्दशे नामिपद्मे तदनु च परमे जानुदेयो च भदे।।२४।।
पदिद्वन्द्वेऽथ[5] मन्त्री परिपठिततया मन्त्रवर्णाश्च तावत्।
वारं वारं न्यसेतुं सकलं तत्र तत्र क्रमेण।।२५।।
विभूतिपंजरन्यासं वंशोल्लासकरः परः।
सेवतां शृण्वतां तावत् सर्वकम्राणसिद्धिदम्।।२६।।
स्त्रीवशीकरणे श्चाध्यः पुत्रपौत्रविबर्द्धनः।
सुखारोग्यप्रदः रीमान् घनधान्यविवृद्धिदः।।२७।।
परत्र विष्णेश्चरणस्मृते वैकुण्ठवासदः[6]।।२८।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये षट्षष्तिमोऽध्यायः।

FOOTNOTES

१T भूप। २T वदत्। ३T भूप। ४T राज्ञः। ५T पद। ६T वासव्यः।

सप्तषष्ठितमोऽध्यायः

ब्रह्मोवाच

अतः परं प्रवक्ष्यामि मृत्युपंजरनामकम्।
यन्नृयासस्मरणादेव ह्यपरमृत्युर्विनश्यति।।१।।
विष्णोर्वल्लभतामेति तत्तत् सर्वजनप्रियः।
कुर्वतस्यस्य लोकस्य किं ब्रूमः फलमुत्तमम्।।२।।
प्रथमं प्रणवं चोक्त्वा द्वादशकारवर्णक्।
आद्यस्वरं बिन्दुयुतं पूर्वजं नृपसत्तम्।।३।।
केशवं चैव धातारं नारायण मतः परं।
अयर्यमाणं माधवं च मित्रं तत्र नियोजयेत्।।४।
गोविन्दं वरुणं धीमान् विष्णुमंशुं च योजयेत्।
मधुसूदनं भगवन्तं त्रिविक्रममयुं पुनः।।५।।
विवस्तन्तं ततो वामनमिमन्दं युगपत्तथा।
श्रीधरं पुर्ण्णिशब्दान्तं तृषीकेशमतः परम्।।६।।
पर्जन्येन युतं पद्मनाभं त्वष्ठापरमेव च।
दामोदरं विष्णुयुतं सर्वोनेतान् परस्परम्।।६।।
तया चान्त्यान् कृष्णांवांश्च नमोःऽन्न्कान्।
चातुर्थ्यन्तान् विधायाशु न्यसेन्नयास कलापवित्।।८।।
भाले चौकीदरे तावत् हृदये गन्धकूपके।
दक्षपार्श्वे ततो धीमान् भुजमूले च वामके।
भुजान्तरगले तावत् पृष्ठे च ककुदिक्रमात्।।१०।।
तारभाद्यौ समुच्चाय्यै नमः शब्दं शुभोदयम्।
भगवते चेत्युक्ताथ वासुदेवाय यत्फलम्।।११।।
अनेन मनुना प्राज्ञो मूर्ध्निन्यासं समाचरेत्
इमं मन्त्रं न्यसेद् यस्तु मूर्ध्नि देहे च वर्ण्णकान्।।१२।।
संन्यस्य जायते मतर्यः कोटिचन्द्रसुशीलतः।
कोट्यर्कसंन्मिरुचिर्मलः परमद्युतिः।।१३।।
सर्वमोनवाप्नोति शेषेसरे मोक्षवाप्नुयात्[2]।
दशाक्षरस्य मन्त्रस्य[3] रुषादिं च पुनश्चरेत्।।१४।।
पंचागं तच ततः कृत्वा ध्यानमेवं समाचरेत्।
दाहोत्तीर्णसुवर्णानां पद्मे पद्मासनं शुभम्।।१५।।

किरीटाविकभूषामिर्नानाभिः परशोभितम्।
यांखचक्रगदापद्मधारिणं करुणोज्ज्वलम्।।१६।।
फणाभिः सपत संख्याभिः शोभमानं शुभोदयम्।
शरच्चन्द्रामिनमं शन्तं प्रणतानां सुखावयम्।।१७।
एवं विधं हरिं ध्यात्वा मन्त्रमूर्ति यदा स्मरेत्।
तद् वदामि महानाथ[४] श्रूयतामेकचेतसा।।१८।।
विश्वामित्रो वसिष्ठं ज आबा लिर्गोतमश्च सः।
अत्रिश्च पुलहश्चैव मार्कण्डेयो महातपाः।।१९।।
विश्वामित्रो वसिष्ठं च भद्वाजश्त नारदः।
कश्यपः सनकादिश्च जाबा लिगौतमश्च सः।।२०।।
अत्रिश्च पुलहश्चैव मार्कण्डेयो महातपाः।
पराशरो मरीचिश्च गर्गश्चान्ते महर्षयः।।२१।।
ध्यानां चकुर्नपश्रेष्ठ ब्रह्मरुपतया ब्रजे।
गोपबालस्वरूपं तं हरिं गोगोपवेष्टितम्।।२२।।
ध्यानयोगेऽपि ते सर्वे मन्त्रमेवं प्रलोमिरे।
कामबीजं शिरादेशात् कृष्णस्य सममजायत।।२३।।
गोचेष्यक्षर मेतुत कर्ण्णयोः समापदयतो न।
पीकारो नासिकारन्घ्रात जकाराश्चक्षुषोतस्तथा।
गोचेत्यक्षरमेतत्तु कर्णयोः समपद्यत।।२४।।
आननाश्च नकारस्तु वकारो गर्गदेशिकः।
लकारं विद्धि हृदये भकारः कुक्षितातोऽभवत्।।२५।।
यकारो नाभिजो ज्ञेयः स्वेति जानुप्रदेशतः।
हाकारः पादयोजातो जानीहि क्षितिपालक।।२६।।
एतैर्दशाक्षरैर्दिव्यै कृरूणदेहसमुद्भवैः।
जातो गोपालमन्त्रोऽयं दशार्ण्णः परिनिर्मितः।।२७।।
एवं च ध्यायतां तेषां मुनीन्द्राणं नृपोत्तमः।
आवर्तितानि वर्णानि पश्यतां ज्ञानचक्षुषा।।२८।।
पुनः कृष्णाय चेति वर्णत्रयं हरिललाटतः।
दृश्यानि नाथ गोविन्दश्चतुथ्र्यन्तौ भुजद्वये।।२९।।
जातस्तनमन्त्रवर्णेऽसौ त्वष्टाधिकदशार्णकः।
पश्चाज्जातौ मनुस्तावत् तन्मुनिब्रह्मसंमुदे।।३०।।
मन्त्राक्षराणां यद्रूप कथ्थयतेऽत्र नृपोत्तम।

बीजं तन्मदनस्यापि स्त्रीपुंवच्चिह्नवेष्टितम्।।३१।।
अर्द्धांगे नीलवर्णाभं वामांगे च ताडित्प्रमम्।
चक्रपद्मधरं शान्तंनानालंकारमण्डितम्।।३२।।
ब्रह्मस्वरुपं तद्बीजं ध्यायेच्च सर्वकामदम्।
गोवर्णो नीरदश्यामः शंखचक्रगदाब्जधृक।।३३।।
पद्मासने भूषणाढृयः पीतवासाः स्मिताननः।
नित्यं भवयतां भूप मोक्षः स्यान्नात्र संशयः।।३४।।
पीकारं पीतवर्णाभः पीनोत्तुंगरस्तनः।
नानाभूषणभूषाढयः स्मरतां सर्वसौख्यदः।।३५।।
पद्मं च ज्ञानमुद्रां च बिभ्रती समदुंश्यते।
जकारो जगदाकारो विश्वरुपः परर्तिहा।।३६।।
शंखचक्रधरः श्रीमान् मुनीनां गोचरोऽभवत्
नकारो नीरदः श्रीमान् नानालंकारसुन्दरः।।३७।।
निरजासनमृन्नितयो गदाशंखधरोऽजनि।
एवं यो ध्यायते मर्त्यः कदाचित्तस्य न व्यथा।।३८।।
बकारो बिन्दुकामारश्चक्रपाशधरः शुचिः।
विभूषणधरः स्रग्वी सरतातमृतप्रदः।।३९।।
लकारो लोलनेत्रान्तो लक्ष्मीरुपस्तडित्प्रभः।
सार्वभारणसम्पन्नः स्मरतामार्तिनाशन।।४०।।
पद्मासनः पद्मधरोऽमयहस्तेऽत्र पाकः।
माकरो भास्करामासो माविनीलललिताकृतः।।४१।।
नानाभूषाधरः स्तग्वी स्मरणं पापनाशनः।
यकारश्चन्द्रगौराभोऽमयदो वरदोऽनघः।।४२।।
सवीभूषणादिव्यांगो ध्यायतां दुःखनाशनः।
स्त्रीरुपी पीतवसनः। पीतवर्ण्णः परात्परः।।४३।।
पद्मोल्लासिकरद्वनद्वः श्वेतवर्णो विपातहा।
हाकारो हाटकाकरो हारादिभूषणोज्जवलः।।४४।।
अंगनांगधरः श्रीमान् पाशांकुशलसत्करः।
स्मरतां सर्वपापानि नाशनः सुखदोऽभवत्।।४५।।
कृष्णायेत्क्षराणि तु नानालंकारभूषिताम्।
शंखचक्रामयवरा पाशांकुशयदाभिहि।।४६।।
स्मरतां सर्वपापानि नाशमायान्ति तत्क्षणात्।

सर्वकाममफलं तत्तु जायते नृपसत्तम[10]।।४७।।
गोविन्दाय चेति वर्णचतुटयमिदं महत्।
नानावर्ण्णघरंधीरं नानाभूषितम्।।४८।।
शंखचक्रगदापद्मधनुर्बाणधरं परम्।
पाशांकुशसमायुक्तं ध्यायतां च तपस्विनाम्।।४९।।
आविभेर्तमिदं ये ये ध्यायन्ति प्रतिवासरम्।
ते सर्वे सुखमामुजय यान्ति विष्णौः परं पदम्।।५०।।
ते सर्वे रुषयो[11] भूप मन्त्रमिमत्थं द्विधा गतम्।
संप्राप्य त सुखरं भेजिरे तद्विधानतः।।५१।।
पूर्वोक्तरुष्यादि न्यासकर्मधिनातः।
ध्यानलंधेन मन्त्रेण दशार्ण्णेन मुनीश्वराः।५२।।
गोगोपगोपीसंयुक्तं तं कृष्णं समुपात्रिताः।
एतनममन्त्रवशं ब्रह्म यच्च नीलाद्रिसंज्ञितम्
मुनीनां ध्यानतो यतु लभ्यंभवति भूपते।।५४।।
यद् ब्रह्म पूर्णमानन्दं सच्चिदानान्मव्ययम्।
तदेवास्य च मन्त्रस्य वशं भवति[12] निश्चितम्।।५५।।
अनेन मनुना राजन् दशार्ण्णे सदार्चकः।
दायरुब्रखार्चनं कुय्र्यादित्येतत् कथितं मया।।५६।।
इति श्रीसूतसंीहितायां नीलाद्रिमहोदेय सप्तषष्ठिमोऽध्यायः।।

FOOTNOTES

१T आद्यस्मरं। २T मवाप्नुथाः। ३T मन्त्रस्य। ४T भूनाथ। ५T भूपतमो। ६T राज्ञः। ७T ऋषीनां। ८T नानालंकार। ९T भवेत्। १०T भूप। ११T मुनय नृप। १२T भक्त निश्चित।

अष्टषष्ठितमोऽध्यायः

ब्रह्मोवाच

एतद् विधानतः कर्तु यदि शक्तिर्न जायते।
अष्टादशाक्षरेणेव यथा कुर्य्थ्याद् वदाम्यहम्।।१।।
अष्टादशाक्षरो मन्त्रः मन्त्रेश्रणीषु दुर्लभः।
मुनार्नी माननीयो यः कामधेनूपममः सताम्।।२।।
विष्णोः प्रीतिकरो नित्यं साधकानां हितप्रदः।
इदानीं कथ्यते सोऽयं मन्त्रोऽरूटादशवर्णकः१।।३।।
कामबीजं समुच्चाय कृष्णोयति ततः परम्।
गोविन्दाय ततश्चोक्त्वा गोपीजनपदं ततः।।४।।
वल्लभाय तदीयस्तोन्ते वह्निजायां ततो वदेत्।
ऐतनाष्टादशार्ण्णख्य स्त्रैलोक्येप्सितदायकः।।५।।
मन्त्रं मन्त्रविदां पूज्यं गोपनीयं सदैव हि।
प्राकाश्यं साधुषु क्षिप्रमप्रंकाश्चं च दुर्जने।।६।।
सतस्य मन्त्रस्य ऋषिर्बह्माहं नृपसत्तम्[2]।
गायत्रीछन्द एव स्यात् श्रीकृष्णप्रकृति ततः।।७।।
दुर्गाधिष्ठात्रिका जाता देवतास्मिन् मनुः स्मृता।
क्लीं चात्र कथ्यते बीजं स्वहाहक्तमिरुच्येत।।८।।
चतर्वर्गफलावाप्तौ विनियोग विनियिचतः।
प्रणवादयं नमोऽनतं च कामबीजं च कामदम्।।६।।
अंगुष्ठाय स्वमन्त्रेण न्यासं कुर्याद् विचक्षणः।
आद्यत्रयं तु तर्जन्या माध्यमाया चतुष्टयम्।।१०।।
अष्टोह्ये नामिकायां च द्वयमस्त्रे च विन्यसेत।
एतन्मन्त्रस्य पंचांग जन्मया कथ्यतेऽधुना।।११।।
तत् षडंगस्य मनुना क्रमात् पंचांगमान्यसेत्।१२।।
श्रीमन्नीरदनीलसुन्दरतनुः पिच्छावतं[3] स प्रियो
गोपालभिनवांगना सुनयनानन्दप्रदांगः शुभः।
गोगोपीवृत–एष–शारदशशिप्रोद्दा सिवस्त्रक्वण–
द्वेणुः पंकजलाचनोऽवतु स नः त्रीदेवकीनन्दनः।।१३।।
दशाक्षरस्य यद् ध्यानां त्च्चाष्टदशके स्मृतम्।
यदा कर्तु न शकयते तदैतध्यानमाचरेत्।।१४।।

शिरस्यान्धिकदेशेऽपि चक्षुषोः कृष्णयोस्तथा।
घ्राणयोश्च मुखे चैव कण्ठे वा हृदये तथा।।१५।।
हृदि नामौ ध्वजे चैव जानुयुग्मे पदद्वये।
एतन्मन्त्राक्षरं सम्यक् भिन्नं न्यासेत् समन्त्रिकः।।१६।।
प्रणवाढयं नमौनतं च हृत्वा तेषु क्रमान्न्यसेत्।
एतदनते पुनर्दक्षे मन्त्रस्य पदपंकजम्।।१७।।
न्यसेत् यथा देशिकेसौ स्वदेहे नृपसत्तम४।
चतुरक्षराशीति च स ख्याति च मुखे न्यसेत्।।१८।।
तद्वच्च हृदये भूयो ध्वजेऽक्षरचतुष्टकम्।
पदद्वेय द्वयं तावन्न्यसेन्मनत्रविदां पर।।१९।।
तारद्वेयन पुटितं मन्त्रं कृत्वा प्रयत्ननः।
तेनैव देशिकः कुर्याज्जापकत्रयमात्मनि।।२०।।
अनेन मनुना प्राज्ञः पुटितं मातृकाक्षरम्।
स्वस्थस्थाने न्यसेत्तावत् प्रत्यक्षरमधयक्षय्।।२१।।
मूर्तिपंचरितामानं पूर्वोकस्तं न्यासमुत्तमम्।
अस्मिन्नौ परं कुर्यादाचार्य्यो विष्णुपूजने।।२२।।
पूर्वनमन्त्र ऋष्यादिं समाचर्य्य स देशिकः।
ध्यानं कृत्वा ततः कुर्याद्दिग्बन्धनमिदं से चरेत्।।२३।।
पूर्ववद् व्यापकं कुर्शदाचार्य्यश्च त्रयं ततः।
शंखचक्रे गदापद्मे दर्शयेच्च ततः परम्।।२४।।
मुषलं शार्ंगधनुषं नन्दकं दर्शयेत्पनुः।
पाशांकुशौ वेनतेयं श्रीवत्सांक च कौस्तुभम्।२५।।
वेणु तथा भवरो वनमालां च दर्शयेत्।।२६।।

ब्रह्मोवाच

कामक्रोधलोभमोहाः मदमात्सर्यकौ तथा।
एते षडरयः सन्ति शरीरे नृपसत्तम्[१]।।२७।।
किंचित्स कर्म कर्तुश्च विघ्नमादवति क्षणम्।
मुद्राणां दर्शनादेव तेषां यन्मुद्रणं भवेत्।।२८।।
तसमान्मुद्र इति ख्याता ह्यतो मुद्राः प्रदर्शयेत्।
तासां च लक्षणं वक्ष्ये विघ्नध्वंसाय साम्प्रतमम्।
क्षक्षस्य चतुरंगुल्या वामांगुष्ठं विधृतय च।।२९।।
सब्यस्य चतुरंगुद्यया क्षांगुष्ठं नियोजयेत्।

अनेन शंखमुद्रास्यात्प्रीतिदा सर्वदा हरेः।।३०।।
सव्यांगुष्ठं च दक्षस्य सा स्व्यष्च कनिष्ठिका।
तथांगुष्ठं च दक्षस्य सा स्वयष्च कनिष्ठिका।।३१
अन्या प्रसारितां कुर्यात्तच्च चक्रं प्रचक्षते।
तच्चक्रदर्शनादेव राक्षसाद्यः पलायिताः।।३२।।
अन्येष्वांगुलिसम्बरद्धेत् कफोणीद्वयलल्लकै।
तद्गते मध्यमायुग्मे कदेयं गदनाशिनी।।३३।
पृष्टतो लग्नकांगुष्टौ त्वन्योऽन्यप्रसृतांगलौ।
पद्माकारौ करो कुय्र्यात्पद्मम देप्रयमिष्टदा।।३४।।
मुष्टिं हस्तद्वेय कृत्वा वामौपरिच दक्षकम्।
अंगुष्टतर्जनीयोगान्मुषलं प्रसृतांगुलौ।।३५।।
वामै च तद्बद्दक्षे च करे कृत्वा स देशिकः।
काण्ड्वत् दक्षकर्णान्तौत्कार्षणादेव या भवेत्।।३६।।
शांगमुद्रापि सा ज्ञेया सर्वसिद्धिप्रदायिनी।
उदगते दक्षहस्तेऽपि कनिष्ठांगुष्ठपीडने।
लग्नोद्गतंगुलि तमा खड्गत्वाह्वायासः प्रदा।
दक्षमुंट्यएतायां तु तर्जन्युपरि स्थले।।३७।।
मण्डलाकारसंलग्नतर्जन्युपरि स्थले।।३७।।
मण्उलाकारसंलग्नतर्जन्यांगुष्ठयोर्यदि।
सवये त्रिमिः पलाकार्णत्पाशमुद्रा प्रकीर्तिता।।३८।।
कुर्वती पश्यतां तावत् भवपाशबिनाशिनी।
दक्षहस्ते ततः कुर्यान्मुष्टिं च तर्जनीं बिना।।३६।।
तर्जनीं किंविदाकुंच्य दक्षहस्तेऽथ चौद्गते।
अंकुशामिघमुद्रेयं शत्रुसंहनिवारिणी।।४०।।
अन्योऽन्यपृष्ठसंलग्नौ हस्तौ कृत्वा ततः पुमान्।
अंगुष्ठेऽगुष्ठमायोज्य कनिष्ठायं कनिष्ठिकाम्।।४१।।
तर्जनीं चैव तर्जन्यां शेषंश्च प्रविविच्च्रेत्।
वेरानतेयाख्यामुद्रेयं विष्णोः सांनिध्यदायिनी।।४२।।
मिथः संलग्नपृष्ठाभिरंगुष्ठामिः करद्वये६।
तजन्युपरि दक्षस्य वामस्य च कनिष्ठका।।४३।।
तद्वद्दक्षकनिष्ठायां विशेत्सर्वस्य तर्जनी।
मध्यमानामिकाम्यानतु वामांगुष्ठं नियोजयेत्।।४४।।

नुनर्मध्यानामिकाभ्यां दक्षंगुष्ठं निपीड्य च।
त्रीवत्समुद्र कथिता सदा त्रीपतिवल्लभा।।४५।।
अन्योऽन्यपृष्ठसंलग्ने वस्त्रयुग्मे निष्ठिकाम्।
वामस्य च कनिष्ठायां वस्त्रयुग्मे कनिष्ठिकाम्।
वामस्य च कनिष्ठायां पुनर्मध्यं च छन्दयेत्।।४६।।
दक्षसम्भवतर्जन्यामथ दक्षकरस्य च।
मध्यांगुष्ठानामिकाभिर्वामसम्भूततर्जनीम्।।४७।।
संयोगोद्‌गतवस्त्रं च त्वंगुष्ठं ममिणबन्धके।
एषा कौस्तुममुद्रा स्याद्धनधान्या द्विवृद्धिदा।।४८।।
वामस्रूोष्ठगतैंऽगुष्ठे तत्मनिष्ठां पुनः स्पुशयेत्।
दक्षांगुष्ठसतत्कनिष्ठा प्रसारमध्यमाचरेत्।।४६।।
संलग्नाभिश्च शीर्षाभिरंगुलीमिश्च या भवेत्।
वेणुमुद्रा प्रशसता स्यात् विष्णुभक्तिप्रवर्द्धिनी।।५०।।
प्रसारितोद्यतशयं वामबाहु फणाकृतिम्।
कृत्वा भयाशच मुद्रा सा सर्वत्र भयनाशिनी।।५१।।
जानूपगर्यग्रकं दक्षं प्रसृत्तयौणनपाणिकम्।
भुजं प्रसार्य या जाता तवरमुद्र बरप्रदा।।५२।।
तर्जनीद्वयमूलं तदंगुष्ठाभ्यां विधृत्य च।
तादृशं तर्जनीयुग्ममधोमुखतयां ध्रितः।।५३।।
नयेत्कण्ठं च मालाक्षत्पातयेपाश्व्रयो पुनः।
वनमाला षेडशमुद्रास्ताः यस्तवात्मानं न दर्शयेत्।
निर्मलोम नभवेत्सोऽपि न योग्यो भविताच्र्चने।।५५।।

ब्रह्मोवाच

अन्तर्यजनमाचक्षे साम्प्रतं शृणु भूपते'।
यस्य त्रवणमात्रेण नरः स्यात् क्षीणकल्मषः।।५६।।
ध्यात्वाथ नन्दतन्यमात्मानं स च देशिकः।
आत्मनस्त्स्य कृष्णस्यामेदंसंचिन्तयेत्तदा।।५७।।
यदा स्वयं न देवः स्यात्तदा देवार्चनेऽक्षमः।
अतो हि यत्नतो नूनमभेदं चिनतयेत् नृपः।।५८।।
ततो हृदि हृदं बद्धवा निजमुद्रां स देशिकः।
कामबीजं जपेत्पंचविंश प्रामाण्यस्तदा।।५६।।
बिल्वमुद्रा लक्षणं च कथयामि समासतमः।

सव्यहस्ततले दक्षांगुष्ठं तस्योपरि न्यसेत्।।६०।।
वामांगुष्ठ पुनः स्वयचतुरंगुलिमुद्रणम्।
तत्र दक्षकरस्यापि प्राण्णाङ्गुलिबन्धनो।।६१।।
या छावेद् बिल्मुद्रा सा गुप्ता सर्वार्थसाधिका।
अर्घ्यादिकोपचारैश्च मनसा आ त्मनमर्चयेत्।।६२।।
वैश्वदेवाश्यहोमं वे कुर्यान्मानसिकं ततः।
तदुच्यते नृपश्रेष्ठ[1] सावममानतया शृणु।।६३।।
मूलाधारं कुण्डमिति ध्यात्वा देवाग्निदीपितम्।
धर्माथर्मेऽपि संयुक्तं मूलमन्त्राढ्यसंयुतम्।।६४।।
मनश्रुवेण सम्पन्नं सुषुम्णा सृगयुत नृप।
नानाहुतिरहन्तादिः प्रत्येकं जुहुयाद् द्विजः।।६५।।
अहनतां च त्वसनां च पैशुन्यं कामक्रोधकौ।
लोभमौहौ मदं चापि मामत्मसयर्य च क्रमाद्धुनेत्।।६६।।
प्रणवाढ्यममहनतादिं त्वहं चेति ततो वदेत्।
जुहोमीति पदं तत्र स्वाहा शब्दमतः परम्।।६७।।
अनेन मनुना मन्त्री मनसा जुहुयात् पृथक्।
पद्दक्षवृत्तिरिहं चात्र जुहोतीति वदेच्च वा।।६८।।
होमाभवे यदा जाते त्वशक्तः स्याच्च देशिकः।
मूलमन्त्रं जपेत् भूप द्विगुणं पूजनक्षणे।।६६।।
आरात्रिकां ततः कुर्यात् मनसाथ प्रयत्नतः।
गण्डूषां च तातौ दक्षाद्रविसंख्यां विधानतः।।७०।।
इं च मानसी पूजा गृहयतां परमेश्वरं।
इत्युक्त्वा च नमस्कृत्य समपर्याथ स देशिकः।।७१।।
हीनपूरणममाकुयुर्यात् बाह्यपूजां समाचरेत्।
पूजा च देवगता कर्तव्या त्रिविधा नधाः।
मनसा यार्च्चने प्रान्ते बाहयपूजार्थमर्च्चकः।।७३।।
प्रार्थयेत् देवदेवं तं तच्द्दृणुष्वावनीश्वरः।।७४।।

सूत[11] उवाच

शृणृध्वं मुनयः सव्रे बाह्याचर्च प्रार्थनाविधिमम्।
यच्छफत्वा मानवाः विमुक्ताः स्यूर्न संशयः।
प्रभोर्मनोगतां पेजां यथा त्रानं कृता मंयां
गृहीत्वा ज्ञापय क्षिप्रं मां बाह्यार्चनकर्मणि।।७६।।

इत्युक्त्वा स तु देशिको द्विजवरः पूजार्थजातादरः।
श्रीविष्णुं प्रणिपत्यनम्रशिरसा संप्रार्थर्य तं चेतसा।।७७।।
तद्वाद्यार्च्चनमाचारेदविरतौ भवत्या यथा तद्भवे
त्तावत्तत्कथयामि साम्प्रतमधै मूयं यतः पूजकाः।।७८।।
इति श्रीसूतसंहितायां नीलाद्रिमहोदये अष्टषष्ठितमोऽध्यायः।।

FOOTNOTES

१T दृश्यर्क्षकः। २T भूपसत्तम। ३T पद्मावतस प्रियो। ४T भूपसत्तम। ५T भूपसतम। ६T उनमते। ७T लग्नगतांगुलितमा। ८T हस्तंद्वेय। ६T नुपते। १०T भूप। ११T राजश्रेष्ठ। १२T भूप। १३ सूत उवाच id absent in T.

ऊनसप्ततितमोऽध्यायः

ब्रह्मोवाच

पूजा चात्र ब्रजस्यास्य यादृश्यं घटनं भवेत[1]
यैर्विना न भवेत् पूजा तेषां त निर्णयं शृणु।।१।।
यादृक् फलैर्भवेत् यच येषु च वस्तुषु।
तद् व्यवस्था मया भूयः कथ्यते तव सन्निथौ।।२।।
प्रथमं पंचपात्रस्य निर्णयं कथयाम्यहम्[2]।
तालैः शेडशसंख्यातैः निर्मितं स्यानमनोहरम्।।३।।
तावत् पलप्रमाणम्भः पूरितोदरसुन्दरम्।
मुखं तु मण्डलाकारं सुप्टु ग्रीवं शुभोदयम्।।४।।
उदरेमप्रदेशस्य प्रमाणजलनिर्गमम्।
प्रणाल्योपरि पद्मं वा चक्रं वा रचयेत्सुधीः।।५।।
मण्डलाधरचक्राढ्यं रौऽयं स्वर्णमयं तथा।
तच्च ताच्चमयं वापि पित्तलैर्वापि कारयेत्।।६।।
तादृशे जलपात्रेऽस्मिन् गन्धपृष्पे च पातयेत्।
वीक्षणादिकं संस्कारं कृत्वा तत्र च देशिकः।।७।।
समुदसम्भवं शंखनिर्मलं चारुवृत्तकम्।
शोभनाग्रं साधु पृष्ठं मंजुलं मंजुकोदरम्।।८।।
नामिदेशौज्ज्वलं सारं विष्णोः करतलाश्रयम्।
पूपायाद्धदानेऽपि प्रशस्तं तादृशं स्मृतम्।।९।।
धौतं कुर्यात् प्रयत्नेन वस्त्रमन्त्रेणर देशिकः।
चतुरंगुलप्रमाणेनल विस्तीर्ण तत् प्रमाणतः।।१०।।
उच्छायं स्यात्रिपादाढयं त्रिगुणैः परिनिर्मितमम्।
शंखाधरमिति प्राज्ञश्ठवर्णाकृतिकं चरेत्।।११।।
तसद्वहिन्कणारक्तं धौतयेत् प्रणवेन तत्।
पूजास्थानं तदा मन्त्री शोध्येच्च जनाम्भसा।
त्रिकोणं प्रथमं कुर्यात् षट्कोणं च ततः परम्।
वृत्तमेकं ततः कृत्वा चतुरस्रं लिखेत् पुनः।।१३।।
चतुर्द्धारसमायुक्तं राचयेनमंचमुद्रया।
तन्ध्ये मण्डुकं कूर्ममनन्तं मनसार्चयेत्।।१४।।
गन्धं पुष्पं च निक्षिप्य मण्डूकादित्रयोपरि।
शंखाधारं त्रिपादं तं स्थपयेद्देशिकोत्तमरु।।१५।।
तत्राधारे ततो वहि्पकालरूपे यमुज्ज्वले।
शंखं च तादृशं दिव्यं स्थापयेच्चन्द्रसन्निभम्।।१६।।

कामवीबेज पात्राणि प्रोक्षणीप्रमुखानि च।
अथवा प्रणवेनेव द्यौतयेच्छुद्धवारिणा।।१७।।
शुद्धं शुक्लं सूक्ष्मतरं पात्रार्थ यस्त्रमाक्षिपेत्।
श्यामाकं च ततः श्वेत सर्णपोडशके तथा।।१८।।
कुकुमाबजे ततो विष्णुक्रान्ता च पुष्पजालकम्।
दुर्वाच्च्न्दनममेवं जलेऽसिमन् पातयेद् बुधः।।१९।।
द्रव्याणामेवच्चिह्नेएक्त युतं स्वामाद्य सत्तमम्।
शतपुष्पदालंकारं[४] कर्णिकारयुतोदम्।।२०।।
द्वुगुलोच्छ्रादायशोभाढ्यं चतुष्पलविर्निितम्।
तत्प्रमाणाम्बुसंयुक्तं प्रोक्षणीभाज़र्नं पुनः।।२१।।
शंखस्य दक्षिणे देशे प्रोक्षणीं स्थापयेत्पुनः।
पाद्यपात्रं वसुपलं घुस्तूरकुसुमाकृति।।२२।।
अष्टापलजलाधरं तादृशं रचयेद् बुधः।
तत्र शंखोत्तरे भागे स्थापयेतिक्षतिपोत्तम्।।२३।।
पलद्वयं कृतं तावत्प्रोक्षार्थ च तदा कृति।
द्विपलाम्बुयुतं काय्र्य माजनं यतु जायते।।२४।
पातयेदर्थपात्रेऽस्मिन् द्रव्याण्येतानि भूपते।
उशीरं च यवांश्चैव तिलानि सर्षपान् तथा।।२५।।
कुशांश्च गन्थपुष्पे द्वे दूर्वाश्च पूर्वमानतः।
एतद्द्रव्ययुतं दिव्यमर्थमाज़नकं च यत्।।२६।।
पाद्यपात्रोत्तरे ततु स्थापेयद्दहिकोंत्तमः।
उशीरं जातिकर्पूरहिमगन्धौ मनौहरौ।।२७।।
लवंबं एलाफलकं गन्धकांकोलकं तथा।
मुराख्यं च ततो धीमान् पूर्ववन्मानतः पृथक्।।२८।।
आचामनीये संयोज्य तच्छे्ष्ठाचमनीयकम्।
आरामपात्रं द्विपलं द्विपलाम्बु समायुतम्।।२९।।
चतुरंगकोच्छा्यमर्द्वपात्रैत्तरे न्यसेत्।
पूर्वेषु तेषु पात्रेषु यानि द्रव्याणि भूपतं[५]।।३०।।
पातयेत् कर्मलाभर्तुः प्रीतये सर्वदा हरेः।
अन्यथा तन्न गृह्णीयाद्विष्णुः प्रीतो भवेन्न हि।।३१।।
चतुपलं समुचछ्ायं वेदांगुलकमानतः।
दध्याज्ममघुखण्डानां चतुर्ण्णा च चतुष्पलैः।।३२।।
पूरितं मधुपकं च माजनं सर्पिघानकम्।
शंखस्यैशानकोणेऽस्मिन् स्थापयेत् साधकोत्तमः।।३३।।
आचामपात्रयुगलं पूर्ववत्परिनिर्मितम्।

स्वाग्रे स्थापेयद्धीमान् तावत्पलजलान्तिकम्।।३४।।
तयोश्तौत्तरदेशेऽपि पाद्यपात्रं च पूर्ववत्।
कृत्वाथ स्थापयेद् भूयो दिव्यवीरसमन्वितम्।।३५।।
आपोशानस्य गत्रं च द्विपलं द्विपलाम्बुकम्।
पाद्यपात्रोत्तरे तीरे देशिकः स्थापयेत्पुनः।।३६।।
षोडशेः पलकैः दिव्यं घटितं जलपात्रकम्।
विशुंजसमच्छायं घटाकरं मनोहरम्।।३७।।
शतसस्य पलाम्भोभिः पूय्र्यमाणं यथा भवेत्।
तादृशं स्तनपात्रं च ह्यापौशानौत्तरे न्यसेत्।।३८।।
आसनं स्वागतं चैव प्रोच्छनांशुकमेव च।
वस्त्रैत्तरीय च तथा यज्ञसूत्रं च भूषणम्।।३६।।
गन्धपुष्पे च भूपाल ह्येतानि येषु संन्यसेत्।
तेषां विवरणं ब्रूममः पात्राणां बृणृ साम्प्रतम्।।४०।।
फलेनेकेन तत्पात्रं पद्मकारं मनोहरम्।
मध्ये पद्मसमायुक्तं ष्झोढालसमुच्छ्रितम्।।४१।
षडंगुलायतितुक्तं प्रत्येकं रचयेत्सुधीः।
त्रिपंक्तितया चागे तानि पात्राणि विन्यसेत्।।४२।।
रत्नैर्वा मणिभिर्वापि रजनैशचन्द्रसम्भवैः।
असम्भवै वा ताम्रैश्च सर्वपात्राणि कारयेत्।।४३।।
यतुर्वर्गा भवेत् रत्नात्कांचानाद्धसनतिः।
रजतात् भूमिलाभः स्यादारोग्यं ताम्रतो भवेत्।।४४।।
यथाशक्तितथौ भूप[6] पात्राणि रचयेद् बुधः।
वित्तसाठ्यं च कुर्वीत कुय्र्याच्चेन्निष्फलं भवेत्।।४५।।
चतुर्विधानि पात्राणि प्रशस्तानयच्युतार्चनं[7]।
पात्राणां निर्णश्यचोक्तः यः कारोति यथाविधि।।४६।।
तैः पात्रैः पूजयेद्धीमान् दारुब्रह्म निरंजनम्।
स सर्वान् सकलान् कामन् लवध्चाऽनन्दति भूतले।।४७।।
दारुब प्रसादेन शेषे मुक्तो भवेद्धबम्।
उक्तेन येन विधिन तदर्द्धेन च वा चरेत्।।४७।।
तस्यार्द्धेन च पात्राणि कारयेत्पूजने हरेः।।४८।।
इति त्रीसूतसंहितायां नीलाद्रिमहोदये एकौनसप्ततितमोऽध्यायः।।

FOOTNOTES

१T भवेतं। २T वदामिहं। ३T जदाम्मसा। ४T जलाकारं। ५T नृपते। ६T नृप।
७T प्रशतान्याघार्चने।

ब्रह्मोवाच

क्षकारादीन् मातृकायां त्वकारान्तान् सबिन्दुकान्।
प्रतिलोमतया जल्पन् वर्णान् शंखेऽम्बूपूरयेत्।।१।।
अभावे मूलमन्त्रेण शंखेंऽपि जलपूरणम[1]।
प्रोक्षण्यादिषु पात्रेषु मूलमन्त्रेण वा पुनः।।२।।
बीजेन वा देशिकेन्द्रो जलपूरणमाचरेत्।
प्रोक्षण्यादिषु सर्वेषु सजलेषु च देशिकः।।३।।
गन्धं चिह्नकमाने पात्येच्चन्द्रसंनिभम्।
केवलं स्नानपात्रेऽस्मिन त्रिचिह्नं तच्च पातयेत्।।४।।
शंखोदके गन्धपुण्ये हृन्मन्त्रेण च पातयेत्।
शिखामन्त्रेण तत्रैव दूर्वाक्षतचयं क्षिपेत्।।५।।
धूम्राक्षात्वर्च्चिऋण्या च ज्वालिनी च ततः परम्।
ज्वोलिनी च ततो मूप[2] स्फुल्लिंगिन्येव सत्तम्।।६।।
स्वत्रीश्चैव स्वरूपा च कपिला च ततः परम्।
हव्यकव्यकदेहा च ह्यता दकशकलाः स्मृताः।।७।।
एकदैवार्च्चयेद्वापि सकृद्वा पूजयेद् बुधः।
स्वनामतच्चतुर्थर्यन्तं शंखपीठेऽपि ताः कलाः।।८।।
तादृशकलात्मानं भावयेद् वह्निमेव[3] च।
चतुथर्यन्तं नमोऽन्तं च समुयेऽध्ययं मनुः।।९।।
तपिनी तापिनी चेति घूम्रा चैव मरीचिका।
जवालिनी च रुचिष्यैव सुषुम्णा चैव रोगदा।।१०।।
बोधिनी तारिणी चेति क्षमा चैव ततः परम्।
एतद्द्वादशकं शब्दं कलाशब्दमतः परम्।।११।।
आत्मशब्दं च संयोज्य सूय्र्यमण्डलमेव च।
प्रणवहाड्यं चतुथर्यन्तं नमोन्तं स च देशिकः।।१२।।
उच्चार्य पूजयेच्छंखे गन्धपुष्पप्रपातनैः।
अमृता मानदा चैव पूजा च नृपसमम[4]।।१३।।
तुष्टिः पुष्टी रतश्चैव धृतिश्च शंखिणी तथा।
चन्द्रिका च ततः पूर्ण्णा कामदा च ततः परम्।१४।।
स्वरवाच ततः प्रोक्ता कलाः षोडश विस्मृताः।

एतच्छोडशककला आतमेति योजयेतत्पदम्।।१५।।
चन्द्रमण्डलमेव च चतुर्थ्यन्तं नमोऽन्तकम्।
उक्त्वा क्षिपेद् गन्धपुष्पे जले चैव स देशिकः।।१६।।
आधारस्य विशुद्धयर्थ तत्राग्ने परिचिन्म्तनम्।
कुर्यात् यतस्ततस्तत्र दशाग्नीयर्चयेद् बुधः।।१७।।
शम्बूकभेदः शंखस्तु तस्य शुद्धयर्थमर्चकः।
तस्य सूर्यः र्सस्वरूपत्वमवश्यं चिन्तयेतु यत्।।१८।।
अतस्तत्र च सर्वेशां द्वादशानां मीपते।
आदित्यानां तदा कुय्र्यात्पूजनं भावनाबलात्।।१६।।
चन्द्रस्यामृतरुपत्वादेव सन्तोषकारणात्[१]।
शेडशेन्द्धुप्रयूज्यं वे जलेऽस्मिन् संचरेन्नरः।।२०।।
एवं विधं सदाऽवश्यं शंखाधरे च शंखके।
चिन्तयित्वार्च्चेद्धीमान् रविं सम्प्राथ्र्य चानयेत्।।२१।।
आनीय शंखपानीये पूरयेच्चिनतनावशात्।
ततः सर्वहृदाम्भोजद्विष्णुमाननीय चेतसा।।२२।।
शंखेपरि सफफरद्रूपं वासयेद्देशिकोत्तमः।
कनिष्ठांगुष्ठसेयोगे मुखे चायोऽन्यहस्तायोः[२]।।२३।।
इतराभिश्चांगुलिभिर्योजयेद्रजुधर्मतः।
यमात्सांगलिनी मुद्रा शंखस्योपरिचालिता।।२४।।
शिखामन्त्रेण तां मन्त्री दर्शयेत्सावधानतः।
शिरोमन्त्रेण शंखं च मुद्रां चेप प्रदर्शयेत्।।२५।।
तन्मूलं नेत्रमन्त्रेण पश्येत्स देशिकोत्तमः।
शंखभ्रमणमाकुर्यात्तर्जनीद्वयतौ मुहुः।।२६।।
अवगुण्ठावमुद्रा सा कर्तव्या कवचे नतु।
मूलमन्त्रस्य च पुनर्यत्षडग च वर्तते।।२७।।
तद्वै शंखं चै य कुय्र्यान्न्यासपूजादि तत्त्ववित्।
नमः सुदर्शनोयति अस्त्रायेति ततो वदेत्।।२८।।
षंडत्ववैन मन्त्रेण बुधस्तालत्रयं चरेत्।
शंखस्य परितः कुर्याद्दिग्बन्धनमनेन च।।२६।।
मुद्रयित्वा कनिष्ठावित्रयं स देशिको यदा।
तर्ज्जन्यंगुष्ठयो योंगादाचरेच्छन्दमुत्कटम्।।३०।।
दिग्बन्धनमुद्रेयं रक्षोभूतादिभीतदा।

पूर्वादिदिक्षु शंखस्यानयादिगबन्धनं चरेत्।।३१।।
तर्जनीभ्यां च मध्ये द्वेऽनामिकाम्यां कनिष्ठके।
अन्योऽन्यहसतायोः[८]कुय्र्याद्धेनुमुद्र स्मृता बुधैः।।३२।।
कामधनौः स्तन इति संचिन्त्य मनसा द्विजः[९]।
अधोमुखतया ताु तु धेनमुद्रां प्रदर्शयेत्।।३३।।
तद्द्वारामृढ़वर्षाणि पूजाद्रव्याणि तानि च।
उपस्थितानि चिन्तयानि चेतसा पूजानोत्तमैः।।३४।।
वायुबीजं समुच्चाय त्रिवरं देशिकस्ततः।
सृष्ट्वा ह़स्ततलनेनैव जलं दोषं च शोषयेत्[१०]।।३५।।
अग्निबीजं विचिन्त्याथ पंचवारं ततौ द्विजः।
तज्लोद्गतदोषांश्च दहेत्पूजार्थतत्त्ववित्।।३६।।
ततो वरुणबीजेन सप्तवारं स देशिकः।
चन्द्रमण्डलतः प्रापतामृतेन प्लावयेच्च तत्।।३७।।
पुनर्गन्धादिकं तत्र पातयित्वा जपेत्पुनः।
मूलमन्त्रं देशिकेन्द्रो ह्यष्टवारं जलं स्पृशेत्।।३८।।
हस्ताभ्यांमंजहल कृत्वा धृत्वा पुण्यादिकं पुनः।
अधपात्रं प्रार्थयेत्तद्देशिकः कर्मकारकः।।३६।।
योऽत्रं श्रीपुरुषोत्तमस्य सतत। हस्ताम्बुजे राजते
जातश्च त्रिदिशैः त्रिया सह कथा चन्द्रेण सार्द्ध पुरा।
कल्पन्तु प्रमुखैश्चज्ज्र्वलिनिधेर्यनादतो राक्षसा
स्त्रस्यन्ति प्रमुदं मजन्ति सुजनास्तं पांचजन्य भजे।।४०।।
इति त्रीसूतसंहिताया नीलाद्रिमहोदये शंखनिर्णयो नाम सप्ततितमोऽध्यायः।

FOOTNOTES

१T वारिपूरणम्। २T नृप। ३T अग्नि। ४T भूप। ५T रवि। ६T सन्तोषकारोस्त्रतम्।
७T करौ। ७T करोयं। ६T विप्र। १०T विप्रः।

एकसप्ततिमोऽध्यायः।

ब्रह्मोवाच

इति सम्प्राथ्र्य विप्रऽसौ किंचिदानीय तज्ज्लात्।
तेनैवार्धजलेनाझु तुलस्याश्च प्रसर्बतः।।१।।
देवतां च तथात्मनं सेचेयदर्चकोत्तमः।
पूजौपकरणं सर्व नैवेद्यं चैव सेचयेत्।।२।।
प्रोक्षणीपनत्रसंस्कारं कुर्याच्च तदनन्तरम्।
प्रथमार्द्धपात्रस्रूांजलात्किंत्समानयेत्।।३।।
प्रोक्षणी भाजने ततु पातयेचछुद्धिहेतवे।
प्रौक्षिण्यां वीक्षणं कुय्यात्ताडनं त्वगुएठनम्।।४।।
तालत्रयं तदा कुर्याद्दिशां बन्धनमेव च।
घेनुमुद्रा प्रदश्र्याथ महामुद्रां प्रदर्शयेत्।।५।।
अनामिकांगुष्ठयोगस्य योगा प्रत्समृज्य नेत्रे सच देशिकेन्द्रः।
क्षेत्रस्य मन्त्रेण विलिकोयेच्च तत्प्रोक्षणीपात्रगतं तजं पुनः।।६।।
कनिष्ठानामिकेंगुष्ठात्तच्चेनाकुंचयमूलके।
तर्जनीमध्यमाम्यां च प्रोदगताम्यां स देशिकः।।७।।
तुलसीदलतस्तत्र प्रोक्षयेदस्तु मन्त्रतः।
अधौवक्त्रतया भूयस्त्वनया मुद्रया कुशैः।।८।।
पुण्यैर्वा ताडयेत्तिस्रः प्रणवोच्चादपि।
हस्ते मुष्टिद्वयं कृत्वा तर्ज्जनीयुगलं बिना।।९।।
अधोमुखेन तेनाशु भ्रमणाच्च पृथक पृथक।
कवाचख्येन मन्त्रेण ह्यवगुण्ठनमाचरेत्।।१०।।
सुदर्शनस्य मन्त्रेण तालत्रयमधाचरेत्।
दिगबन्धनं ततो मन्त्री पूर्ववद् विधिना क्रमात्।।११।।
धेनुमुद्रा महामुद्रां दर्शयेद् बीजतस्तदा।
मूलमन्त्रं समुच्चार्य जपेंच्च वसुवारतः।।१२।।
द्रव्यशुद्धिकरश्चायं[1] विधिः सर्वत्रशोधनः।
अनेन विधिना राजन् सर्वद्रंव्याणि शोधयेत्।।१३।।
विधिहनीं यदा कर्म सर्व द्रव्यादिकं च यत्।
असंस्कृतमिदं विष्झुरयोग्यं जायते ध्रुवम्।।१४।।
ततर्स्व राक्षसेग्राह्ये ततो यत्नाद्विधि चरेत्।

प्रोक्षण्यां च समारभ्य स्नानपात्रान्तमर्च्चकः।।१५।।
ण्वं च संस्कृतं कुर्यात्सर्वेषां च पृथक् पृथक्।
संस्कारान्ते पुनः सूक्षमं शुद्धं निर्मलम्बरम्।।१६।।
तेषु पात्रेषु सर्वेषु छादयेदत्तिमक्तितः।
अतः पूजां प्रकुर्वीत पूजामानसिकीं यथा।१७।।
कुय्र्यान्मन्त्री तत्कथेश्च श्रुयन्तां द्विजसत्तमाः[२]।
सहस्त्रदलसम्पन्ने कमले विमलेऽर्चकः।।१८।।
गुरुमन् सम्पूज्य चाधारे तचुष्पत्रे गणेश्वरमम्।
आधारशक्तिप्रमुखैसतन्मन्त्रैर्मन्त्रकौविदः।।१६।।
स्वशरीरैजर्लर्गन्धरैक्षतेः पुण्यकेस्तथा।
धुपदीपप्रदानेन मनसा पूजयेत्ततः।२०।।
मूलाधारं च हृदये भूमध्यं च स देशिकः।
एतद् व्याप्य सितं जीवं वामबीजेन तावता।।२१।।
तेजसा मन्त्ररुपेण ह्येकस्भूतं विचिन्येत्।
तत्तेजस्तु षडंगेन त्वगैः सावयवं पुनः।।२२।।
कृत्वा ततो विभूत्यादि न्यासमारमय् देशिकः।
अंगनधासान्तमाकुर्यात्स्वशरीरे क्रमान्न्यसेत्।।२३।।
संन्यस्य विधिवद् भूयः प्रत्येकं चासनादिका।
पूजां कुर्यात्ततो न्त्री नीरगन्धाक्षतादिभिः।।२४।।
मनसाथ मुखेवुणु गले वन्यस्रजं तथा।
श्रीवतसं वक्षसि प्रीत्या कौस्तुभं हृदि दापयेत्।।२५।।
अन्यैश्च भूषणैर्दिव्यैः अलंकुर्यासतवचेतसा।
लिकं कारयेद्धीमान् चन्दनैश्चसुसंस्कृतैः।।२६।।
चतुरंगुमालमेन लकं शोभनाकृति।
मध्ये छिद्रं विधातव्यं हरिपादाकृति कृतम्।।२७।।
ललाटे तादृशं कुर्यात्तिलकं सुमनोहरम्।
तन्मध्ये स्थापयेन्मन्त्री कल्शं नाशनम्।।२८।।
वामेस्य संस्मैन्मन्त्री मां च दक्षे सदाशिवम्।
अथत्यंगुलकं कुर्यादंगुलं माधवं स्मरेत्।
वेणुपत्राकृतिं कुर्याद्धाह्वोश्च तिलकं स्मृतम्।।३०।।
जीवथ्पितृक एवापि ह्यधेमुखतया भुजे।
कुर्यान्मृतपितृ कश्च लिकं चौध्वकत्रकम्।।३१।।

दीक्षणे च्पिनतयेमन्त्री वारौ च मुधुसूदनम्।
वामे च त्रीधरं स्मृत्वा तावत्सप्तपदे पुनः।।३२।।
दीपस्य कलिकारं चरेत्तिलकमुत्त्रमम्।
कण्ठस्थले वर्तुलं तत्तिलकं सुमनोहरम्।।३३।।
गोविन्दं कण्ठदेशेऽपि नारायणमथोदरे।
विष्णुं व दक्ष्रपाशर्वेऽपि स्मृत्वा दक्ष्रगलस्थले।।३४।।
त्रिविक्रमं ततो वामे पार्श्वे च वामन स्मरेत्।
हृषीकेशं वामगले पद्मनाभं च पृष्ठके।।३५।।
दामोदरं ककुद्यां च शिखायां च ततौ वदेत्।
द्वादशाणां मनु तत्र संन्यसेन्मन्त्रिसत्तमः।।३६।।
एवं यसलिं कुर्याद् वासुदेवः स्वंय भवेत्।
अनेन लिकेन बिना पूजां करोति यः।।३७।।
सा पूजा निष्फला ज्ञेया न प्रीतो विष्णुरव्ययः।
लिकान्ते ततो मन्त्री शिरोदेशे हृदम्बुजे।३८।।
मूलमन्त्रं समुच्चार्य श्वेतवस्त्राम्बनांजलिम्।
निजोत्तमांगे विप्रेन्द्रो[4] दयादैव्यविचिन्तया।।४०।।
पुनस्तेनव मन्त्रेण हृदये शुक्ललिहितामै।
करवीरांजलिं दद्याद्देशिकः परमार्थिकः।।४१।।
सप्तला कुन्दपुष्पाणामंजन्याधारमर्चयेत्।
मूलेन मनुना प्राज्ञः श्वेतरक्तप्रसूनतः।।४२।।
यूथिका रक्तवृन्दाली नीलोत्पलकृतांजलिम्।
स्वपादयुगले मन्त्री मूलेन परिपातयेत्।।४३।।
तुलसी मालती लाती कुन्दचम्पकपद्ममजैः।
पुष्पांजल्यार्चयेद्धीमान् सर्वागमूलमन्त्रतः।।४४।।
श्वेतचन्दनपुष्पाभ्यां दक्षभागे तद्यव च।
रक्तचन्दनपुष्पाभ्यां वामभागे तद्यैव च।।४५।।
असम्भवव्रसूनानामुक्तानां द्विजसत्तमाः[5]।
अन्यैरेव प्रकर्तव्या पंच पुष्पांजलिध्रुवमम्म।।४६।।
पुष्पांजलिं विप्रा ऐक्यभावो न जायते।
भेजे जाते तु सा पूजा विफला स्यान्न संशयः।।४७।।
ततो मन्त्री धूपदीपौ समपर्य मूलमन्त्रतः।
चेतेसाऽथ तला टेन्दुमण्डलामृत्तधारणा।

सन्तोष्यं विष्णुं सहसा नमस्कृत्य पुनः पुनः।।४८।।
प्रीणेयज्जगदानन्दं तदा स देशिकोत्तमः।
गण्ड्षांश्च ततामे दन्मधावनाचमने तथा।।४६।।
हसतानुलेपनं कृत्वा मुखवासमतः परम्।
मामल्याभूषणगन्धांश्च पुष्पमधूपदीपकन्।।५०।।
नैवेद्यं च समर्प्याथ ताम्बूलं दापयेत्ततः।
गीतनृत्यसुवाद्यैश्च सन्तोष्य कमलापतिम्।।५१।।
पश्यचलुकमाधृतय मनमसा तान् समर्पयेत्।
ततः पूर्व प्रागवतश्च बृद्धया वा देहमर्धतः।।५२।।
जाग्रद्दशायां सुप्तयां वा ससुप्त्यायां महर्षयः।
मनसा वचसा तावत्कर्मपापकृतं च यत्।।५३।।
हस्ताभ्यां[६] चरणाभ्यां च कुद्यासिस्तेन्द्रियाय च।
यच्छुतं च तदुक्तं च यत्कृतं सततं मया।।५४।।
तत्सर्व साम्प्रतं ब्रह्मार्पणमस्त्वाचि मा वदेत्।
आत्मानं सकलं मूयो भदीयं हरये सदा।।५५।।
समर्पयामीति वदे मक्त्या पूजकसत्तमः[७]।
ऊं तत्सवित्येक्मुक्तवा सौ ब्रूयात्समर्पणमनायम्।
पूर्ववत् प्रचरेन्मंत्री प्राजापत्यं शुभोदयम्।
रूष्टादिकं षडंगं च कृष्णं ध्यायेत् सुरेश्वरम्।।५७।।
सुप्रसन्नवदनं मनोरमं नूतनाम्बजचयोपमं विभुम्।
चखरु पद्मजनिमेक्षणं लसद्भूषणं विगतदूषणं हरिम्।।५८।।
पीतचेलरुचिरखं हृदम्बुजे नग्नदक्षकरपद्ममजं पुनः।
वारुवेणुघ्रतिसत्वहस्तकं नन्दनन्दनमहं स्मरामि तम्।।५६।।
पूरकं कुम्भकं तावद्रेचकंमूलमन्त्रतः।
अथवा कामबीजेन कलावारेश्च विद्यया।।६०।।
दन्तैश्च मन्त्रीण्गणनं क्रमेण रेचयेत्तदा
अतः परं जपं कुर्यात्तद्विधिः कथ्यतेऽधुना।।६१।।
नासाग्रे दृष्टिमायोजय मनःस्थिरतरं परम्।
मन्त्रार्थ देवतां चेव ध्यायेच्चैव मुहुर्मुहः।।६२।।
मनो मध्ये स्थितो मन्त्रै मन्त्रमण्ये स्थितं मनः।
मनोमन्त्रसमायोगे जपसिद्धिश्च जायते।।६३।।
अनामिका मध्यमूले कनिष्ठायास्त्रिपर्वसु।

पुनश्चानामिकाग्रे च मध्यगे च ततः परम्।।६४।।
तर्जनीपर्वत्रितयेंऽगुष्ठाग्रं च प्रसारयेत्।
